अर्थ—ऐसैं नवतत्त्वनिविषैं बहुतकालतैं छिप्या हुवा यह आत्मज्योति शुद्धनयकरि निकाशि प्रगट कीया है, जैसैं सुवर्णकी मालाके समूहमें सुवर्णका एकाकार छिप्याकूं निकाशै तैसैं । सो अब भव्यजीव याकों निरंतर अन्यद्रव्यनितैं तथा तिनतैं भयो नैमित्तिकभावनितैं भिन्न एकरूप अवलोकन करो । यहू पदपदप्रति कहिये पर्यायपर्यायप्रति एकरूप चिचमत्कारमात्र उद्योतमान है ॥ भावार्थ—यह आत्मा सर्व अवस्थामैं नानारूप दीखेथा सो शुद्धनय एक चैतन्यचमत्कार-मात्र दिखाया है । सो अब सदा एकाकारही अनुभवन करो पर्यायबुद्धिका एकांत मति राखो यह श्रीगुरुनिका उपदेश है ॥ अब टीकाकार फेरि कहे हैं, जो, जैसैं नवतत्त्वमें एक जीवहीका जानना भूतार्थ कह्या, तैसैं ही एकपणाकरि प्रकाशमान जो आत्मा ताका अधिगमनके उपाय ये प्रमाणनयनिक्षेप हैं तेभी निश्चयतैं अभूतार्थ हैं ॥ तिनिविषैं भी यहू एक आत्माही भूतार्थ है। जातैं ज्ञेयकै अर वचनके भेदतैं ते अनेक भेदरूप होय हैं ॥ तहां प्रथमही प्रमाण दोय प्रकार है परोक्ष अर प्रत्यक्ष । तहां उपात्त कहिये इंद्रियनितैं भिडिकरि प्रवर्तै अर अनुपात्त कहिये विना-भिडे मनकरि प्रवर्तै ऐसैं दोय परद्वारकरि प्रवर्त्तमान सो परोक्ष है । बहुरि केवल आत्माहीकरि प्रतिनिश्चितपणाकरि प्रवर्त्तमान होय सो प्रत्यक्ष है । भावार्थ—प्रमाण ज्ञान है, सो ज्ञान पांच-प्रकार है मति, श्रुत, अवधि, मनःपर्यय, केवल । तिनिमैं मति, श्रुत तौ परोक्ष हैं । अर अवधि, मनःपर्यय विकलप्रत्यक्ष हैं । केवलज्ञान सकलप्रत्यक्ष है । सो ये दोऊही प्रमाण हैं । ते प्रमाता प्रमाण प्रमेयके भेदकूं अनुभव करते संते तौ भूतार्थ हैं सत्यार्थ हैं । बहुरि गौण भये हैं समस्तभेद जामैं ऐसा जो एक जीवका स्वभाव ताका अनुभव करते संते अभूतार्थ है असत्यार्थ है ॥ बहुरि नय हैं सो द्रव्यार्थिक है, पर्यायार्थिक है । तहां वस्तु है सो द्रव्यपर्यायस्वरूप है । तामैं द्रव्यकूं मुख्यपणाकरि अनुभवन करावे ऐसा तौ द्रव्यार्थिक है । बहुरि पर्यायकूं मुख्यपणाकरि अनुभवन करावै सो पर्यायार्थिक है । सो ए दोऊही नय द्रव्यपर्यायकूं भेदरूप पर्यायकरि अनुभवन करते संते तो भूतार्थ हैं सत्यार्थ हैं ॥ बहुरि द्रव्यपर्याय दोऊहीकूं नाहीं आलिंगन करता ऐसा शुद्ध

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वस्तुमात्र जो जीवका स्वभाव चैतन्यमात्र ताकूं अनुभव करते संते भेद अभूतार्थ असत्यार्थ हैं ॥ बहुरि निक्षेप है सो नाम स्थापना द्रव्य भाव भेदकरि चारि प्रकार है। तहां जामैं जो गुन तौ न होय अर तिसके नाम वस्तुकी संज्ञा करीये सो तौ नामनिक्षेप है। बहुरि अन्यवस्तुविषै अन्यकी प्रतिमारूप स्थापना करना जो यहू वह वस्तु है सो यहू स्थापनानिक्षेप है। बहुरि वर्त्तमानपर्यायतैं अन्य अतीत, अनागत पर्यायरूप वस्तु होय ताकूं वर्त्तमानवस्तुमैं कहिये सो द्रव्यनिक्षेप है। वर्त्तमानपर्यायरूप वस्तुकूं ही वर्त्तमान कहिये सो भावनिक्षेप है सो ए चारोंही निक्षेप अपने अपने लक्षणभेदतैं न्यारे न्यारे विलक्षणरूपकरि अनुभवन करते संते भूतार्थ हैं सत्यार्थ हैं। बहुरि भिन्नलक्षणतैं रहित एक अपना चैतन्यलक्षणरूप जीवके स्वभावकूं अनुभवन करते संते चारोही अभूतार्थ हैं असत्यार्थ हैं ॥ ऐसैं इनि प्रमाणनयनिक्षेपनिविषैं भूतार्थपणाकरि एक जीवही प्रकाशमान है ॥ भावार्थ—इहां इनि प्रमाणनयनिक्षेपनिका विस्ताररूप व्याख्यान इनिके प्रकरणके ग्रंथनिमें हैं, तहांतैं जानना। इनितैं वस्तु द्रव्यपर्यायात्मक साधिये है। सो साधक अवस्थामैं तौ ए सत्यार्थही हैं जातैं ए ज्ञानहीके विशेष हैं, इनिविना वस्तूकूं यथाकथंचित् साधे तब विपर्यय होय है ॥ अवस्थाके व्यवहारके अभावकी तीन रीति हैं। एक तो यथार्थवस्तूकूं जानि ज्ञानश्रद्धानकी सिद्धिकरना सो ज्ञान श्रद्धान सिद्धि भये पीछे इनि प्रमाणादिकतैं श्रद्धानके अर्थि तो किछु प्रयोजन नाहीं ॥ बहुरि दूजी अवस्था विशेष ज्ञान अर राग द्वेष मोह कर्मका सर्वथा अभावरूप यथाख्यात चारित्रका होना है, याहीतैं केवलकी प्राप्ति है। सो यहू भये पीछे प्रमाणादिकका आलंबन नाहीं है ॥ तापीछै तीसरी साक्षात् सिद्ध अवस्था है, सो तहां भी किछू आलंबन नाहीं है ॥ ऐसैं सिद्ध अवस्थामैं प्रमाणनयनिक्षेपनिका अभावही है इस अर्थका कलशरूप काव्य कहे हैं—

विशेष —यद्यपि पं० जयचंद्रजीने इस श्लोकका अर्थ किया है भावार्थ भी विस्तृतरूपसे समझाया है परंतु श्लोकमें जो दृष्टांत है उसका विलकुल स्पष्टीकरण नहीं किया, भट्टारक शुभचंद्रजीने श्लोककी टीका यद्यपि स्पष्ट लिखी है परंतु अधिक दृष्टि लगानेसे श्लोकका असली तात्पर्य समझमें आता है इसलिये हमारी समझसे इस श्लोकका सुगम और स्पष्ट अर्थ इसप्रकार हैं—

यह जगत्प्रसिद्ध बात है कि सुवर्णको तपाकर शुद्ध किया जाता है और ज्यों ज्यों उसमें अग्निके ताव दिये जाते हैं त्यो त्यों उसके कीट कालिमा आदि मल दूर होते जाते हैं इसरीतिसे उसके असली स्वरूपके प्राप्त करनेकेलिये एकसे लेकर सोलह ताव दिये जाते हैं और वह हर एक तावमें कुछ २ कीट कालिमा आदिसे रहित होता हुआ उत्तरोत्तर प्रकाशमान होता चला जाता है जिससमय उसके सोलहो ताव समाप्त हो जाते हैं उससमय वह सोलहवानी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निखालस सोना कहा जाता है और सुवर्णकी परीक्षा करनेवाले मनुष्य उस सोलह-अर्थात् तापके तपाये हुये सोनेको कसौटीपर घिसकर उसके असलीस्वरूपको देखते हैं तो यद्यपि वह सुवर्ण एक शुद्धस्वरूप है तथापि कीट आदिके संबंधसे उसके तावों (उत्तरोत्तर अवस्थाओं) के भेदसे उसमें भेद होता जाता है वह अनेक स्वरूप जान पड़ने लगता है परंतु कीट आदिके नष्ट होजानेपर वह ज्योंका त्यों प्रकट होजाता है उसीप्रकार यह आत्मा भी एक चैतन्यमात्र शुद्ध स्वरूप है और जैसा जैसा वह एकेंद्रियसे दो इंद्रिय, दो इंद्रियसेते इन्द्रिय, ते इंद्रियसे चौ इंद्रिय, चौइंद्रियसे पंचेंद्रिय, पंचेंद्रियोंमें मनुष्य, मनुष्योंमें अणुव्रती श्रावक, ऐलक, चुल्लक चुल्लकसे मुनि, मुनियोंमें भी सातवेंसे लेकर बारहवें गुणस्थानवर्ती और केवली आदि होता जाता है त्यों त्यों वह कर्म मलसे रहित होता हुआ प्रत्येक पर्यायमें प्रकाशमान होता जाता है और अनेकाकार दिखता है परन्तु सिद्ध अवस्थामें यह अकेले शुद्ध चैतन्यमात्र स्वरूपका धारक ही रहता है इस-लिये विद्वानोंको चाहिये कि वे इस प्रकारके चैतन्यमात्रस्वभावके धारक शुद्ध सिद्ध स्वरूपका अनुभव करें ॥ ८ ॥

उदयति न नयश्रीरस्तमेति प्रमाणं क्वचिदपि च न विद्मो याति निक्षेपचक्रं
किमपरमभिदध्मो धाम्नि सर्वंकषेऽस्मिन्ननुभवमुपयाते भाति न द्वैतमेव ९

सं टी०—अस्मिन्-परात्मलक्षणे, धाम्नि ज्योतिषि, सर्वंकषे—लोकालोकं, कषति—आसमानं करोति जानातीति लक्षणया धातूनामनेकार्थत्वात् सर्वंकषः 'सर्वकूलाभ्रकरीषेषु कषः' इति खश्प्रत्ययविधानात्। अनुभवं-स्वानुभवप्रत्यक्षं, उपयाते—प्राप्ते सति, नयश्रीः नया द्रव्यार्थिकपर्यायार्थिकाः नैगमादयः, तेषां श्रीः, न उदयति-न प्राप्नोति नयानां परमात्मन्यधिकाराऽयोगात् बाह्यवस्तुप्रकाशकत्वाच्च, पुनरतस्मिन् प्रकाशिते, प्रमाणं-प्रमीयते परिच्छिद्यते वस्तु तत्त्वं येन तत्प्रमाणं—स्वापूर्वार्थव्यवसायात्मकं, तच्च द्वैधं-प्रत्यक्षपरोक्ष-भेदात्। तत्र विशदं प्रत्यक्षं, तच्च द्वेधा साकल्यवैकल्यभेदात्। साकल्यं केवलज्ञानं सामग्रीविशेषविश्लेषिता-खिलावरणत्वात्। वैकल्यं—अवधिमनःपर्ययभेदाद् द्वेधा। इन्द्रियं प्रत्यक्षं सांव्यवहारिकं स्पर्शनादींद्रियभेदात् षोढा। तच्च प्रत्येकं—अवग्रहेहावायधारणाभेदाच्चतुर्धा, तच्च बहुबहुविधादिद्वादशविषयभेदात, षट्त्रिंशदधिकत्रि शतभेदभिन्नं। परोक्षं—स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदाद् बहुधा, एतद्विविधलक्षणं प्रमाणमस्तं गतमेति प्रमाणानां तत्प्राप्तिनिमित्तत्वात् तत्प्राप्ते वैयर्थ्याच्च। च पुनः, निक्षेपचक्रं—निक्षेपस्तु नामस्थापनाद्रव्यभाव-भेदतश्चतुर्धा तत्रातद्गुणे वस्तुनि संज्ञाकरणं नाम, अन्यत्र सोयमिति व्यवस्थापनं स्थापना, वर्तमानतत्प-र्यायादन्यद्द्रव्यं, तत्कालपर्ययाक्रांतं वस्तु भावोऽभिधीयते, तस्य चक्रं समूहः क्वचिदपि कुत्रचिदपि, आत्मनोऽन्यत्रालक्ष्ये स्थाने, याति गच्छति, तद् वयं न विद्मः न जानीमः। अतिशयालंकारकथनमेतत्। आत्मिकानां निक्षेपस्योपयोगित्वात् अत्रापरम् निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानलक्षणं सत्संख्याक्षेत्र स्पर्शनकालांतरभावाल्पबहुत्वलक्षणं, च किमभिदध्मः किं कथयामः ?, तत्र तेषामनुपयोगित्वात्। एव मनुभवेन द्वैतं द्वाभ्यां नयनेय प्रमाणप्रमेय निक्षेपनिक्षेप्यादिलक्षणाभ्यां इतं प्राप्तं, द्वीतं, द्वीतमेव द्वैतं स्वार्थि-काण्प्रत्ययविधानात्। न भाति न प्रतिभासते, तथा चोक्तं—

प्रमाणनयनिक्षेपा अर्वाचीनपदे स्थिताः। केवले च पुनस्तस्मिंस्तदेकं प्रतिभासतां॥

अथ स्वात्मस्वभावं प्रकाशयंतं शुद्धनयं व्यनक्ति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–आचार्य शुद्धनयका अनुभवनकरि कहे हैं, जो, इस सर्वभेदनिका गौण करनहारा जो शुद्धनयका विषयभूत चैतन्यचमत्कारमात्र तेजःपुञ्ज आत्मा ताकै अनुभव आये संते नयनि की लक्ष्मी है सो उदयकूं नाहीं प्राप्त होय है। बहुरि प्रमाण है सो अस्तकूं प्राप्त होय है। बहुरि निक्षेपनिका समूह है सो कहूं जाता रहै है सो हम नाहीं जाने हैं। इससिवाय और कहा कहैं द्वैतही नाहीं प्रतिभासे है।। भावार्थ–भेदकूं अत्यंत गौण करि कहा है जो प्रमाणनयादिकका भेदकी कहा चली है ? शुद्ध अनुभव होते द्वैतही नाही भासे है,एकाकार चिन्मात्रही दीखे है इहां विज्ञानाद्वैतवादी तथा वेदांती कहैं जो परमार्थ तौ अद्वैतहीका अनुभव भया सोही हमारा मत है, तुमने विशेष कहा कह्या ? ताकूं कहिये जो तुमारा मतमें सर्वथा अद्वैत माने हैं, सो सर्वथा माने तौ वाह्यवस्तुका अभाव होय है, सो ऐसा अभाव प्रत्यक्षविरुद्ध है। बहुरि हमारे नयविवक्षा है सो वाह्यवस्तुका लोप नाहीं करे है। शुद्ध अनुभवतैं विकल्प मिटे है, तब परमानन्दकूं आत्मा प्राप्त होय है, तातैं अनुभव करावनेकूं ऐसा कह्या है। अर वाह्यवस्तुका लोप कीये तौ आत्माकाभी लोप आवै तब शून्यवादका प्रसंग आवे है, सो तुम कहो तैसे वस्तुस्वरूप सधै नाहीं, अर वस्तुस्वरूपकी यथार्थश्रद्धाविना जो शुद्ध अनुभव भी करे तौ मिथ्यारूप है, शून्यका प्रसंग आया तब आकाश के फूलका अनुभव है।। ६ ।। आगैं शुद्धनयका उदय होय है ताकी सूचनिकाका काव्य कहै हैं—

विशेष–पं० जयचन्द्रजीने सर्वंकषे पदका अर्थ सब पदार्थोंको गौण करनेवाला किया है और भट्टारक शुभचन्द्रका अर्थ,सब पदार्थोंको जाननेवाला यह है, यद्यपि ये दोनो ही अर्थ अनुकूल हैं तथापि खुलासा अर्थ परद्रव्य और उनके विकारोंसे रहित यह है। पं० जयचन्द्रजीने किमपरमभिदध्मः इस वाक्यका अर्थ इसके सिवाय और क्या कहैं ? और भ० शुभचन्द्रजीने प्रत्यक्ष परोक्ष प्रमाण पदसे उल्लेखकर अपर शब्दसे निर्देश स्वामित्व आदि ग्रहण किये हैं और यह आशय प्रकट किया है कि शुद्धचिन्मात्र तत्त्वके अनुभव होनेपर जब बलवान से बलवान भी प्रत्यक्ष परोक्ष आदि प्रमाण लापता होजाते हैं तब न कुछ शक्तिके धारक निर्देश स्वामित्व आदि तो ठहर ही कैसे सकते हैं ? इन दोनों अर्थोंमें भट्टारक शुभचन्द्रजीका अर्थ चमत्कार पूर्ण है ।। ६ ।।

आत्मस्वभावं परभावभिन्नमापूर्णमाद्यंतविमुक्तमेकं ।
विलीनसंकल्पविकल्पजालं प्रकाशयन् शुद्धनयोभ्युदेति ।। १० ।।

स० टी०–अभ्युदेति उदयं गच्छति, कोसौ ? शुद्धनयः शुद्धपरात्मग्राहकद्रव्यार्थिकः किं कुर्वन् प्रकाशयन् व्यक्तीकुर्वन्,कं ? तं,आत्मस्वभावं शुद्धचिद्रूपस्वरूपं,कीदृशं तं ? परभावभिन्नं परे च ते भावाश्च परभावा स्वात्मान्यपदार्थाः, अथवा परेषां अचेतनादीनां भावा स्वभावा तैर्भिन्नं । भूयः, कीदृशं ! आपूर्णं आ अतिश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न परिपूर्णं, ज्ञानाद्यनंतगुणपूर्णात्मा तस्य,पुनः किं भूतं ? आद्यंतविमुक्तं अनादिनिधनमित्यर्थः पुनः कीदृशं एकं अद्वैतं अखंडद्रव्यत्वात्, विलीनेत्यादि परद्रव्ये ममेदमिति मतिः संकल्पः, अहं सुखी दुःखीत्यादिमतिः विकल्पः, संकल्पश्च विकल्पश्च संकल्पविकल्पौ, विलीनं संकल्पविकल्पयोर्जालं समूहो यस्य तं । १० ।

शुद्धात्मनोऽनुभवनं भावयति—

अर्थ-शुद्धनय है सो आत्माके स्वभावकूं प्रगट करता संता उदय होय है। कैसा प्रगट करे है ? परद्रव्य तथा पर द्रव्यके भाव तथा परद्रव्यके निमित्ततैं भये अपने विभाव ऐसे परभावनितैं भिन्न प्रगट करे है। बहुरि कैसा प्रगट करे है ! आपूर्ण कहिये समस्तपणाकरि पूर्णस्वभाव समस्त लोकालोकका जाननहारा ऐसा स्वभावकूं प्रगट करे है। जातैं ज्ञानमैं भेद तो कर्म-संयोगतैं है, शुद्धनयमें कर्म गौण है। बहुरि कैसा प्रगट करे है ? आदि अन्तकरि रहित, जो कछू हूं आदि लेकरि काहुँते भया नाहीं,तथा कबहूं काहुकरि जाका विनाश नाहीं ऐसा पारिणामिक भावकूं प्रगट करे है। बहुरि कैसा प्रगट करे है ? एक है सर्व भेदभावतैं द्वैत भावतैं रहित एकाकार है, बहुरि विलय भये हैं समस्त संकल्प अर विकल्प के समूह जामें संकल्प तौ द्रव्यकर्म, भावकर्म, नोकर्म आदि पुद्गलद्रव्यनिविषैं आपा कल्पै सो लेणे अर विकल्प जे ज्ञेयनिके भेदतैं ज्ञानमैं भेद दिखै ते लेणे ऐसा शुद्धनय प्रकाशरूप होय है। सो इस शुद्धनयकूं जानना

नहि विदधति बद्धस्पृष्टभावादयोमी स्फुटमुपरि तरंतोप्येत्य यत्र प्रतिष्ठां।
अनुभवतु तमेव द्योतमानं समंताज्जगदपगतमोहीभूय सम्यक् स्वभावं ।११।

सं० टी०—भो जगत् भोजगन्निवासिलोक ! आधारे आधेयस्योपचारः,लोकोक्तिरपीदृग्वास्ति मालवो देशः समागतोऽत्र,इत्युक्ते तत्रत्या भूमिर्नागता किंतु तत्रत्यो लोकः तथा जगदित्युक्ते जगन्निवासिलोकः,अनुभवतु अनुभवगोचरीकरोतु, कं ? तमेव स्वभावं, शुद्धनिश्चयनयोक्तत्वात्, यथोक्तस्वभावं, अथवा स्वभावं स्वपदार्थं स्वशुद्धचिद्रूपमित्यर्थः,सम्यक् यथोक्ततया,किंभूतं ? समंतात् सामस्त्येन,द्योतमानं,लोकप्रकाशमानं, किं कृत्वा अपगतमोहीभूय अपगतमोहोभूत्वा विनष्टमोहो भूत्वेत्यर्थः यत्र आत्मनि, अमी, बद्धेत्यादि बद्धः कर्मनोकर्मभ्यां संश्लेषरूपेण बंधेन बद्धः स्पृष्टः विस्रसोपचयादिपरमाणुभिः अन्यैश्च संयोगमात्रतया स्पृष्टः,बद्धश्च स्पृष्टश्च बद्धस्पृष्टौ तावेवादिर्येषामन्ययुतादीनां ते च ते भावाश्च ते तथोक्ताः, एत्य आगत्य प्राप्येत्यर्थः,प्रतिष्ठां स्थितिं माहात्म्यं वा, नहि विदधति नैव दधते, स्फुटं व्यक्तं यथा भवति तथा, जगदुपरि सर्वतःतरन्तोऽपि सर्वतः उत्कृष्टा भवंतोऽपि व्यवहारदृष्ट्या दृश्यमाना अपि व्यवहारिभिः कथ्यमाना अपीत्यर्थः, उक्तं च-अस्पृष्टमबद्धमनन्यमयुतमवशेषमविभ्रमोपेतः यः पश्यत्यात्मानं स पुमान् खलु शुद्धनयनिष्ठः ॥ १ ॥ इति

अथ पूर्वापरबंधविनाशकत्वेनात्मानमुद्बोधयति—

अर्थ-टीकाकार उपदेश करे हैं, जो जगतके प्राणीसमूह सो तिस सम्यक्स्वभावकूं अनुभवन करौ। जाविषैं ए बद्ध स्पृष्ट आदि भाव हैं ते प्रगटपणें इस स्वभावके उपरि तरते हैं, तौऊ प्रतिष्ठाकूं नाहीं प्राप्त होय हैं, जातैं द्रव्यस्वभाव तो नित्य है एकरूप है अर ए भाव अनित्य हैं अनेकरूप हैं ॥ पर्याय है सो द्रव्यस्वभावमें नाहीं प्रवेश करे है उपरि ही रहे है ॥ कैसा है

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यह शुद्ध स्वभाव ? सर्व अवस्थामैं प्रकाशमान है ॥ कैसे होयकरि अनुभव करो ? अपगत-मोहीभूय कहिये दूरि भया है मोह जाका ऐसा होयकरि । जातैं मोहकर्मके उदयजनित मिथ्या-त्वरूप अज्ञान जेतै है तेतैं यह अनुभव यथार्थ नाहीं होय है । भावार्थ—शुद्ध नयका विषयस्वरूप आत्माका अनुभव करो यह उपदेश है । आगे इसही अर्थके कलशरूप काव्य फेरि कहे हैं, जो, ऐसा अनुभव कीयें आत्मदेव प्रगट प्रतिभासमान है—

भूतं भांतमभूतमेव रभसा निर्भिद्य बंधं सुधी-
र्यद्यन्तः किल कोप्यहो कलयति व्याहत्य मोहं हठात् ॥
आत्मात्मानुभवैकगम्यमहिमा व्यक्तोयमास्ते ध्रुवं ।
नित्यं कर्मकलंकपंकविकलो देवः स्वयं शाश्वतः ॥

सं. टी.—किल-इति आगमोक्तौ,अहो इति आश्चर्ये । यदि कोऽपि सुधीः-धीमान्, अंतः अभ्यंतरे,शुद्ध-चिद्रूपं कलयति अनुभवति,अवलोकयति-साक्षात्करोतीत्यर्थः । व्याहत्य निश्शेषमुन्मूल्य,कं ? मोहं अष्टाविंश-तिप्रकृतिभेदभिन्नं मोहनीयं कर्म,कथं ? हठात्-बलात्कारेण तपोध्यानादिभिः, पुनः किंकृत्य ? निर्भिद्य निश्शेषं भेदयित्वा,बंधं प्रकृतिस्थित्यनुभागप्रदेशलक्षणं चतुर्धा कर्मबंधं,रभसा शीघ्रं शुक्लध्यानावाप्त्यनंतरं अंतर्मुहूर्तत कीदृक्षं बंधं ? भूतं-पूर्वं संसारावस्थायां समयप्रबद्धस्वरूपेण बद्धं निर्जरावशान्निर्जीर्यं, भांतं वर्तमानं, योगा-दिभिरागमकर्मसमयप्रबद्धं, अंतः संवरवशान्निरुद्ध्य, अभूतं अनागतं अग्रे बध्यमानं निरुद्ध्य, तत्कारणयो-गकषायानामभावात् ' कारणाभावे कार्यस्याप्यभावादिति ' न्यायात्, एव निश्चयेन, तदिति, अध्याहार्यं अयं प्रत्यक्षीभूतः, आत्मा शुद्धचिद्रूपः, व्यक्तः, साक्षात् अनंतचतुष्टयापन्नः, ध्रुवं निश्चितं, आस्ते तिष्ठति कीदृक्षः ? आत्मेत्यादि आत्मनश्चित्स्वरूपस्य, अनुभवः, तेन एकः अद्वितीयः, गम्यः ज्ञेयः, महिमा माहात्म्यं यस्य सः, नित्यं सदैव, परमावस्थायां कर्मेत्यादि कर्म एव कलंकपंकः, संसारस्य कालंक्यहेतुत्वात्, तेन विकलः रहितः । पुनः किंभूतः ? देवः दीव्यति क्रीडति एकलो(एको)ऽभावमनुगच्छति परमात्मरूपे द्योतते वा देवः । स्वयं कर्माद्यनपेक्षत्वेन शाश्वतः नित्यः ॥ १२ ॥ अथात्मानुभूतिमेव समर्थयति—

अर्थ—जो कोई सुबुद्धि, सम्यग्दृष्टि, भूत कहिये पहले भया अर भांत कहिये वर्तमानका अर अभूत कहिये आगामी होयगा ऐसा तीन कालसंबंधी कर्मका बंधकूं अपने आत्मातैं तत्काल शीघ्र न्यारा करि, बहुरि तिस कर्मके उदयके निमित्ततैं भया जो मिथ्यात्वरूप अज्ञान ताकूं अपने बलपुरुषार्थतैं न्यारा करि, अंतरंगविषैं अभ्यास करै देखै तौ यह आत्मा अपने अनुभव ही करि जानने योग्य है प्रगट महिमा जाकी ऐसा व्यक्त अनुभव गोचर निश्चल शाश्वत नित्य कर्मकलंककर्दमतैं रहित ऐसा आप स्तुति करनेयोग्य देव तिष्ठै है । भावार्थ—शुद्धनयकी दृष्टि करि देखिये तौ सर्वकर्मनितैं रहित चैतन्यमात्र देव अविनाशी आत्मा अंतरंगविषैं आप विराजे है यह प्राणी पर्यायबुद्धि बहिरात्मा याकूं बाह्य हेरे है सो बडा अज्ञान है ॥ आगैं शुद्धनयका विषयभूत आत्माकी अनुभूति है सोही ज्ञानकी अनुभूति है ऐसा आगली गाथाकी सूचनिकाके अर्थरूप काव्य कहे हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मानुभूतिरिति शुद्धनयात्मिका या ज्ञानानुभूतिरियमेव किलेति बुद्ध्वा ।
आत्मानमात्मनि निवेश्य सुनिष्प्रकंपमेकोऽस्ति नित्यमवबोधघनः समंतात् १३

सं. टी.—किल इति निश्चितं, इति पूर्वोक्तप्रकारेण, या शुद्धनयात्मिका—शुद्धनय एव आत्मा—स्वरूपं यस्या सा, आत्मानुभूति—आत्मनः शुद्धचैतन्यस्य, अनुभूतिः उपलब्धिर्वा पारमार्थिकी आत्मोपलब्धिरित्यर्थ इयमेव—आत्मानुभूतिरेव, ज्ञानानुभूतिः—ज्ञानस्य सम्यग्बोधस्य, अनुभूतिः—अनुभवः—उपलब्धिर्वा, इति—इत्थं बुद्ध्वा—मत्वा, एकः—अद्वितीयः, अस्ति—वर्तते, समंतात्—सामस्त्येन, किंभूतः ? नित्यं—निरंतरं, अवबोधघनः ज्ञानपिंडः, किंकृत्वैकोऽस्ति ? निवेश्य—आरोप्य, सुनिष्प्रकंपं अविचलं यथा भवति तथा आत्मनि स्वस्व-रूपे आत्मानं स्व-स्वभावं ॥ १३ ॥ अथ परमात्मस्वरूपप्रकाशनं नः आशास्ति—

अर्थ—ऐसे जो पूर्वोक्त शुद्धनयस्वरूप आत्माकी अनुभूति कहिये अनुभव है सोही यह ज्ञान की अनुभूति है ऐसे प्रगट जाणिकरि, बहुरि आत्माविषें आत्माकूं निश्चल स्थापिकरि, अर सदा सर्वतरफ एक ज्ञानघन आत्मा है ऐसा देखना । भावार्थ—पहिले सम्यग्दर्शनकूं प्रधानकरि कह्या था अब ज्ञानकूं प्रधानकरि कहे हैं—जो यह शुद्धनयका विषयस्वरूप आत्माकी अनुभूति है सोही सम्यग्ज्ञान है ॥ १३ ॥

अखंडितमनाकुलं ज्वलदनंतमंतर्बहिर्महः परममस्तु नः सहजमुद्विलासं सदा ।
चिदुच्छ्वलननिर्भरं सकलकालमालंबते यदेकरसमुल्लसल्लवणखिल्यलीलायितं १४

सं. टी.—अस्तु—भवतु, किं तत् ? परमं महः—जगदुत्कृष्टं ज्योतिः— जगत्प्रकाशकत्वात्, केषां ? नः—अस्माकं, किं भूतं ? अखंडितं—न खंडितं—अध्वस्तं, केनापि प्रमाणेन कैश्चिद्वितादिभिस्तत्स्वरूपस्य खंडयितु-मशक्यत्वात्, "सूक्ष्मं जिनोदितं तत्त्वं हेतुभिर्नैव हन्यते इति वचनात्, अनाकुलं न केनापि व्याकुलीकृतं तत्स्वरूपस्य केनापि पुद्गलादिसंयोगेनास्पृष्टत्वात्, जलेन बिशनीपत्रवत्, भूयः किंभूतं न विद्यते, अंतो विनाशो यस्य तत्, तद्गुणाविर्भावेन विनाशरहितत्वात्, अंतः अभ्यंतरे बहिः बाह्ये ज्वलत्—देदीप्य-मानं बहिरंतः स्वरूपप्रकाशकत्वात् सहजं—स्वाभाविकं, केनापीश्वरादिनाऽकृत्रिमत्वात् सदा—निरंतरं, उद्वि-लासं-तत्-ऊर्ध्वं तनुवातवलये विलासः—सुखानुभवनं अथवा उदयमानो विलासो यस्य तत्, चिदुच्छ्वलन-निर्भरं-चितश्चैतन्यस्य, उच्छ्वलनं तेन निर्भरं प्रवर्धमानचित्स्वभावत्वात् यत्-परंज्योतिः—सकलकालं-भूतभविष्यद्वर्तमानकालं एकरसं शुद्धपरमात्मरसं आलंबते—अवलंबयति लवणरसवत्—यथैव हि व्यंजनलुब्धा-नामबुद्धानां लोकानां विचित्रव्यंजनसंयोगोपजातस्य सामान्यविशेषाविर्भावतिरोभावाभ्यामनुभूयमानं लवणं स्वदते न पुनरन्यसंयोगशून्यतोपजातसामान्यविशेषाविर्भावतिरोभावाभ्यां तथैव ज्ञेयलुब्धानामबुद्धानां विचित्रप्रमेयाकारकरंबितसामान्यविशेषतिरोभावाविर्भावाभ्यामनुभूयमानं ज्ञानं स्वदते न पुनस्तदन्यसंयोग-शून्यतोपजातसामान्यविशेषाविर्भावतिरोभावाभ्यां ज्ञानिनां—केवललवणरसिकानां तु तदेकं स्वदते । भूयः किंभूतमिति पदं सर्वत्र विशेषणे योज्यं उल्लसदित्यादि—उल्लसन्—उल्लासं गच्छन् स चासौ लवणखिल्य-श्च लवणखंडं तस्य लीला तद्वदायतं—विस्तृतं । यथा—अलुब्धबुद्धानां केवलः सैंधवखिल्यः परद्रव्यसंपर्करा-हित्येनानुभूयमानः सर्वतोऽप्येकलवणरसत्वाल्लवणत्वेन स्वदते तथात्मापि सकलपरद्रव्यवैकल्येन केवल अनुभूयमानः सर्वतोऽप्यद्वितीयविज्ञानघनत्वाद् बोधत्वेन स्वदते ॥ १४ ॥ अथ तस्यैवोपासनं संधत्ते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—आचार्य कहे हैं, जो, तत् कहिये सो परम उत्कृष्ट मह कहिये तेज प्रकाशरूप हमारे होऊ, जो सदाकाल चैतन्यका उछलन कहिये परिणमन ताकरि भरया, जैसे लूणकी डली एक क्षाररसकी लीलाकूं आलंबन करे है, तैसे एक ज्ञानरसस्वरूपकूं आलंबन करे है। बहुरि सो तेज कैसा है ? अखंडित है, जामैं ज्ञेयनिके आकाररूप नाहीं खंडते है। बहुरि कैसा है ? अनाकुल है, जामैं कर्मके निमित्ततै भये रागादिक तिनिकरि भई जो आकुलता सो नाहीं है। बहुरि कैसा है ? अंतर्बहिरनंतं ज्वलत् कहिये अंतरहित अविनाशी जैसे होय तैसे अंतरंग तौ चैतन्यभावकरि दैदीप्यमान अनुभवमें आवे है अर बाह्य वचनकायकी क्रियाकरि प्रगट दैदीप्यमान हो है, जान्या जाय है। बहुरि सहज कहिये स्वभावकरि भया है, काहूने रचा नाहीं है। बहुरि सदा उद्विलासं कहिये निरंतर उदयरूप है विलास जाका एकरूप प्रतिभासमान है। भावार्थ—आचार्यने प्रार्थना करी है, जो, यह स्वरूप ज्योतिर्ज्ञानानन्दमय एकाकार हमारे सदा प्राप्त रहो, ऐसा जानना ।१४।

एष ज्ञानघनो नित्यमात्मा सिद्धिमभीप्सुभिः ।
साध्यसाधकभावेन द्विधैकः समुपास्यतां ।। १५ ।।

सं० टी०—एष आत्मा-चिद्रूपः, नित्यं-सदा, समुपास्यतां-सेव्यतां-ध्यायतामित्यर्थः, कैः ? सिद्धि-स्वात्मोपलब्धि, 'सिद्धिः स्वात्मोपलब्धिरिति' वचनात् अभीप्सुभिः प्राप्तमिच्छुभिः, किंभूतः ? ज्ञानघनः-बोधपिंडः, एकः योऽद्वितीयः साध्यसाधकभावेन साध्यश्च साधकश्च तौ, तयोर्भावेन, स एव आत्मा ध्येयरूपतया साध्यः, स एव ध्यायकरूपतया साधकः। न त्वन्यः साध्यः न त्वन्यश्च साधकः, तेन स्वरूपेण द्विधा-द्विप्रकारः ।। १५ ।। अथात्मनस्त्रित्वमेकत्वमाह—

अर्थ—यहू पूर्वोक्त ज्ञानस्वरूप नित्य आत्मा है, सो सिद्धि जो स्वरूप की प्राप्ति ताके इच्छक पुरुषनिकरि साध्यसाधकभावके भेदकरि दोय प्रकारकरि एकही सेवनेयोग्य है सो सेवो भावार्थ—आत्मा तौ ज्ञानस्वरूप एकही है परन्तु याका पूर्णरूप साध्यभाव है और अपूर्णरूप साधकभाव है ऐसे भावभेदकरि दोय प्रकारकरि एक ही सेवना ।। १५ ।।

दर्शनज्ञानचारित्रैस्त्रित्वादेकत्वतः स्वयं ।
मेचकोऽमेचकश्चापि सममात्मा प्रमाणतः ।।१६।।

सं० टी०—आत्मा-परमात्मा, समं-युगपत्, मेचकः-विचित्रस्वभावः, कुतः ? दर्शनज्ञानचारित्रैः कृत्वा त्रित्वात्-त्रिस्वभावत्वात्। अपि च, अमेचकः-विचित्रस्वभावरहितः, कुतः ? स्वयं-स्वतः-एकत्वतः-एकस्वभावत्वात्, । ननु यः एकस्वभावः सोऽनेकः कथं स्यात् एकानेकयोः परस्परं विरोधात् ? इति चेन्न प्रमाणतः-प्रत्यक्षपरोक्षप्रमाणतः, एकानेकस्वभावत्वसाधनात्। तानि पुनस्त्रीण्यपि परमार्थेन, आत्मैक एव, वस्त्वंतराभावात् । देवदत्तस्य यथा श्रद्धानं, ज्ञानं, आचरणं, तत्स्वभावानतिक्रमात् तत्स्वभाव एव, न वस्त्वंतरं, तथात्मन्यपि तत्त्रितयं तत्स्वभावानतिक्रमात् आत्मा एव, न वस्त्वंतरं, मेचकचित्रज्ञानवद्वा एकत्वा-नेकत्वं ।। १६ ।। अथ मेचकामेचकत्वमात्मनः पद्यद्वयेन विवृणुते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–यहु आत्मा प्रमाणदृष्टिकरि देखिये तब एकैकाल मेचक कहिये अनेक अवस्थारूप भी है अर अमेचक कहिये एक अवस्थारूप भी है। जातैं याकै दर्शनज्ञानचारित्रकरि तौ तीनपणा है बहुरि आपकरि आपकै एकपणा है। भावार्थ – प्रमाण दृष्टिमैं त्रिकालात्मक वस्तु द्रव्य-पर्यायरूप देखिये है, तातैं आत्मा भी युगपत् एकानेकस्वरूप देखना ।१६। आगें नयविवक्षा कहै हैं

विशेष–आत्माके मेचकत्वअमेचकत्वमें देवदत्तके दर्शन आदि वा चित्रज्ञान भी दृष्टांत समझ लेना चाहिये अर्थात् जिसप्रकार देवदत्तके दर्शन ज्ञान चारित्र पदार्थ भिन्न २ प्रतीत होते हैं परन्तु वास्तवमें वे देवदत्तके स्वभाव होनेसे दूसरे पदार्थ नही उसीप्रकार आत्माके दर्शन आदि जुदे जुदे मालुम पडते हैं और उनसे वह तीन स्वरूप जान पडता है परन्तु ये उसके स्वभाव ही हैं भिन्न पदार्थ नहीं इसलिये वह एकही स्वरूप है। तथा हरा पीला काला आदि रंगोंका समूह चित्र (चितकबरा) कहा जाता है तो जिस प्रकार वहां जुदे जुदे रंगोंकी अपेक्षा की जाय तो अनेक स्वरूपता और समूहकी अपेक्षा की जाय तो एक रूपता सिद्ध होती है उसीप्रकार दर्शन आदिकी भिन्न २ विवक्षासे आत्मा अनेकरूप सिद्ध होता है और वे आत्मासे जुदे पदार्थ नही उसीके स्वभाव हैं ऐसा निश्चलरूपसे विचारनेपर आत्मा एकरूप ही निश्चित होता है ॥१६॥

दर्शनज्ञानचारित्रैस्त्रिभिः परिणतत्वतः ।
एकोऽपि त्रिस्वभावत्वाद् व्यवहारेण मेचकः ॥ १७ ॥

सं० टी०—आत्मा, एकोऽपि–चतन्यैकस्वभावेनाद्वितीयः, व्यवहारेण–व्यवहारदशायां, मेचकः–नाना-स्वभावः, त्रिस्वभावत्वात्–त्रयः–दर्शनादिलक्षणाः, स्वभावा यस्य तस्य भावस्तत्त्वं तस्मात् त्रिस्वभावत्वं। किं कृत्वा? त्रिभिः–त्रिसंख्याकैः, दर्शनज्ञानचारित्रैः–आत्मश्रद्धानावबोधानुचरणैः ॥ १७ ॥

अर्थ–व्यवहारदृष्टिकरि देखिये तब आत्मा एक है ताऊ तीन स्वभावपणाकरि मेचक कहिये अनेकाकाररूप है। जातैं दर्शन ज्ञान चारित्र इनि तीन भावनिकरि परिणमे है ॥ भावार्थ–शुद्धद्रव्यार्थिकनयकरि आत्मा एक है इस नयकूं प्रधानकरि कहिये तब पर्यायार्थिक नय गौण भया, सो एक कूं तीनरूप परिणमता कहता सोही व्यवहार भया, असत्यार्थ भी भया ऐसे व्यवहारनयकरि दर्शनज्ञानचारित्रपरिणामकरि मेचक कहा है ॥१७॥ अब परमार्थनयकरि कहे हैं–

परमार्थेन तु व्यक्तज्ञातृत्वज्योतिषैककः ।
सर्वभावांतरध्वंसिस्वभावत्वादमेचकः ॥ १८ ॥

सं० टी०—तु–पुनः, आत्मा एककः–एक इति संज्ञा यस्य सः, संज्ञायां कप्रत्ययविधानात्। अथवा एक एव, एककः, परमार्थेन–द्रव्यादेशतया, अमेचकः–अखंडैकस्वभावः। केन? व्यक्तेत्यादि–व्यक्तं–स्पष्टं, तच्च तज्ज्ञातृत्वं–बोधकत्वं तदेव ज्योतिर्महस्तेन कृत्वा। कुतः? सर्वेत्यादि–सर्वे च ते भावांतराश्च अन्यपदार्था तान् ध्वंसयति विनाशयति ततो विविक्तो भवतीत्येवं शीलः स्वभावो यस्य स, तस्य भावस्तत्त्वं तस्मात् ॥ १८ ॥ अथात्मनः साध्यं प्रतिफलते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—परमार्थ जो शुद्धनिश्चयनय ताकरि देखिये तब प्रगट ज्ञायकज्योतिर्मात्रकरि आत्मा एकस्वरूप है। जातैं याका शुद्धद्रव्यार्थिकनयकरि सर्वही अन्यद्रव्यके स्वभाव तथा अन्यके निमित्ततैं भये विभाव, तिनिका दूरि करनेंरूप स्वभाव है, यातैं अमेचक है, शुद्ध एकाकार है। भावार्थ—भेददृष्टिकूं गौण करि अभेददृष्टिकरि देखीये तब आत्मा एकाकार ही है, सो ही अमेचक है॥ १८॥ आगैं प्रमाणनकरि मेचक अमेचक कह्या सो इस चिंताकूं मेटि, जैसैं साध्यकी सिद्धि होय तैसैं करना यह कहे हैं—

विशेष—स्पष्ट भाव इस श्लोकका यह है कि अखंड ज्ञानका धारक, समस्त कर्मोंसे रहित, एक, शुद्ध ही यह आत्मा परभाव और परभावोंके विकारोंसे रहित होनेके कारण शुद्धनिश्चयनयसे अमेचक कहा जाता है॥ १८॥

आत्मनश्चिंतयैवालं मेचकामेचकत्वयोः।
दर्शनज्ञानचारित्रैः साध्यसिद्धिर्न चान्यथा॥ १९

सं टी—आत्मनः-चिद्रूपस्य,मेचकामेचकत्वयोः-एकत्वानेकत्वयो-शुद्धत्वाशुद्धत्वोर्वा, चिन्तयैव-चिन्तनेनैव, विचारणेनेत्यर्थः,अलं पूर्यतां,तद्विचारणे न किमपीत्यर्थः। तर्हि कुतः साध्यसिद्धिः? दर्शनज्ञानचारित्रैः-आत्मश्रद्धानावबोधानुचरणैः साध्यो मोक्षो भव्यात्मनां मुक्तेरेव साध्यत्वात् तस्य सिद्धिर्दर्शनज्ञानचारित्रैर्भवतीत्याध्याहार्यं अन्यथा तत्-श्रद्धानादिमंतरेण साध्यसिद्धिर्न च-नैव. रसांगवत्-यथा उपास्यमानो रसांगस्तद्गुणश्रद्धानतत्सेवनानुचरणविधानतो रोगो वनीवच्यते नान्यथा तथात्मनो दर्शनादिकं॥ १९॥ अथात्मनस्त्रित्वैकत्वाभ्यामभिन्नत्वेन सर्वमुपपनीपद्यते—

अर्थ—यह आत्मा मेचक है भेदरूप अनेकाकार है, तथा अमेचक है, अभेदरूप एकाकार है। ऐसी चिंताकरि तो पूरी पडो, साध्य आत्माकी तौ सिद्धि है सो दर्शन ज्ञान चारित्र इनि तीनि भावनिकरि ही है, अन्यप्रकार नाहीं है यह नियम है। भावार्थ—आत्माकी शुद्धद्रव्यार्थिकनयकरि सिद्धि भया ऐसा शुद्धस्वभाव साध्य है, सो पर्यायार्थिकस्वरूप व्यवहारनयहीकरि साधिये है, तातैं ऐसैं कह्या है, जो भेदाभेदकी कथनी करि कहा, जैसैं साध्यकी सिद्धि होय तैसैं तैसैं करना, व्यवहारी जन पर्याय ही में समझे हैं। तातैं दर्शनज्ञानचारित्र तीन परिणाम हैं सोही आत्मा है। ऐसैं भेद प्रधानकरि अभेदकी सिद्धि करनी कही॥ १९॥

कथमपि समुपात्तत्रित्वमप्येकताया अपतितमिदमात्मज्योतिरुद्गच्छदच्छं।
सततमनुभवामोऽनंतचैतन्यचिह्नं न खलु न खलु यस्मादन्यथा साध्यसिद्धिः २०

सं०—टी—अनुभवामः-अनुभवविषयींकुर्मः, किं तत्? इदं-संवेद्यमानं सुखादिभिः, आत्मज्योतिः-परं महः, कियंतं कालं? सततं-निरंतरं, किंभूतं तत्? कथमपि-केनचित्प्रकारेण-रत्नत्रयात्मलक्षणेन, समुपात्तत्रित्वमपि सं-सम्यक्, उपात्तं गृहीतं, सम्यग्दर्शनज्ञानचारित्ररूपेण त्रित्वं त्रयात्मकत्वं येन तत्, ईदृक्षमपि एकतायाः चैतन्यैकस्वभावायाः सकाशात्, अपतितं-अभिन्नं, आत्मनस्त्रित्वैकत्वसमर्थनात्, पुनः किं भूतं?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उद्गच्छत्-ऊर्ध्वगमनस्वभावं, उद् ऊर्ध्वं-अग्रेऽग्रे गच्छति जानातीति, उद्गच्छत् विशुद्धकर्मक्षयादनंतरं, ऊर्ध्वगमनस्वभावत्वात् विशुद्धिविशेषादग्रे ज्ञानस्य प्राचुर्याच्च। पुनः किं भूतं? अच्छं निर्मलं कर्मकर्दमर-हितत्वात्, अनंतेत्यादि-अनंतं-विनाशरहितं, चैतन्यं-चेतनस्वभावः, तदेव चिन्हं लक्ष्म यस्य, तत्। कुत एतत् अनुभवामः? यस्मात्-यतः कारणात् अन्यथा आत्मानुभवमंतरेण, साध्यसिद्धिः-साध्यस्य-चिद्रूप-लक्षणस्य, सिद्धिः-प्राप्तिः, न खलु न खलु (न खलु) निश्चयेन नैव भवतीत्यर्थः। वीप्सार्थोयमतिशयेन निषेधकः। अधिकवचनं च किंचिदभीष्टं ज्ञापयत्याचार्यस्तथोपपत्त्यान्यथानुपपत्त्या चात्मनः साध्यसिद्धिर्ना-न्यथा, आत्मानुभवनेनैव मुक्तिप्राप्तिरिति तथोपपत्तिः, तदनुभवनमंतरेण कदाचित्कचिदपि कस्यचित् न साध्यसिद्धिरित्यन्यथानुपपत्तिः ॥ २० ॥ अथ तल्लाभलंभनं स्तौति—

अर्थ-आचार्य कहें हैं, जो यह आत्मज्योति है, ताहि हम निरन्तर अनुभवे हैं कैसा है? अनंत अविनश्वर जो चैतन्य सो है चिन्ह जाका, काहेते अनुभवे हैं? जातैं याके अनुभवविना अन्य-प्रकार साध्य आत्माकी सिद्धि नाहीं है। ऐसा नियम है। कैसा है यह आत्मज्योति? कथंचित्प्रकार अंगीकार किया है तीनपणा जानैं, तौऊ एकपणातै च्युत न भया है। वहुरि कैसा है? निर्मल जैसे होय तैसे उदयकूं प्राप्त होता है। भावार्थ—आचार्य कहे हैं-कोई प्रकार पर्यायदृष्टिकरि जाकै तीनपणा प्राप्त है, तौऊ शुद्धद्रव्यदृष्टिकरि जो एकपणातै नाहीं च्युत भया है, ऐसा आत्मज्योति अनंत चैतन्यस्वरूप निर्मल उदयकूं प्राप्त होता, ताहि हम निरंतर अनुभवे हैं। ऐसे कहनेतै ऐसा भी आशय जानिये, जो सम्यग्दृष्टि पुरुष हैं, ते ऐसे ही अनुभव करौ, जैसे हम अनुभवे हैं ऐसे जानना। आगे कोऊ तर्क करे है, जो आत्मा तो ज्ञानतै तादात्म्यस्वरूप है, जुदा नाहीं, तातै ज्ञानको नित्य सेवै ही है। ज्ञानका उपासने योग्यपणाकरि याकूं काहेतै शिक्षा दीजिये है? तहां आचार्य कहे हैं, जो-यह ऐसे नाहीं है, तातै आत्मा ज्ञानकरि तादा-त्म्यरूप है, तौऊ एक क्षणमात्र भी ज्ञानकूं नाहीं सेवै है। जातैं स्वयंबुद्धत्व-कहिये आपहीकरि जाननेतैं तथा बोधितबुद्धत्व कहिये परके जनावनेकरि याकै ज्ञानकी उत्पत्ति होय है। कै तौ काललब्धि आवै तब आप ही जाणि ले, कोई उपदेश देनेवाला मिलै तब जाणै, जैसे सूता पुरुष कै तो आप ही जागे, कै कोई जगावै तब जगेगा। ऐसे इहां फेरि पूछैं हैं, जो ऐसे हैं तो, जाननेका कारण पहली आत्मा अज्ञानी ही है। जातैं सदा ही याकै अप्रतिबुद्धपणा है। आचार्य कहे हैं, यह ऐसे ही है, अज्ञानी ही है ॥२०॥ बहुरि फेरि पूछैं हैं, जो यह आत्मा केतै एककाल अप्रतिबुद्ध है सो कहौ? तहां आचार्य कहे हैं—

विशेष—पं० जयचन्द्रजीने उद्गच्छदच्छं इन पदोंका अर्थ उत्तरोत्तर निर्मल होता हुआ उदयको प्राप्त होता है ऐसा किया है और भ० शुभचन्द्रजीने उद्गच्छत्-इसका अर्थ 'ऊर्ध्वगमन स्वभाववाला वा उत्तरोत्तर विशेष ज्ञानवान होता चला जाता है क्योंकि जिस समय समस्त कर्मोंका क्षय हो जाता है उस समय स्वभावसे ही यह ऊर्ध्वगमन करता है अथवा विशुद्धि विशेषसे उत्तरोत्तर ज्ञानमें अधिकता होती जाती है' यह अर्थ किया है एवं अच्छका अर्थ कर्म-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मलसे रहित बतलाया है। तथा ग्रन्थकारने 'न खलु न खलु' पदोंका दो बार उच्चारण किया है उनसे भट्टारक शुभचन्द्रजीने-अधिकका फल अधिक होता है इस न्यायके अनुसार साध्य-सिद्धि और आत्मानुभवमें तथोपपत्ति और अन्यथानुपपत्ति-अन्वय व्यतिरेक भी बतलाया है अर्थात् आत्माके अनुभवसे ही मोक्ष प्राप्त होता है बिना उसके अनुभवके मोक्षप्राप्ति नही हो सकती ॥ २० ॥

कथमपि हि लभंते भेदविज्ञानमूलामचलितमनुभूतिं ये स्वतो वान्यतो वा।
प्रतिफलननिमग्नाऽनंतभावस्वभावैर्मुकुरवदविकारा संततं स्युस्त एव २१

सं टी०—हीति-स्फुटं-लभंते-प्राप्नुवंति, ये-भव्याः कां ? अनुभूतिं-आत्मानुभवनं-आत्ममाहात्म्यं वा, कथं ! अचलितं निश्चलं यथा भवति तथा, कथं लभंते ?-कथमपि महता कष्टेन, भवाब्धौ स्वरूपप्राप्तेर्दुष्प्राप्यत्वात्। कुतः प्राप्तिः ? स्वतो वा-स्वयमेव, अभ्यंतरात्कर्मलाघवत्वलक्षणात्कारणात्, जातिस्मरण-देवागम-दर्शन-विद्युदभ्रपरशरीरादिविघटनदर्शनाद्वा, अनित्याद्यनुप्रेक्षाचिंतनं तत्र आत्मस्वरूपप्राप्तेः 'णमो सयं बुद्धाणं, इत्यागमवचनात्। वा-अथवा, अन्यतः-गुरूपदेशादेः। किं भूतां तां ? भेदेत्यादि-आत्मशरीरयोर्भेदः-भिन्नत्वं, तस्य वि-विशिष्टं यथोक्तं ज्ञानमुपलब्धिः, तदेव मूलकारणं यस्याः सा तां त एव-ये अनुभूतिभावुकास्ते एव भव्या नान्ये। स्युः-भवंति, संततं-निरंतरं, अविकाराः-मानसभावादिविकृतिरूपविकाररहिताः, "विकारो मानसो भावः" इत्यमरः। कैः ? प्रतीत्यादि-प्रतिफलनं प्रतिबिम्बं, आत्मनि प्रतिभासत्वमित्यर्थः, तेन निमग्ना-आत्मांतर्गता, प्रतिभासत्वधर्मेणात्मांतर्गतत्वं, न तु तदुत्पत्ति-तादात्म्य तदध्यवसायत्वेन, ते च ते भावाश्च, तेषां स्वभावाः-ज्ञानानुभवनागुरुलघुत्वादिलक्षणास्तैः मुकुरवत्-यथा मूर्तस्य मुकुरस्य स्वपराकारावच्छेदिका स्वच्छतैव वह्निरूपमगस्तत्र प्रतिभाता ज्वाला, औष्ण्यं च तथा नीरूपस्यात्मनः स्वपराकारावच्छेत्री ज्ञातृतैव पुद्गलानां कर्मनोकर्मेंद्रियादानां च ॥ २१ ॥ अथ मोहादानस्यति—

अर्थ—ये पुरुष आपहीतै तथा परके उपदेशतै कोई प्रकारकरि भेदविज्ञान है मूल उत्पत्ति कारण जाका ऐसी अविचल निश्चल अपने आत्माविषे अनुभूतिकूं पावे हैं, तेही पुरुष आरसे की ज्यों आपमैं प्रतिबिंबित भये जे अनंतभावनिके स्वभाव तिनिकर निरंतर विकाररहित होय हैं, ज्ञानमें ज्ञेयनिके आकार प्रतिभासे तिनिकरि रागादिविकारकूं नाहीं प्राप्त होय हैं ॥२१॥

विशेष—इस श्लोकका खुलासा भाव यह है कि जिस प्रकार स्वच्छ दर्पणमें अग्निका प्रतिबिंब पडता है परन्तु अग्निकी ज्वाला और उष्णता अग्निमें ही रहती है उनसे दर्पण विकृत नहि बनता उसीप्रकार जिस मनुष्यके, भेदविज्ञान है कारण जिसमें ऐसी अनुभूति प्राप्त होगई है उस मनुष्यके अन्तरंगमें यद्यपि इष्ट अनिष्ट पदार्थ प्रतिबिंबित होते हैं परन्तु उनसे उसकी आत्मामें रागद्वेष आदि विकार नहिं होते ॥ २१ ॥

त्यजतु जगदिदानीं मोहमाजन्मलीढं
रसयतु रसिकानां रोचनं ज्ञानमुद्यत्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इह कथमपि नात्मानात्मना साकमेकः
किल कलयति काले क्वापि तादात्म्यवृत्तिं २२ ॥

सं० टी०–इदानीं-आत्मस्वरूपप्रकाशनध्यानकाले, जगत्-विष्टपं, मोहं-ममेदं, अहं अस्य, आसीन्मम पूर्वमिदं, अहमेतस्यासं, भविष्यति पुनर्ममैतत् एतस्याहमपि भविष्यामि, इत्यादिरूपं मोहं त्यजतु-जहातु, किंभूतं ? आजन्मलीढं-आसंसारात्प्रवृत्तं । ज्ञानं-भेदविज्ञानं, रसयतु-आस्वादयतु-ध्यानविषयीकरोत्वित्यर्थः । किंभूतं तत् ? रसिकानां-शुद्धचिद्रूपरसास्वादकानां, रोचनं-रुचिकरं, उद्यत्-उदयं गच्छत् । इह-जगति, क्वापि काले-कस्मिंश्चित्समये, क्षयोपशमविशुद्धयादिलब्धिपंचकसामग्रीसद्भावसमये, किल इति-निश्चितं-एकः आत्मा-जीवः, अनात्मना-परद्रव्येण-शरीरादिना, साकं-सह, तादात्म्यवृत्ति एकत्ववृत्तिं, न कलयति-नांगीकरोति-तन्मयो न भवतीत्यर्थः कथमपि-केनचित् प्रकारेणापि ॥ २२ ॥ अथ मोहहापनार्थं देहहापनं ख्यापयति—

अर्थ–जगत् कहिये लोक है सो अनादिसंसारतैं लेकरि आस्वाद्या अनुभूया जो मोह ताहि अब तो छोडो । बहुरि रसिकजनकों रुचनेवाला उदय होता जो ज्ञान, ताहि आस्वादो । जातैं इस लोकविषैं आत्मा हैं सो अनात्मा जो परद्रव्य ताकरि सहित काहूंही कालविषैं प्रगटपणे तादात्म्यवृत्ति कहिये एकपणा ताहि काहू ही प्रकार करि नाहीं प्राप्त होय है, जातैं, आत्मा एक है, सो अनात्मा जो दूजा अन्यद्रव्य, ताकरि एकतारूप नाहीं होय है । भावार्थ–आत्मा परद्रव्यतैं काहु प्रकार कोई कालविषैं एकताका भावकूं नाहीं प्राप्त होय है । तातैं आचार्यने ऐसी प्रेरणा करी है, जो, अनादितैं लग्या जो परद्रव्यतैं मोह ताका भेद ज्ञान बताया है सो याका एकपणारूप मोहकूं अवही छोडो, अर ज्ञानकूं आस्वादो, मोह है सो वृथा है, झूठा है, दुःखका कारण है । आगे अप्रतिबुद्धके प्रतिबोधनेके अर्थी व्यवसाय कहिये व्यापार उपाय कहे हैं

अयि कथमपि मृत्वा तत्त्वकौतूहली सन्ननुभव भवमूर्तेः पार्श्ववर्ती मुहूर्तं ।
पृथगथ विलसंतं स्वं समालोक्य येन त्यजसि झगिति मूर्त्या साकमेकत्वमोहं २३

सं० टी.—अयीति-कोमलालापेऽव्ययं, तत्त्वकौतूहली-तत्त्वं-परात्मलक्षणं, तस्यावलोकने कौतूहली, सन्-भवन् हे मित्रेत्यध्याहार्यं कथमपि केनचित् प्रकारेण, मायादिप्रकारेण, मृत्वा–च्युत्वा, साक्षान्मरणे तदनंतरं तत्क्षणे साक्षात्तत्त्वावलोकनाभावात् । मुहूर्तं–द्विनालिकापर्यंतं, मूर्तेः–शरीरस्य, पार्श्ववर्ती–नैकट्यवर्ती, भव, तच्छरीरस्वभावावलोकनार्थं । अथ मृत्वा पार्श्ववर्तिभवनानंतरं, स्वं–परमात्मानं, अनुभव–अनुभवगोचरीकुरु–स्वध्यानविषयं कुर्वित्यर्थः । किं कृत्वा ? समालोक्य–दृष्ट्वा पृथग् भिन्नं, विलसंतं–स्वस्वरूपे विलासं कुर्वंतं आत्मव्यतिरिक्ताचेतनादिशरीरावस्थाज्ञानादिपरिणतावस्थामवलोक्य स्वस्वरूपे स्थिरीभवत्वित्यर्थः, येन पृथक् स्वानुभवनेन, मूर्त्या–शरीरेण साकं, सह एकत्वमोहं 'ममेदं शरीरं, शरीरस्याहमित्येकत्वलक्षणं मोहं, त्यजसि जहासि झगिति तत्कालं विलंबमंतरेणेत्यर्थः । ननु शरीरमेवात्मा, तद्व्यतिरिक्तस्य कस्य चिदात्मनोऽनुपलभ्यमानत्वात् , अन्यथा महामुनीनां तीर्थंकरशरीराद्यतिशयवर्णनानुपपत्तिः, इति युक्तिमुपन्यस्य भिन्नात्मवादिनं योगिनं प्रति कश्चिदप्रतिबुद्धः शिष्यः, इति पद्यमुत्प्लवते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—अयि ऐसा कोमल आमन्त्रण संबोधन अर्थमैं अव्यय है, ताकरि कहे हैं—भाई ! तू कथमपि कहिये कोई ही प्रकारकरि बडा कष्टकरि तथा मरिहुकरि तत्त्वनिका कौतूहली हुवा संता, इस शरीरादि मूर्तद्रव्यका एक मुहूर्त दोय घडी पाडोसी होऊ, अर आत्माका अनुभव करि। जाकरि अपने आत्माकूं विलासरूप सर्वपरद्रव्यतै न्यारा देखिकरि इस शरीरादिमूर्तिक पुद्गलद्रव्यकरि सहित एकपणाका मोहकूं शीघ्रही छोडेगा। भावार्थ—जो यह आत्मा दोय घडी पुद्गलद्रव्यतै भिन्न अपना शुद्धस्वरूपकूं अनुभवै तामैं लीन होय, परिषह आये चिगै नाहीं, तौ घातिकर्मका नाशकरि केवलज्ञान उपजाय मोक्षकूं प्राप्त होय। आत्मानुभवका ऐसा माहात्म्य है तो मिथ्यात्वका नाशकरि सम्यग्दर्शनकी प्राप्ति होना तौ सुगम है। तातै श्रीगुरुनिने यह ही प्रधानकरि उपदेश कीया है।

विशेष—कथमपि मृत्वा यहांपर पं० जयचन्द्रजीने कथमपि अर्थात् किसीप्रकारसे-बडे कष्टसे वा मृत्वा अर्थात् मर कर भी यह अर्थ किया है और भट्टारक शुभचन्द्रजीने कथमपि अर्थात् किसी प्रकार से माया छल कपट आदिसे मृत्वा अर्थात् च्युत्वा-रहित होकर यह अर्थ किया है। मृत्वाके च्युत्वा अर्थ करनेमें यह युक्ति भी दी है कि साक्षात् मरणके होजाने पर उसके बाद तत्त्व का अवलोकन होना असंभव है इसलिये यहां च्युत्वा अर्थ ही युक्तियुक्त है। इन दोनों अर्थोंमें पं० जयचन्द्रजीका अर्थ जरा खटकता है क्योंकि उन्होंने कथमपि और मृत्वा पदको आपसमें न मिलाकर अर्थ किया है जो प्रकृतमें असमंजस सरीखा जान पडता है परन्तु उसका असली भाव 'संसारमें मरणके समान अन्य कोई कष्ट नहीं' यह मानकर ग्रन्थकारने मूर्तिक शरीर आदि पदार्थोंके विचार करने में और आत्माके अनुभव करनेमें अन्य कष्टकी तो क्या बात ? 'यदि किसी प्रकारसे मरण भी हो जाय तथापि' यह है॥ २३॥

कांत्यैव स्नपयंति ये दश दिशो धाम्ना निरुंधंति ये
धामोद्दाममहस्विनां जनमनो मुष्णांति रूपेण च ।
दिव्येन ध्वनिना सुखं श्रवणयोः साक्षात्क्षरंतोऽमृतं
वंद्यास्तेऽष्टसहस्रलक्षणधरास्तीर्थेश्वराः सूरयः ॥२४॥

सं० टी०—ते-प्रसिद्धाः, नाभेयादयस्तीर्थेश्वराः-श्रुतज्ञानलक्षणतीर्थनायकाः वंद्याः, नमस्करणीयाः, ये-भगवंतः, कांत्यैव-द्युत्या एव-केवलं दश दिशः-ककुभः, स्नपयंति प्रक्षालयंति, स्वकांत्यैव समस्ता दिशः प्रकटयंतीत्यर्थः। ये-जिनाः धाम्ना-घातिकर्मक्षयोत्पन्नकोटिसूर्याधिक शरीरतेजसा, उद्दाममहस्विनां-अमर्यादीभूततेजस्विनां, स्वर्ण-रत्न-मुक्ताफलनक्षत्र-विमान-सूर्य-चंद्र-दीपाग्न्यादीनां, धाम-तेजः, निरुंधंति-निवारयंति, स्वल्पीकुर्वंतीत्यर्थः। तथा चोक्तं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आकस्मिकमिव युगपद्दिवसकरसहस्रमपगतव्यवधानं।
भामंडलमिव भावितरात्रिंदिवभेदमतितरामाभाति ॥ १ ॥ इति।

वै रूपेण कृत्वा जनमनः-त्रिलोकनिवासिप्राणिचित्तं, मुष्णंति हरंति, तच्चित्ताकर्षणं कुर्वतीत्यर्थः। किंभूतास्ते ? मुखं उभयोः शर्म यथा भवति तथा, श्रवणयोः-कर्णयोः, साक्षात्-प्रत्यक्षं, अमृतं-धर्मसुधां वर्षंतः-स्रवंतः, केन ? दिव्येन-अन्यजनातिशायिना, ध्वनिना-तीर्थंकरपुण्यकर्मोदयात्प्रवृत्तयोजनप्रमाणध्वनिना, पुनः किंभूताः ? अष्टेत्यादि-अष्टाभिरधिकानि सहस्राणि तानि च तानि लक्षणानि वज्रकुशेशय तोरण छत्राकारादीनि तेषां धराः धारकाः, ते तथोक्ताः नवशतव्यंजनोपलक्षिताष्टशतलक्षणलक्षितत्वात् तथा च सूरयः आचार्याः, वंद्याः ॥ २४ ॥ अथ कथं कांत्येत्यादिशरीरस्तवनेन तदधिष्ठातृत्वादात्मनो निश्चयेन स्तवनं न युज्यते, इत्युक्ते प्रत्युत्तरयति पद्यद्वयेन—

अर्थ-ते तीर्थंकर आचार्य वंदिवे योग्य हैं कैसे हैं ते ? अपनी देहकी कांतिकरि तो दशदिशानिकूं स्नपन करे हैं, धोवे हैं, निर्मल करे हैं। बहुरि अपने तेजकरि तेजतै उत्कृष्ट जो सूर्यादिक तेजस्वी तिनिका तेजकूं रोके हैं। बहुरि ते रूपकरि लोकनिके मनकूं हरे हैं। बहुरि दिव्यध्वनिवाणीकरि काननिविषे साक्षात् सुख अमृत वर्षावे हैं। बहुरि एक हजार आठ लक्षणनिको धारे हैं। इत्यादिक तीर्थंकर आचार्यनिकी स्तुति है सो सर्वही मिथ्या ठहरे है। तातै हमारे तौ यह ही एकांतकरि निश्चयप्रतिपत्ति है, जो आत्मा है सो ही शरीर है पुद्गल द्रव्य है, ऐसा अप्रतिबुद्धने कह्या। तहां आचार्य कहे हैं, जो ऐसा नहीं है-तू नयविभागका जाननं वाला नाहीं है ।।२४।।

प्राकारकवलितांबरमुपवनराजीनिगीर्णभूमितलं।
पिबतीव हि नगरमिदं परिखावलयेन पातालं ॥ २५ ॥

सं० टी०—इदं प्रसिद्धं, नगरं पत्तनं, पिबतीव पानं करोति गलतीत्यर्थः, इव उपमायां, किं ? पातालं अधोभवनं, केन ? परिखावलयेन, अतिमात्रं निम्नत्वात्, किंभूतं ? प्राकारेत्यादिः प्राकारेण शालेन, कवलितं कवलीकृतं, व्याप्तमित्यर्थः, अम्बरं नभ; येन तत्' अत्युच्चैस्तरत्वात्। उपेत्यादि-उपवनानां वाटिकानां, राजिः पंक्तिस्तया निगीर्णं व्याप्तं, भूमितलं पृथ्वीतलं, येन तत्। इति नगरे वर्णितेऽपि राज्ञस्तदधिष्ठातृत्वेऽपि प्राकारादिस्वरूपाभावात् वर्णनं नो भवति। तथैव—

अर्थ-यह नगर है सो कैसा है ? प्राकार कहिये कोट, ताकरि तो ग्रस्या है आकाश जाने ऐसा है। भावार्थ-कोट ऊंचा बहुत है। बहुरि उपवन कहिये बाग, तिनिकी राजी कहिये पंक्ति, तिनिकरि निगल्या है भूमितल जाने ऐसा है, भावार्थ-सर्वतरफ बागनितैं पृथ्वी छायरही है। बहुरि कैसा है ? कोटके चौगिरद खाईका वलयकरि मानूं पातालकूं पीवै ही है। ऐसे नगरका वर्णन करते संते, राजा याकै आधार है तौऊ कोट बाग खाई आदि सहित राजा नाहीं है। तातैं राजाका वर्णन याकरि नाहीं होय है। तैसेही तीर्थंकरका स्तवन, शरीरका स्तवन कीये नाही होय है, ताका भी काव्य है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नित्यमविकारसुस्थितसर्वांगमपूर्वसहजलावण्यम् ।
अक्षोभमिव समुद्रं जिनेंद्ररूपं परं जयति ॥२६॥

सं टी०—जिनेंद्ररूपं–सर्वज्ञरूपं जयति सर्वोत्कर्षेण वर्तते, किं भूतं? नित्यं यावच्छरीरभावित्वात् स्थिरमित्यर्थः, अवीत्यादि अविकारेण–नेत्रहस्तादिविकृत्यभावेन, सुस्थितानि सर्वशरीरांगानि सर्वावयवा यस्य तत्, पुनः किंभूतं? अपूर्वेत्यादि–अपूर्वं अन्यजीवासंभवि, सहजं अकृत्रिमं, स्वाभाविकमित्यर्थः, लावण्यं लवणिमा यस्य तत्, समुद्रमिव अक्षोभं न केनापि क्षुभ्यत इत्यक्षोभं। इति शरीरस्तूयमाने तीर्थंकर–केवलि पुरुषस्य तदधिष्ठातृत्वेऽपि सुस्थितसर्वांगादिगुणाभावात् स्तवनं न स्यात्॥ २६ ॥ यद्येवं तीर्थंकराचार्य स्तुतिः समस्ताप्यप्रशस्ता स्यात् ततः शरीरात्मनोरैकांतिकी प्रतिपत्तिः? नैवं नयविभागाभावात्। तं नयमुल्लेखयति—

अर्थ–जिनेंद्रका रूप है सो उत्कृष्ट जैसा होय तैसैं जयवंत वर्तै है–कैसा है? नित्य ही अविकार अर भलैप्रकार सुखरूप तिष्ठ्या है सर्वांग जामैं, बहुरि कैसा है? अपूर्व स्वाभाविक है अर जन्महीतैं लेकरि उपजा है लावण्य जामें। भावार्थ–सर्वकूं प्रिय लागे है, बहुरि कैसा है? समुद्रकी ज्यों क्षोभरहित है, चलाचल नाहीं है। ऐसैं शरीरका स्तवन करते भी तीर्थंकर केवलीपुरुषके शरीरका अधिष्ठातापणा है, तौऊ सुस्थित सर्वांगपणा अर लावण्यपणा आत्मा का गुण नाही। तातैं तीर्थंकर केवलीपुरुष के इनि गुणनिका अभावतैं याका स्तवन न होय। अब जैसे तीर्थंकर केवलीकी निश्चयस्तुति होय तैसे कहे हैं-तहां प्रथम ही ज्ञेयज्ञायकके संकर-दोष आवे ताका परिहार करि स्तुति कहे हैं। अब इहां इस निश्चयव्यवहाररूप स्तुतिके अर्थके कलशरूप काव्य कहे हैं–

एकत्वं व्यवहारतो न तु पुनः कायात्मनोर्निश्चया-
न्नुःस्तोत्रं व्यवहारतोऽस्ति वपुषः स्तुत्या न तत्त्वतः ।
स्तोत्रं निश्चयतश्चितो भवति चित्स्तुत्यैव सैवं भवे-
न्नातस्तीर्थकरस्तवोत्तरबलादेकत्वमात्मांगयोः ॥२७॥

सं० टी०—कायात्मनोः देहदेहिनोः, एकत्वं कथंचिदेकता, व्यवहारतः, व्यवहारनयमाश्रित्य, लोकव्यवहारं वा 'आत्मकर्मवशान्नोकर्मरूपेण पुद्गलस्कंधबंधो देहः, कनककलधौतयोरेकस्कंधव्यवहारवत् नीरक्षीरवद्वा, पुनः निश्चयात् निश्चयनयमाश्रित्य नैकत्वं, तयोः परस्परं भिन्नत्वात्। त्वित्यधिकपदं विशेषज्ञापकं, निश्चयाद्धि देहदेहिनोः अनुपयोगोपयोगरूपयोः, कनककलधौतयोः पीतपांडुरत्वस्वभावयोरिव, अत्यंतव्यतिरिक्तत्वेनैकार्थत्वानुपपत्तेर्नानात्वं, एवं किल नयविभाग इति अतः कारणात् वपुषः शरीरस्य स्तुत्या स्तवनेन, शरीरगुणवर्णनेन, नुः आत्मनः, स्तोत्रं स्तवनं, अस्ति भवति, कुतः व्यवहारतः व्यवहारनयात् तत् स्तोत्रं निश्चयात्–परमार्थतः,न हि। ननु आत्मस्तोत्रं कथं? निश्चयतः–परमार्थतः चितः–चिद्रूपस्यात्मनः,स्तोत्रं स्तवनं गुणवर्णनमित्यर्थः भवति–अस्ति, कया? चित्स्तुत्यैव चिद्रूपस्यामूर्ताखंडज्ञानदर्शनाद्यनंतगुणस्तवनेन, एवं निश्चयस्तुतिरेव,आत्मस्तुतिः,एवं सति सा–निश्चयस्तुतिः स्तुतिर्भवेत। अतः आत्मशरीरयोर्भि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

...त्वसमर्थनात्, एकत्वं अभिन्नता न भवतीत्यर्थः कयो ? आत्मांगयोः चिद्रूपदेहयो, कुतः ? तीर्थेत्यादि तीर्थंकरस्य नाभेयादिजिनस्य, स्तवः अष्टप्रातिहार्यादिगुणवर्णनं, तीर्थंकरशरीरगुणवर्णनमेव परमार्थ— स्तवनमिति प्रत्युत्तरबलाधानात् एकत्वं न कदाचन ॥ २७ ॥ अथैकत्वनिरासमुपसंहरति–

अर्थ--कायकै अर आत्माकै व्यवहारनयकरि एकपणा है। बहुरि निश्चयनयकरि एकपणा नाहीं है। याहींतैं शरीरके स्तवनतैं आत्मा पुरुषका स्तवन व्यवहारनयकरि भया कहिये, अर निश्चयतैं न कहिये, अर निश्चयतैं तौ चैतन्यके स्तवनतैं ही चैतन्यका स्तवन होय है। सो चैतन्यका स्तवन इहां जितेंद्रिय, जितमोह, क्षीणमोह ऐसैं कह्या तैसे होय है। तातै यह सिद्ध भया-जो अज्ञानीनैं तीर्थंकरके स्तवनका प्रश्न कीया था ताका यह नयविभागकरि उत्तर दिया, ताके बलतैं आत्माकै अर शरीरकै एकपणां निश्चयतैं नाहीं है॥ २७॥ फेरि याही अर्थके जाननेकरि भेदज्ञानकी सिद्धि होय है ऐसे अर्थरूप काव्य कहे हैं–

इति परिचिततत्त्वैरात्मकायैकतायां नयविभजनयुक्त्यात्यंतमुच्छादितायां ।
अवतरति न बोधो बोधमेवाद्य कस्य स्वरसरभसकृष्टःप्रस्फुटन्नेक एव २८

सं० टी०--अद्य-इदानीं, एव-निश्चयेन, कस्य-पुरुषस्य, बोधः भेदविज्ञानं, बोधं-बुध्यते-जानातीति बोधः-आत्मा, अथवा गुणे गुणिन उपचारः, तं न अवतरति-न प्रादुर्भवति ? अपि तु प्रादुर्भवत्येव। किंभूतः सः ? स्वेत्यादिः—स्वस्य-आत्मनः, रसः ज्ञानशक्तिविशेषः, तस्य रभसः-वेगः, तेन कृष्टः-आकृष्टः, विशदीकृत इत्यर्थः। भूयः किंभूतः ? प्रस्फुटन्-प्रकर्षेण निर्मलीभवन्-प्रकटीभवन्वा, एक एव नान्यः, बोधं विना आत्मानं प्रत्यवतरयितुं न कश्चित्क्षमः, इत्यर्थः। क सत्यां-आत्मेत्यादिः-आत्मा च कायश्च आत्मा-कायौ तयोरेकता-ऐक्यं, तस्यां, उच्छादितायां-निराकृतायां सत्यां, कया ? नयेत्यादि नयस्य—निश्चयव्य-वहारलक्षणस्य विभजनं-विभागः, तस्य युक्तिः-दर्शनोपन्यासः, तया, कैः ? इति पूर्वोक्तप्रकारेण परिचितं, परिचयीकृतं तत्त्वं-शुद्धचिद्रूपलक्षणं यैस्ते, इति परिचिततत्त्वास्तैः ॥ २८ ॥ अथ यावत्पर्यंतं परभावा-भावस्तावत्स्वानुभव इति संतन्यते--

अर्थ-ऐसैं परिचयरूप कीया है वस्तूका यथार्थस्वरूप जिनिनैं ऐसै मुनीनें आत्मा अर शरीरके एकपणाकूं नयके विभागकी युक्तिकरि अत्यंत उच्छादन कीया निषेध्या है। याकै होतैं तत्काल ज्ञान है सो यथार्थपणाकूं कौन पुरुषके अवतार न धरै, अवश्य अवतार धरैही धरै॥ कैसा होयकरि ? अपना निजरसका वेगकरि खेंच्या हूवा प्रगट होता एक स्वरूप होयकरि॥

भावार्थ-निश्चयव्यवहारनयके विभाग करि आत्माका अर परका अत्यंत भेद दिखाया, सो याकूं जानिकरि, ऐसा कौन पुरुष है जाकै भेदज्ञान न होय, होय ही होय जातैं ज्ञान है सो अपना स्वरस करि आप अपना रूप जानै, तब अवश्य आप न्यारा ही अपने आत्माकूं जनावै है॥ यहां कोई दीर्घसंसारी ही होय तो ताका कछू कहना है नाही॥ ऐसे अप्रतिबुद्धने कह्या था, जो 'हमारे तो यह निश्चय है, जो देह है सो ही आत्मा है' ताका निराकरण किया। आगैं कहै है, जो, ऐसैं यहु अप्रतिबुद्ध अज्ञानी जीव अनादिके मोहके संतानकरि निरूपण कीया जो आत्माका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर शरीरका एकपणा, ताका संस्कारपणाकरि अत्यंत अप्रबुद्ध था, सो अब प्रगट उदय भया है तत्त्वज्ञानस्वरूप ज्योति जाकै "जैसे कोई पुरुषके नेत्रमैं विकार था, तब वर्णादिक अन्यथा दीखे थे, अर जब विकार मिटै, तब जैसाका तैसा दीख्या तैसैं प्रगट उघड्या है पटलस्थानीय आवरणकर्म जाका, ऐसा भया संता प्रतिबुद्ध भया, तब साचात् देखनेवाला आपकूं आपही करि अर ज्ञान श्रद्धान कर अर तिसकूं आचरण करनेका इच्छक भया संता पूछै है,जो, इस आत्मारामके अन्यद्रव्यनिका प्रत्याख्यान कहिये त्यागना, सो कहा होय ? ऐसैं पूछते संते आचार्य कहे हैं जो ऐसैं कहना—

विशेष—बोधं इस द्वितीयांत पदका यथार्थपना अथकर पं० जयचंदजीने कस्य बोधः बोधं न अवतरति-इस वाक्यका अर्थ 'ज्ञान है सो यथार्थपणाकूं कौन पुरुषके अवतार न धरै अवश्य अवतार धरै ही धरै' यह किया है और भट्टारक शुभचंद्रजीने ' बोधं ' इसका आत्मा अर्थ कर 'किसकी आत्मामें सम्यग्ज्ञान अवतार नहिं लेता'उस वाक्यका यह अर्थ किया है । हमें भट्टारक शुभचंद्रजी का ' बोधं ' का आत्मा अर्थ प्रकृतोपयोगी और विशेष महत्त्वका जान पडता है ॥ २८ ॥

अवतरति न यावद् वृत्तिमत्यंतवेगादनवमपरभावत्यागदृष्टांतदृष्टिः ।
झटिति सकलभावैरन्यदीयैर्विमुक्ता स्वयमियमनुभूतिस्तावदाविर्बभूव ॥२९॥

सं० टी०—यावत्—यावत्पर्यंतं, अनवं—सत्यं यथा भवति तथा, अत्यंतवेगात्—अतिशीघ्रं, अपरेत्यादिः अपरे च ते भावाश्च अपरभावाः—अन्यपदार्थाः, तेषां त्यागः—त्यजनं, तदुल्लेखाय यो दृष्टांतः, तत्र दृष्टिः, यथाहि कश्चिन्नरः, रजकात् परकीयमंबरमादाय संभ्रांत्यात्मीयप्रतिपत्त्या परिधाय शयानः स्वयमज्ञानी सन्, अन्येन तद्वस्त्रस्वामिना तदंचलमालंब्य बलान्नग्नीक्रियमाणो मंक्षु प्रतिबुद्ध्यस्व, अर्पय परिवर्तितमेतद्वस्त्रं मामिकमिति असकृद्वचः शृण्वन्, अखिलैश्चिन्हैः सुपरीक्ष्य परकीयमिति निश्चित्याचिरात्, ज्ञानी सन् मुंचति तथा ज्ञातापि परभावान् संभ्रांत्या स्वप्रतिपत्त्यात्मसात्कुर्वन् शयानः स्वयमज्ञानी सन् गुरुणा परभावे विवेकं कृत्वैकीक्रियमाणो मंक्षु प्रतिबुध्यस्व, एकः खल्वयमात्मा,इत्यसकृत् श्रुतिं श्रौतीं शृण्वन् अखिलैश्चिन्हैः सुपरीक्ष्य सर्वान् परभावान्निश्चित्य ज्ञानी सन् मुंचति परभावानिति दृष्टांतदृष्टिः, वृत्तिं परभाव प्रवृत्तिं प्रति न अवतरति—अवतरणं न करोति तावत्पर्यंतं इयमनुभूतिः—आत्मानुभवज्ञानं, स्वयं—स्वतः, आविर्बभूव—प्रकटीबभूव, झटिति—शीघ्रं । किंभूता ? विमुक्ता त्यक्ता, कैः ? अन्यदीयैः,परकीयैः सकलभावैः सकलचेतनाचेतनपदार्थैः, ॥ २९ ॥ अथ स्वरसं रसामीति रचयति—

अर्थ—यह परभावके त्यागके दृष्टांतकी दृष्टि है सो " पुरानी न पडे ऐसैं जैसैं होय तैसैं " अत्यंत वेगतैं जेतैं प्रवृत्तिकूं नाहीं प्राप्त होय ता पहलैंही तत्काल सकल अन्यभावनिकरि रहित आपही यह अनूभूति तौ प्रगट होती भई । भावार्थ—यह परभावका त्यागका दृष्टांत कह्या, तापरि दृष्टि पडै ते पहलै समस्त अन्यभावनितैं रहित अपना स्वरूपका अनुभवन तौ तत्काल होय गया, जातैं यह प्रसिद्ध है—जो, वस्तूकूं परकी जानैं पीछैं ममत्व रहै नाहीं ॥ आगैं या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुभूति तैं परभावका भेदज्ञान कौन प्रकार भया ऐसी आशंकाकरि प्रथम तौ भावक मोह कर्मका उदयरूप भाव ताका भेद बिज्ञानका प्रकार कहै हैं–

विशेष–अन्यभावका दृष्टांत यह है– कोई पुरुष धोबीसे अन्यका वस्त्र लाकर और भ्रमसे उसे अपना मान ओढकर सो रहा था और उसे जरा भी इसबातका ज्ञान न था कि यह किसी दूसरेका है, इतने ही में जिसका वह वस्त्र था वह पुरुष आया और वस्त्रका पल्लड खींचकर और सोते हुये पुरुषको जगाकर इसप्रकार कहने लगा–जल्दी उठो इसवस्त्रको मुझे दो यह वस्त्र मेरा है, बदल गया है। तो जिसप्रकार वह सोता हुआ मनुष्य उसके बार बार उठो उठो ये वचन सुनकर और समस्त चिह्नोंसे भले प्रकार परीक्षापूर्वक जानकर कि यह वस्त्र दूसरेका है तत्काल छोड देता है उसीप्रकार यह आत्मा भी परपदार्थोंको अपना मानकर अज्ञानी है मोहकी नींदमें सो रहा है जब श्रीगुरु मोहभावका विवेक कराकर इसे परपदार्थोंसे रहित एकाकी बताते हैं और यह उपदेश देते हैं कि जल्दी प्रतिबुद्ध हो, यह आत्मा परभावोंसे रहित एक है तब वह 'आत्मा एक है' 'आत्मा एक है' ये शब्द बार बार सुनकर और परीक्षापूर्वक परपदार्थोंको निश्चय कर पूर्ण ज्ञानवान हो पर पदार्थोंको छोड देता है ॥ २६ ॥

सर्वतः स्वरसनिर्भरभावं चेतये स्वयमहं स्वमिहैकम् ।
नास्ति नास्ति मम कश्चन मोहः शुद्धचिद्घनमहोनिधिरस्मि ॥ ३० ॥

सं० टी०—इह—जगति, अहं—आत्मा, स्वयं—आत्मना, स्वं—आत्मानं चेतये—अनुभवामि, उपलभे जानामीत्यर्थः। किंभूतमात्मानं ? सर्वतः–सामस्त्येन, स्वेत्यादिः—स्वस्य–आत्मनः, रसः–रुचिः–अनुभवनमिति यावत्, तेन निर्भरो भावः स्वभावो यस्य तं, मम–आत्मनः कश्चन–कोऽपि, शरीरादौ मोहः–ममत्वं नास्ति नास्ति–पुनः पुनर्न विद्यते, अस्मि–भवाम्यहं, कीदृक्षः ? शुद्धेत्यादि शुद्धा निर्मला कर्मकलंकराहित्यात् सा चासौ चित् चेतना तस्याः घनो–निविडः स चासौ, महोदधिः महासमुद्रश्च, घनरसानामिव निःशेषगुणानामाधारत्वात् ॥ ३० ॥ अथात्मपरद्रव्ययोर्विवेकं तंतन्यते—

अर्थ–मैं इसलोकमें आपहीकरि अपने एक आत्मस्वरूपकूं अनुभवूं हूँ। कैसा है मेरा स्वरूप सर्वतः कहिये सर्वांगकरि अपने निजरस जो चैतन्यका परिणमन, ताकरि पूर्ण भया ऐसा है भाव जामैं, याहीतैं यह मोह है सो मेरा किछू भी लागता नाहीं है। याके अर मेरे किछू भी नाता नाही है। मैं तो शुद्ध चैतन्यका 'घन' कहिये समूहरूप तेजः पुंजका निधि हूँ। भावकभावका भेदकरि ऐसे अनुभवन करे ॥ ३० ॥

इति सति सह सर्वैरन्यभावैर्विवेके स्वयमयमुपयोगो बिभ्रदात्मानमेकम् ।
प्रकटितपरमार्थैर्दर्शनज्ञानवृत्तैः कृतपरिणतिरात्मारामं एव प्रवृत्तः ॥३१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नोभौ परिणमतः खलु परिणामो नोभयोः प्रजायेत।
उभयोर्न परिणतिः स्याद्यदनेकमनेकमेव सदा ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—उभौ-जीवपुद्गलौ, खलु इति निश्चितं, परिणमतः-परिणामं गच्छतः न-नहि, एक एव हि परिणमति यथा कुलालः घटनिष्पादनाभिमानपरिणामं प्रति परिणमति न तु घटभवनक्रियायां, तथा जीवः कर्मनिष्पादनाभिमानपरिणामं प्रति परिणमति, न पुद्गलद्रव्यनिष्पादितकर्मक्रियां प्रति, उभयोः जीवपुद्गलयोः परिणामः,-परिणतिः न जायते-नोत्पद्यते, परस्परं भिन्नस्वभावत्वात्, उभयोः-परात्मनोः, परिणतिः-परिणमनलक्षणा क्रिया न स्यात्-न भवेत्, परस्परं स्वस्वभावे भिन्नपरिणतिसद्भावात्, यतः-यस्मात कारणात्, अनेकं-न एकं अनेकं जीवपुद्गलौ सदा-नित्यं, अनेकमेव भिन्नमेव ।८॥

अर्थ-दोय द्रव्य हैं सो एक होय परिणमैं नाहीं हैं,बहुरि दोय द्रव्यका एक परिणाम नाहीं होय है बहुरि दोय द्रव्यकी परिणतिक्रिया एक नाहीं होय है जातें जो अनेक द्रव्य है सो अनेक ही है, पलटिकरि एक नाही होय है ।

भावार्थ-दोय वस्तू हैं ते सर्वथा भिन्नही हैं प्रदेशभेदरूपही है, दोऊ एक होय परिणमै नाहीं, एक परिणामकूं उपजावै नाहीं, क्रिया एक होय नाहीं । ऐसा नियम है । जो दोय द्रव्य एक होय परिणमै तौ सर्व द्रव्यनिका लोप हो जाय । फेरि इसही अर्थकूं दृढ करै हैं-

नैकस्य हि कर्तारौ द्वौ स्तो द्वे कर्मणी न चैकस्य ।
नैकस्य च क्रिये द्वे एकमनेकं यतो न स्यात् ॥ ९ ॥

सं० टी०—एकस्य-परिणामस्य चेतनालक्षणस्य कर्मलक्षणस्य वा हीति निश्चितं द्वौ-जीवपुद्गलौ, कर्तारौ-कारकौ, न स्तः-न भवतः, चेतनाया जीव एव कर्ता, कर्मणः पुद्गल एव कर्ता, चेति भिन्नप्रक्रमे । एकस्य जीवस्य पुद्गलस्य वा द्वे कर्मणी चेतनाकर्मलक्षणे न स्तः, च-पुनः, एकस्य कर्तुः-जीवस्य पुद्गलस्य वा द्वे क्रिये-परिणती द्वे, न स्तः, जीवस्य चेतनाक्रियां प्रति परिणतत्वात्, पुद्गलस्य कर्मक्रियां प्रति परिणतत्वात् । यथा कुलालः स्वपरिणतिक्रियां प्रति परिणतः, मृद्द्रव्यं तु कलशक्रियां प्रति परिणतं, अन्यत् मृद्द्रव्यं वस्त्रक्रियां प्रति हेतुर्न स्यात्, यतः-पूर्वोक्तकारणात्, एकं-अखंडं द्रव्यं जीवादि अनेकं-परपरिणामकर्तृक्रियाभावात् अनेकरूपं, न स्यात्-न भवेत्, अथवा-एकं-जीवादि, अनेकं स्वकर्तृकर्मक्रियारूपं यतः कुतो न भवेत्, अपि तु भवेदेव ॥ ९ ॥ अथाज्ञानमाहात्म्यविशं निरूपयति—

अर्थ-एकद्रव्यका दोय कर्ता न होय, बहुरि एक द्रव्यका दोय कर्म न होय, बहुरि एक द्रव्यकी दोय क्रिया न होय । जातैं एकद्रव्य है सो अनेक द्रव्य होय नाही ॥ भावार्थ-यह निश्चयनयकरि नियम है सो शुद्धद्रव्यार्थिकनयकरि कह्या जानना ।९। अब कहे हैं,जो आत्माकै अनादितै परद्रव्यका कर्ताकर्मपणाका अज्ञान है सो जो यह परमार्थनयका ग्रहणकरि एकवार भी विलय होय तौ फैरि न आवै ॥

विशेष-इन चार श्लोकोंमें जो संस्कृत टीकाकारने कुलालका दृष्टांत देकरि आत्माके स्वरूपको समझाया है वह अति उत्तम है टीकाकारकी लेखन शैली सरल है इसलिये कुलाल दृष्टांतका भाव हमने नहिं लिखा ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आसंसारत एव धावति परं कुर्वेऽहमित्युच्चकै-
दुर्वारं ननु मोहिनामिह महाहंकाररूपं तमः।
तद् भूतार्थपरिग्रहेण विलयं यद्येकवारं व्रजेत्
तत् किं ज्ञानघनस्य बंधनमहो भूयो भवेदात्मनः ॥ १० ॥

सं० टी०—ननु इति वितर्के, इह–जगति, इति–अमुना प्रकारेण धावति–अत्यर्थं प्रसर्पति व्याप्नोतीति यावत्। किं ? महाहंकाररूपं—महान्–सकलप्राण्यतिशायी स चासौ अहंकारश्च मयेदं कृतमित्यादिरूपो गर्वः, स एव रूपं स्वरूपं यस्य तत्, तमः अज्ञानं, केषां ? मोहिनां–मोहग्राहग्रस्तानां देहिनां, किंभूतं ? उच्चकैः–अत्यर्थं, दुर्वारं—वारयितुमशक्यं, कियत्पर्यंतं धावति ? आसंसारत एव—यावत्पर्यंतं पंचपरिवर्तनरूपसंसारस्तावत्पर्यंतं प्रसर्पत्येव। इति किं ? कुर्वे–निष्पादयामि करिष्ये वा ' वर्तमानसामीप्ये वर्तमानवदिति ' सूत्राद्भविष्यदर्थे वर्तमानात्, अहं—कर्तृभूतः, किं ? परं–परद्रव्यं गृहपुत्रविवाहशरीरकर्मादिरूपं। यदि–यदा, व्रजेत्—गच्छेत्, विलयं–विनाशं तत् तमः–कर्तृ, एकवारं–सकृद्वारं, केन ? भूतेत्यादि–शुद्धद्रव्यार्थिकनयेन, तत्—तर्हि, किं ? तावत् किं स्यात्, अपि तु न स्यादित्यर्थः, भूयः पुनः, अहो, किं ? बंधनं-कर्माश्लेषणं, कस्य आत्मनः-चिद्रूपस्य किंभूतस्य ? ज्ञानघनस्य—बोधनिरतस्य ॥ १० ॥ अथात्मपरभावं बाभज्यते—

अर्थ—इस जगतविषैं मोही अज्ञानी जीवनिका यह मैं परद्रव्यकूं करौ हों ऐसा परद्रव्यका कर्तृत्वका अहंकाररूप अज्ञानांधकार अनादि संसारतै लगाय चल्या आवै है। कैसा है ? अतिशयकरि दुर्वार है निवारचा न जाय है। सो आचार्य कहै हैं-जो, शुद्धद्रव्यार्थिक अभेदनय परमार्थ है सत्यार्थ है,ताका ग्रहणकरिकै जो एकवार भी नाश हो जाय तौ यह जीव ज्ञानघन है सो यथार्थज्ञान भये पीछै कहा ज्ञान जाता रहै ? नाहीं जाय, अर ज्ञान न जाय, तब कहां फेरि अज्ञानतै बंध होय ? कदाचित् नाहीं होय ॥ भावार्थ—इहां तात्पर्य ऐसा, जो अज्ञान तौ अनादिकाही है, परन्तु दर्शनमोहका नाशकरि एकवार यथार्थज्ञान होयकरि क्षायिक सम्यक्त्व उपजै तौ फेरि मिथ्यात्व नाहीं आवै तब मिथ्यात्वका बंध न होय अर मिथ्यात्व गये पीछैं संसारका बंधन काहेकूं रहै ? मोक्ष ही पावै ऐसा जानना ॥ फेरि विशेषकरि कहै हैं—

आत्मभावान् करोत्यात्मा परभावान् सदा परः।
आत्मैव ह्यात्मनो भावाः परस्य पर एव ते ॥११॥

सं० टी०—आत्मा-चेतनः, करोति-विदधाति वेदयते वा, कान् ? आत्मभावान् मतिश्रुतावधिप्रमुखविभावपर्यायान्, केवलज्ञानदर्शनसुखवीर्यरूपशुद्धपर्यायांश्च, परः पुद्गलपदार्थः, परभावान् ज्ञानादन्यान् स्वभावविभावपर्यायान्,करोतीति संबंधः। कुतः ? हीति यतः, आत्मनो भावा पर्याया; आत्मैव द्रव्यादेशात् पर्यायाणामात्मस्वभावत्वात्, अत एव न ते परपर्यायाः। परस्य-पुद्गलस्य ते भावाः पर एव पुद्गल एव ततोऽव्यतिरिक्तत्वात्, इति ये स्वभावास्ते तदीयाः, न परकीया इति विभागः स्फुटः ॥ ११ ॥ अथ ज्ञानरागयोर्युगपन्नुदर्शयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—आत्मा है सो तौ अपने भावनिकूं करै है बहुरि परद्रव्य है सो परके भावनिकूं करै है। जातै अपने भाव हैं ते तौ आपही हैं, परभाव ते परही हैं यह नियम है ॥

अज्ञानतस्तु सतृणाभ्यवहारकारी ज्ञानं स्वयं किल भवन्नपि रज्यते यः ।
पीत्वा दधीक्षुमधुराम्लरसातिगृद्ध्या गां दोग्धि दुग्धमिव नूनमसौ रसालां १२

सं॰ टी॰—तु—पुनः यः—आजन्माभ्यस्तसुतत्त्वशास्त्रः पुमान्, रज्यते—बाह्यलाभादिकारणकलापाद्रागं गच्छति, कुतः ? अज्ञानतः—भेदविज्ञानविलक्षणबोधाद्धेतोः, किं कुर्वन् ? स्वयं स्वतः, ज्ञानं—शुद्धात्मज्ञानं, भवन्नपि—चिंतयन्नपि, अनुभवन्नपि वा, तान् भवन् वा, किल इत्यागमोक्तौ, स पुमान्, सेत्यादि—तृणेन सह वर्तमानः सतृणः, अभ्यवहार;—उत्तमाहारः पायसशर्कराज्यादिरूपः, सतृणश्चासावभ्यवहारश्च तं करोतीत्येवं शीलः स तथोक्तः तृणसहितोत्तमाहारभोजीत्यर्थः, यथा तृणादिकमनिष्टं पायसाहार इष्टः, तयोरेकत्रास्वादन कस्य चित्पुंसः शुभाशुभं, तथा रागस्य तृणस्थानीयत्वात् अशुभत्वं, ज्ञानानुभवस्य शुभाहारस्थानीयत्वात् शुभत्वं । नूनं—निश्चितं, असौ ज्ञानरागयोरेकत्वानुभावुकः पुमान् गां धेनुं दुग्धं—क्षीरं दोग्धीव प्ररूपयति यथा । कया ? दधीत्यादि दधि—दुग्धविकारमाम्लरसोपेतं, इक्षुः मधुररसोपेतः इक्षुदंडः, द्वंद्वः तयोः मधुराम्लरसस्तयोरतिगृद्धिः—अत्याशक्तिः, तया, किंकृत्वा ? पीत्वा—पानं कृत्वा, कां ? रसालां रसनाविषयासक्तजनाःवस्त्रगालितदधिशर्करां मृष्ट्वा कमपि रसांतरं प्राप्य रसालामिति भणंति शिखरिणीति देशभाषायां, यथा कश्चित् रसालामास्वाद्य तद्भेदमजानन् गोदोहनक्रियायां मधुराम्लरसातिगृद्ध्या प्रवर्तते तथा परात्मभेदमजानन् क्रोधादौ कर्तृत्वेन प्रवर्तत इति तात्पर्यं ॥ १२ ॥ अथाज्ञानविलासं विजृंभते—

अर्थ—जो पुरुष आप निश्चयतै ज्ञानस्वरूप होता संता भी अज्ञानतै तृणसहित अन्नादिक सुन्दर आहारकूं मिल्या हुवा खानेवाला हस्ती आदि तिर्यंचकीज्यौं होय प्रसन्न होय है, सो कहा करै है, ताका दृष्टांत कहे हैं जैसे कोई रसाला कहिये शिखरिणीकूं पीयकरि तिसके दही-मीठेका मिल्या हुवा खाटा मीठा रस, तिसका अति चाहिकरि तिसका रसभेदकूं न जानिकरि, दूधके अर्थि गऊकूं दोहै । भावार्थ—कोई पुरुष शिखरिणी पीयकरि ताके स्वादकी अतिचाहितै रसका ज्ञानविना ऐसा जान्या-जो, यह गऊका दूधमें स्वाद है । सो गऊकूं अतिलुब्ध होयकरि दोहै तैसे अज्ञानी पुरुष आपापरका भेद न जानि विषयनिमैं स्वाद जानि पुद्गलकर्मकूं अतिलुब्ध होय ग्रहण करे है, अपना ज्ञानका अर पुद्गलकर्मका स्वाद जानि भिन्न नाहीं अनुभवै है । तिर्यंचकीज्यौं अन्नकूं घासमें मिल्या एक स्वाद लेहै ॥ १२॥ फेरि कहे हैं, जो, ऐसे अज्ञानतै पुद्गलकर्म का कर्ता होय है ॥

अज्ञानान्मृगतृष्णिकां जलधिया धावंति पातुं मृगा
अज्ञानात्तमसि द्रवंति भुजगाध्यासेन रज्जौ जनाः ।
अज्ञानाच्च विकल्पचक्रकरणाद्वातोत्तरंगाब्धिवत्
शुद्धज्ञानमया अपि स्वयममी कर्त्रीभवंत्याकुलाः ॥१३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—अमी एते लोकाः, स्वयं–स्वत एव, कर्त्रीभवंति–मया कर्म कृतमिति कर्मणां कर्तारो भवंति, कीदृशा अपि ? शुद्धज्ञानमया अपि–निर्मलभेदबोधप्राचुर्याः, अभेदज्ञानिनः, कथं कर्मकर्तारो न स्युरित्यपिशब्दार्थः, आकुलाः संतः, कुतः ? अज्ञानात् भेदज्ञानाभावात् । पुनः ? विकल्पेत्यादिः–विकल्पानां चक्रं–समूहः, तस्य करणाच्च कृताच्च हेतोः, अत्रैवार्थांतरन्यासमाह वातोदित्यादिः वातेन–वायुना, उत्तरंगः–उर्ध्वोर्मिमयः, स चासावब्धिश्च तद्वत् यथोत्तरंगरहितोऽब्धिर्वातेनोत्तरंगीयते तथा शुद्धज्ञानोपि अज्ञानात्कर्ता भवतीत्यर्थः । लौकिकनिदर्शनेनाज्ञानस्य माहात्म्यमाह—मृगाः–हरिणाः, धावंति—प्रसर्पंति, किमर्थं ? पातुं पानार्थं, कां ? मृगतृष्णिकां–मरीचिकां, कया ? जलधिया–पानीयाभावेऽपि पानीयबुद्ध्या, अज्ञानात्–ज्ञानाभावमाश्रित्य, ज्ञानिनश्चेत्तर्हि तत्र कथं धावंति ? तथा ऽज्ञानिनो भोगसुखे शरीरादौ च सुखधिया—ममत्वधिया च वर्तंते इति भावार्थः । पुनः—द्रवंति—पलायनं कुर्वंति, क ? तमसि—तिमिस्रे, के ? जनाः–पुरुषाः, केन ? रज्जौ—वराटके 'शुल्वो वराटकः स्त्री तु रज्जुः स्त्रीषु वटी गुणः' इत्यमरः । भुजगाध्यासेन भुजगोयमित्यारोपबुद्ध्या कुतः ? अज्ञानात्–अज्ञानमाश्रित्य यथा रज्जौ भुजग इति कृत्वा वर्तंते तथा स्वे परकीयं' परशरीरादौ स्वमिति कृत्वा वर्तंते अज्ञानिनः ।। १३ ।। अथ ज्ञानविलासमाविष्करोति–

अर्थ–ए लोकके जन हैं ते निश्चयकरि शुद्ध एक ज्ञानमयी हैं, तौऊ आप अज्ञानतैं व्याकुल होय परद्रव्यका कर्तारूप होय हैं ।। जैसैं पवनकरि कल्लोलनिसहित समुद्र होय है, तैसैं विकल्पनिके समूह करै हैं यातैं कर्ता बनै हैं । देखो-अज्ञानहीतैं मृग हैं, ते भाडलीकूं जल जानि पीवनेकूं दौडै हैं, बहुरि अज्ञानहीतैं लोक अन्धकारमें जेवडेविषैं सर्पका निश्चय करि भयकरि भागै हैं ।। भावार्थ–अज्ञानतैं कहा कहा न होय ? मृग तौ भाडलीकूं जल जानि पीवनैंकूं दौडि खेदखिन्न होय हैं । लोक अंधारेमें जेवडेकूं सर्प मानि डरिकरि भागै हैं ।। ऐसैंही यह आत्मा, जैसैं वातकरि समुद्र क्षोभरूप होय तैसैं अज्ञानकरि अनेकविकल्पनितैं क्षोभरूप होय है । सो परमार्थतैं शुद्धज्ञानघन है, तौऊ अज्ञानतैं कर्ता होय है ।।१३।। फेरि कहै हैं ज्ञानतैं कर्ता न होय है–

ज्ञानाद्विवेचकतया तु परात्मनोर्यो जानाति हंस इव वाःपयसोर्विशेषं ।
चैतन्यधातुमचलं स सदाधिरूढो जानीत एव हि करोति न किंचनापि

सं० टी०—तु–पुनः, अज्ञानविजृंभणविकचानंतरं, जानाति–वेत्ति, कं ? विशेषं–भेदं, कयोः ? परात्मनोः–पुद्गलकर्मजीवयोः ज्ञानात्–भेदबोधमाश्रित्य, कया ? विवेचकतया–ज्ञानात्मनोर्भेदकस्वरूपतया, इममर्थं निर्दर्शयति-हंस इव–यथा मरालः वाःपयसोः–नीरक्षीरयोः, भेदं वेत्ति तथा ज्ञानी पुद्गलजीवयोः, स पुमान् जानीत एव वेत्त्येव, कं ? चैतन्यधातुं–चेतनास्वरूपधातुं आत्मानं वेत्यर्थः, किंभूतं ? अचलं–स्वस्वभावान्न चलतीत्यचलं, सदा–नित्यं, अधिरूढः सन्–गुणसमूहमाश्रितः सन् हीति निश्चितं किंचनापि–किमपि, न करोति–कर्तृकर्मक्रियां न विदधाति ।। १४ ।। अथ ज्ञानादेव भेदमुज्जृम्भते—

अर्थ–जो पुरुष ज्ञानतैं बहुरि विवेकी भेदज्ञानीपणातैं परका अर आत्माका विशेष भेद करि जानै है "जैसैं हंस, दूधजल मिले हुये हैं, तौऊ तिनिका भेदकरि ग्रहण करै है तैसैं" सो पुरुष चैतन्यधातु अचलकूं सदा आश्रय करता संता जानै ही है–ज्ञानाही है, किछूभी नाहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्ता है। भावार्थ-आपापरका भेद जानै सो ज्ञाताही है, कर्ता नहीं है ॥ आगैं कहै हैं, जो, जानिये है सो ज्ञानहीतैं जानिये हैं-

ज्ञानादेव ज्वलनपयसोरौष्ण्यशैत्यव्यवस्था
ज्ञानादेवोल्लसति लवणस्वादभेदव्युदासः ।
ज्ञानादेव स्वरसविकसन्नित्यचैतन्यधातोः
क्रोधादेश्च प्रभवति भिदा भिंदती कर्तृभावं ॥ १५ ॥

सं० टी०—प्रभवति-जायते, भिदा-भेदः, कस्य स्वेत्यादिःस्वस्य आत्मनः, रसः-अनुभवः, तेन विक-सन्-विकासं गच्छन् स चासौ नित्यः शाश्वतः, चैतन्यधातुश्च-चेतनालक्षणो धातुस्तस्य, क्रोधादेश्च कोप-मान-माया-लोभ-मोह-राग-द्वेष-कर्म-नोकर्म-मनो-वचन-काय-श्रोत्र-चक्षुर्घ्राण-रसन-स्पर्शनादेश्च परस्परं, कुतः ? ज्ञानादेव-शुद्धात्मपरिज्ञानात्, नान्यत एव । किंभूता भिदती-विदारयंती, कं ? कर्तृभावं-आत्मनः कर्मणां कर्तृत्वस्वभावं, लौकिकज्ञानादेव सर्वमिति प्रकाशयति-औष्ण्यशैत्यव्यवस्था-शीतोष्ण-योर्व्यवस्थितिः भवति कयोः ? ज्वलनपयसोः-वह्निनप्तनीरयोः, कुतः ? ज्ञानादेव-बोधादेव, यथा कश्चिल्लौ-किकव्यवहारज्ञः, एकत्रीभूतयोः पावकपयसोर्भेदं निश्चिनोति, अभेदज्ञस्तयोरभेदमेव तथा ज्ञानी एकत्रीभू-तयोः परात्मनोर्भेदं निश्चिनोति नाज्ञानी । तथा उल्लसति-उल्लासं गच्छति, कः ? लवणेत्यादिः लवणस्वा-दस्य-क्षारलवणस्य कटुकाम्लव्यंजनस्वादात् भेदः विशेषः, तस्य व्युदासः-ज्ञानं, कुतः ? ज्ञानादेव यथा कश्चिद्भोजनभेदज्ञो व्यंजनलवणयोर्भेदं व्यक्तं वेत्ति, अभेदज्ञः इदं क्षारस्वादं व्यंजनमेव तथा ज्ञानी क्रोधा-दिज्ञानयोरेकत्रीभूतयोः पृथक् स्वभावं परिच्छिनत्ति, अज्ञानी तु क्रोधमयमात्मैवेति वेत्ति इति तात्पर्यं । प्रतिवस्तूपमालंकारोयं यदाह वाग्भट्टः—

अनुपात्तविवादानां वस्तुनः प्रतिवस्तुना ।
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ॥

॥ १५ ॥ अथात्मनः स्वपरभावयोः कर्तृत्वं निवेद्यते—

अर्थ-अग्निकी अर जलकी उष्णपणाकी अर शीतपणाकी व्यवस्था है सो ज्ञानहीतैं जानिये है। बहुरि लवणका अर व्यंजनका स्वादका भेद है सो ज्ञानहीतैं जानिये है । बहुरि अपने रसकरि विकासरूप होता जो नित्य चैतन्यधातु, ताका अर क्रोधादिकभावका भेद है सोभी ज्ञानहीतैं जानिये है । कैसा है यह भेद ? कर्तापणाका भाव है ताकूं भेदरूप करता संता प्रगट होय है ॥ फेरि कहे हैं, जो, आत्मा कर्ता होय है, तौऊ अपनेही भावका है-

अज्ञानं ज्ञानमप्येवं कुर्वन्नात्मानमंजसा ।
स्यात्कर्तात्मात्मभावस्य परभावस्य न क्वचित् ॥ १६ ॥

सं० टी०—आत्मा-चिद्रूपः, आत्मभावस्य-स्वस्वरूपस्य, कर्ता स्यात्-भवेत् । किंकुर्वन् ? अंजसा-परमार्थतः आत्मानं-स्वस्वरूपं, ज्ञानं-बोधं, अपि-पुनः, एव-निश्चयेन, अज्ञानं बोधविपर्ययं, कुर्वन् निष्पा-दयन् किल क्रोधोहमित्यादिवत्, वा मोहोहमित्यादिवत्त परद्रव्याण्यात्मीकरोति, आत्मानमपि परद्रव्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करोत्येवमात्मा तदायमज्ञानकर्ता, कचित्-कदाचित्-परभावस्य-पुद्गलपर्यायस्य न कर्ता, स्यात् ॥ १६ ॥ अथात्मनो व्यवहारिणां कर्तृत्वमतिं व्युपदिशति—

अर्थ—ऐसैं अज्ञानरूपभी तथा ज्ञानरूपभी आत्माहीकूं करता संता आत्मा प्रगटपणैं अपनेही भावका कर्ता है परभावका कर्ता तौ कहूँही नाहीं है ॥

आत्मा ज्ञानं स्वयं ज्ञानं ज्ञानादन्यत्करोति किं ।
परभावस्य कर्तात्मा मोहोयं व्यवहारिणां ॥१७॥

सं० टी०—आत्मा-चिद्रूपः, ज्ञानं-बोधं, करोति स्वयं-ज्ञानमेवात्मा, आत्मज्ञानयोर्द्रव्यादेशादेकत्वात्, ज्ञानात्-बोधं विहाय अन्यत्-घटपटमकुटलकुटशकटादि किं करोति ? अपि तु न विदधात्येव। नन्वात्मनोऽकर्तृत्वे गृहमिदमात्मना कृतमित्यादि व्यवहारः कथमिति चेत् ? न, आत्मनः परभावस्याकर्तृत्वात्। आत्मा-जीवः, परभावस्य-परपर्यायस्य घटादेः कर्ता, व्यवहारिणां-व्यावहारिकपुरुषाणां, अयं-आत्मा कर्तेत्यादि-लक्षणः, मोहः-विभ्रमः। ये खलु पुद्गलद्रव्याणां परिणामाः-गोरसव्याप्तदधिदुग्धमधुराम्लवत् पुद्गलद्रव्य-व्याप्तत्वेन भवंतो ज्ञानावरणादीनि भवंति तानि तटस्थगोरसाध्यक्ष इव न नाम करोति ज्ञानी ॥ ७॥ अथ साक्षेपं जीवस्य पुद्गलकर्तृत्वं प्रतिबध्नाति—

अर्थ—आत्मा ज्ञानस्वरूप है, सो आप ज्ञानही है, ज्ञानतैं अन्यकूं कौनकूं करै ? काहूकूं न करै ॥ बहुरि परभावका कर्ता आत्मा है यह मानना तथा कहना है सो व्यवहारी जीवनिका मोह है—अज्ञान है ॥

जीवः करोति यदि पुद्गलकर्म नैव कस्तर्हि तत्कुरुत इत्यभिशंकयैव ।
एतर्हि तीव्ररयमोहनिवर्हणाय संकीर्त्यते शृणुत पुद्गलकर्मकर्तृ ॥१८॥

सं० टी०—यदि-ननु, जैनं प्रत्याक्षिपति कश्चित्-जीवः—आत्मा, पुद्गलकर्म-पुद्गलमयज्ञानावरणादि कर्म, नैव करोति-न निर्मापयति तर्हि तत् पुद्गलकर्म कः कर्ता कुरुते ? पुद्गलानां स्वयमचेतनत्वात्कर्तृत्वानुपपत्तेः, अतएव आत्मैव कर्ता लक्ष्यते दक्षैः, इति अमुना प्रकारेण अभिशंकया पूर्वपक्षाशंकया, एव-निश्चयेन एतर्हि-इदानीं, संकीर्त्यते-निरूप्यते। किमर्थं ? तीव्रेत्यादि-तीव्ररयः-तीव्रतीव्रतरानुभागः स चासौ मोहश्च विभ्रमः, तस्य निवर्हणं-विनाशनं, तस्मै शृणुत-आकर्णयत, पुद्गलकर्म-पुद्गलात्मकं कर्म, द्रव्यभाव-रूपं कर्तृ-पुद्गलपर्यायाणां कर्तृ-निष्पादकं, आत्मा तु नैमित्तिको हेतुरस्तु आत्मना कृतमिति तु व्यवहारः राज्ञा देशे गुणदोषौ कृतावित्यादिवत् योधैर्युद्धे कृते राज्ञा कृतमित्यादिवद्वा ॥ १८ ॥ अथ पुद्गलपरिणामित्वं पूर्वपक्षक्षेपेण साक्षेपमाक्षिपति—

अर्थ—जो जीव पुद्गलकर्मकूं नाहीं करै है, तौ तिस पुद्गलकर्मकूं कौन करै है ? ऐसी आशंका करिकैं अर इस कर्ताकर्मका तीव्रवेगरूप मोह अज्ञानके दूरि करनेकूं, पुद्गलकर्मका जो कर्ता है सो कहीये है। सो हे ज्ञानके इच्छुक पुरुष हौ ! तुम सुणु ॥ १८ ॥

स्थितेत्यविघ्ना खलु पुद्गलस्य स्वभावभूता परिणामशक्तिः ।
तस्यां स्थितायां स करोति भावं यमात्मनस्तस्य स एव कर्ता ॥१६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—खलु–इति वितर्के इति–पूर्वपक्षप्रकारेण, ननु पुद्गलद्रव्यं स्वयमबद्धं सज्जीवे कर्मभावेन न परिणमते तस्य सर्वथैकस्वभावत्वात् इति चेन्न, अपरिणामिनो नित्यस्यार्थक्रियाकारित्वविरोधात्। अर्थं क्रिया च क्रमयौगपद्याभ्यां व्याप्ता ते च नित्यान्निवर्तमाने स्वव्याप्यामर्थक्रियामादायापि निवर्तेते, सापि स्वव्याप्यं सत्वमादाय निवर्तते जीवस्याबंधे च संसाराभावात्, इति युक्त्या सांख्यादिना कूटस्थनित्यवादिना विघ्नं स्तुं न शक्यते वस्तुस्वभावस्य निषेद्धुमशक्यत्वात् ज्वलनौष्ण्यवत्। नन्वात्मा पुद्गलद्रव्यं कर्मत्वेन परिणमयति ततो न संसाराभावः, इति चेत् तर्ह्यात्मा स्वयमपरिणममानं परिणममानं वा तत्परिणमयेत् ? न तावत्प्राक्तनः पक्षः कक्षीकर्तव्यः प्रेक्षादक्षैः, अपरिणममानस्य तस्य परेण परिणमयितुमशक्यत्वात्, नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते। अथोत्तरः पक्षः, तदा तस्य स्वयमेव परिणमनात् परापेक्षणायोगाच्च। तस्यां परिणामशक्तौ, स्थितायां–व्यवस्थितायां, सोयं–पुद्गलः, आत्मनः–स्वरूपस्य, भावं–परिणामं, करोति–निष्पादयति, तस्य–भावस्य, स एव पुद्गल एव कर्ता–कारकः, नान्यः ॥ १९ ॥ अथ सांख्यवादिनं प्रति जीवस्य नित्यत्वं निरस्यति—

अर्थ-ऐसैं उक्तप्रकारकरि पुद्गलद्रव्यकै परिणामशक्ति स्वभावभूत निर्विघ्नसिद्ध भई ठहरीं ताकूं ठहरते संते सो पुद्गलद्रव्य जिस भावकूं आपकै करै है, ताका सो पुद्गलद्रव्य ही कर्ता है॥ भावार्थ-सर्वद्रव्यनिकै परिणामस्वभावपणा सिद्ध है तातैं जाका भावका जोही कर्ता है। सो पुद्गलद्रव्य भी जिस भावकूं आपकै करै है, ताका सोही कर्ता है॥

स्थितेति जीवस्य निरंतराया स्वभावभूता परिणामशक्तिः।
तस्यां स्थितायां स करोति भावं यं स्वस्य तस्यैव भवेत्स कर्ता २०

सं० टी०—नन्वपरिणामी जीवस्तदा कूटस्थत्वादकारकः स्यात् यदि सोस्त्वकारको विक्रियश्चेति चेन्न, प्रमाणादीनामकर्तृकत्वात्तत्फलाभावप्रसंगात्, न ह्यकारकः कश्चित् प्रमाता, प्रमातृत्वाभावादात्मनोऽप्यभावः, गुणाभावे हि गुणिनोप्यभावात्। ननु स्वयमबद्धः सन् क्रोधादिभावेन न परिणमते, इति कश्चित्सांख्यः, सोऽपि न विपश्चिद्दक्षः, तदपरिणामित्वे संसाराभावप्रसंगात्। यदि कोधादिसंयोगभावेन परिणमत्यसौ जपाजातरक्तसंयुक्तस्फटिकवदिति न संसाराभावः, इति चेत्तर्हि क्रोधादिः स्वयमपरिणममानं परिणममानं वा परिणामयेत् ? न तावदाद्यः पक्षो लक्ष्यो विपक्षैः, स्वयमपरिणममानस्य परैः कारणांतरसहस्रैर्वज्रावगाढस्यपरिणमयितुमशक्यत्वात्। अथोत्तरस्तर्हि सिद्धं नः समीहितं, इत्युक्तयुक्त्या जीवस्य–आत्मनः, या परिणामशक्तिः–ज्ञानावरणादिपरिणमनसामर्थ्यं सा स्थिता, किंभूता ? निरंतरा–विघ्नवर्जिता, पुनः कीदृक्षा ? स्वभावभूता पारमार्थिकी परानपेक्षत्वात्। तथा चोक्तमष्टसहस्र्यां "कारणस्य कार्यात्मनो भवतः क्षेपायोगात् स्वभावांतरानपेक्षणात्" इति, तस्यां–स्वभावभूतायां परिणामशक्तौ स्थितायां सत्यां, सः–जीवः, यं–ज्ञानादि लक्षणं स्वस्य आत्मनः भावं–स्वभावं करोति स्रजति स जीवः तस्यैव ज्ञानादिलक्षणस्य भावस्य न पुनरन्यस्य कर्ता–कारकः, भवेत्–स्यात् ॥ २० ॥ अथ ज्ञानाज्ञानयोर्ज्ञानाज्ञानत्वं कुतः ? इति पद्यद्वयेनाभिलपति—

अर्थ-जीवकै अपने स्वभावहीतैं भई ऐसी परिणामशक्ति है सो पूर्वोक्तप्रकार निर्विघ्न ठहरी ताकूं ठहरते संते सो जीव जिस भावकूं आपकै करै, ताहीका सो कर्ता होय है। भावार्थ-जीवभी परिणामी है, सो आप जिसभावरूप परिणमै ताका कर्ता हाय है।

ज्ञानमय एव भावः कुतो भवेत् ज्ञानिनो न पुनरन्यः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अज्ञानमयः सर्वः कुतोऽयमज्ञानिनो नान्यः ॥२१॥

सं० टी०—ज्ञानिनः पुंसः, ज्ञानमय एव-बोधनिर्वृत्त एव,-कुतः-कस्माद्धेतोः ? भवेत्-स्यात्, पुनः अन्यो भावः कुतो न स्यात् । अज्ञानिनः-ज्ञानत्यक्तस्य तु अयं प्रसिद्धो ममत्वादिलक्षणः सर्वः-समस्तः, अज्ञानमयः-अज्ञाननिर्वृत्तो भावः कुतो हेतोर्भवेत्, न पुनरन्यः-ज्ञानादिलक्षणः ॥ २१ ॥

अर्थ-इहां प्रश्नवचन है-जो ज्ञानीकै तौ ज्ञानमयही भाव होय है अर अन्य नाहीं होय है, सो यह तौ काहेतैं है ? बहुरि अज्ञानीकै अज्ञानमय ही सर्वभाव होय है अर अन्य नाहीं होय है, सो यह काहेतैं होय है ?

ज्ञानिनो ज्ञाननिर्वृत्ताः सर्वे भावा भवंति हि ।
सर्वेऽप्यज्ञाननिर्वृत्ता भवंत्यज्ञानिनस्तु ते ॥ २२ ॥

सं० टी०-हीति-यस्मात् कारणात् ज्ञानिनः-पुंसः, सर्वे-निखिलाः, भावाः-परिणामाः, ज्ञाननिर्वृत्ताः ज्ञाननिष्पन्नाः, भवंति-जायंते, ज्ञानाद् ज्ञाननिर्वृत्ता एव भावा, यथा जांबूनदजातितो जांबूनदपात्रकुंडलादयः । तु-पुनः, अज्ञानिनः पुंसः, ते प्रसिद्धाः अहंकारादयः, सर्वेऽपि—समस्ता अपि अज्ञाननिर्वृत्ता ये अज्ञानमया एव भवंति जायंते यथा कालायसमयाद्भावात् कालायसपात्रवलयादयः, ततोऽज्ञानतस्तु अज्ञाननिर्वृत्ता एव भावाः, तथा चोक्तं-

द्वैताद् द्वैतमद्वैतादद्वैतं खलु जायते । लोहाल्लोहमयं पात्रं हेम्नो हेममयं यथा ॥ इति

॥ २२ ॥ अज्ञानत एव कर्मणां बंधमिति प्रतिजानीते-

अर्थ-ज्ञानीकै सर्वही भाव हैं ते ज्ञानकरि निपजै हैं । बहुरि अज्ञानीकै जे सर्वही भाव हैं ते अज्ञानकरि निपजै हैं ॥

अज्ञानमयभावानामज्ञानी व्याप्य भूमिकां ।
द्रव्यकर्मनिमित्तानां भावानामेति हेतुतां ॥ २३ ॥

सं० टी०-अज्ञानी-ज्ञानच्युतः पुमान्, एति प्राप्नोति, कां ? हेतुतां-कारणतां, केषां द्रव्येत्यादि-द्रव्यकर्मणां ज्ञानावरणादीनां निमित्तानि-कारणानि तेषां भावानां पर्यायाणां-मिथ्यात्वाविरतिकषाययोग-प्रमादादि रूपाणां, किंकृत्वा ? व्याप्य-प्राप्य, कां ? भूमिकां स्थानं, केषां ? अज्ञानमयभावानां-मिथ्यात्वाविरतिकषाययोगलक्षणानां ॥ २३ ॥ अथानयपक्षपाते सुखमावेदयति—

अर्थ-अज्ञानी है सो अज्ञानमय अपने भाव, तिनिकी भूमिकाकूं व्याप्यकरि आगामी द्रव्यकर्मकूं कारण जे अज्ञानादिक भाव, तिनिका हेतुपणाकूं प्राप्त होय है ।

य एव मुक्त्वा नयपक्षपातं स्वरूपगुप्ता निवसंति नित्यं ।
विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृतं पिबंति ॥ २४ ॥

सं० टी०—य एव योगिनः,-निवसंति-तिष्ठंति; नित्यं-निरंतरं-आजन्मपर्यंतं, किंभूताः संतः ? स्वरूपगुप्ताः स्वरूपे-निजचिद्रूपे गुप्तिर्गोपनं येषां ते 'अभ्रादिभ्यः' इति जैनेंद्रसूत्रेणास्त्यर्थे अः, किंकृत्वा ?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्त्वा-हित्वा, कं ? नयपक्षपातं-नयानां-अपि कर्म बद्धमबद्धं चेत्यादिरूपाणां नयेषु वा पक्षपातः-ममत्वाभिनिवेशस्तं, त एव पुरुषाः, नयं मुक्त्वा पिबंति पानं कुर्वंति आस्वादयंतीत्यर्थः, साक्षात्-प्रत्यक्षं, किं ? अमृतं न म्रियते येन परात्मध्यानेन तदमृतं परमात्मध्यातुर्मुक्तिनिवासित्वेन मरणनिवर्हकत्वात्, किंभूताः सन्तः ? विकल्पेत्यादिः विकल्पानां जालं समूहः, तेन च्युतं रहितं, शांतं उपशमं प्राप्तं, चित्तं मानसं येषां ते ॥ २४ ॥ अथ बद्धमूढरक्तदुष्टकर्त्रितरादिनयविभागं जेगीयते—

अर्थ—जे पुरुष नयका पक्षपातकूं छोडि अपने स्वरूपविषैं गुप्त होय निरंतर वसे हैं, तेही पुरुष विकल्पके जालतैं रहित शांत भया है चित्त जिनिका ऐसे भये संते साक्षात् अमृतकूं पीवै हैं ॥ भावार्थ—जेतै कछू पक्षपात रहैं तेतैं चित्तका क्षोभ मिटे नाहीं, जब सर्वनयका पक्षपात मिटि जाय, तब वीतरागदशा होय स्वरूपकी श्रद्धा निर्विकल्प होय अर स्वरूपविषे प्रवृत्ति होय है॥ २४ ॥ अब नयपक्षकूं प्रगटकरि कहै हैं, अर तिसकूं छोडे है सो तत्त्वज्ञानी है स्वरूपकूं पावै है' ऐसा अर्थके कलशरूप वीस काव्य कहै हैं—

एकस्य बद्धो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥२५॥

सं० टी०—एकस्य—व्यावहारिकनयस्य पर्यायार्थिकसंज्ञकस्य नयस्याभिप्रायेणात्मा बद्धः—कर्मभिर्निबद्धः, तथा तेनैव प्रकारेण, परस्य निश्चयनयस्य द्रव्यार्थिकसंज्ञकस्य नयस्याभिप्रायेणात्मा न बद्धः कर्मभिः, इति अमुना प्रकारेण, चिति चिद्रूपे, द्वयोः उभयोर्नययोः द्रव्यपर्यायार्थिकयोः, द्वौ उभौ, पक्षपातौ अभिनिवेशौ स्तः, यः कश्चित्, तत्त्ववेदी परमार्थवेत्ता सन्, च्युतपक्षपातः बद्धेतरयोर्नययोः पक्षपातरहितः भवतीत्याध्याहार्यं, तस्य तत्त्ववेदिनः, खलु इति नियमेन, नित्यं निरंतरं, चित् चैतन्यं, चिदेव ज्ञानस्वरूपमेव, अस्ति—भवति, साक्षात्केवलज्ञानी भवतीति यावत् ॥ २५ ॥

अर्थ—यहू चिन्मात्र जीव है सो एक नयका तौ कर्मकरि बंध्या है ऐसा पक्ष है । बहुरि दूसरे नयका कर्मकरि नाहीं बंध्या है । ऐसे दोऊही नयके दोऊ पक्ष हैं । सो ऐसे दोऊ नयका जाकै पक्षपात है सो तौ तत्त्ववेदी नाहीं है । बहुरि जो तत्त्वका स्वरूप जाननेवाला है, सो पक्षपातरहित है । तिस पुरुषका जो चिन्मात्र आत्मा है सो चिन्मात्र ही है । यामैं पक्षपातकरि कल्पना नाही करे है ॥ भावार्थ—इहां शुद्धनयकूं प्रधानकरि कथन है । तहां जीवनामा पदार्थकूं शुद्ध नित्य अभेद चैतन्यमात्र स्थापित कर कहे हैं, जो इस शुद्ध नयका भी जो पक्षपात करेगा, सो भी तिस स्वरूपका स्वादकूं नाही पावेगा । अशुद्धपक्षकूं तौ गौणकरि कहतेही आवै हैं । अर कोई शुद्धनयका भी जो पक्षपात करेगा, तौ पक्षका राग न मिटेगा । तब वीतरागता नाहीं होयगी । तातै पक्षपातकूं छोडि चिन्मात्रस्वरूपविषे लीन भये समयसार पावै है । अर चैतन्यके परिणाम परनिमित्ततैं अनेक होय हैं । तिनि सर्वनिकूं गौण कहतेही आवै हैं । तातै सर्वपक्ष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छोडि शुद्धस्वरूपका श्रद्धान करि पीछे स्वरूपविषे प्रवृत्तिरूप चारित्र भये वीतरागदशा करना योग्य है ॥ २५ ॥ अब जैसे बद्ध अबद्धपक्ष छुडाई तैसेंही अन्यपक्षकूं प्रगट कहिकरि छुडावै हैं—

एकस्य मूढो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ।२६।

अर्थ—एकनयके तौ जीव मूढ है मोही है, बहुरि दूसरे नयके मूढ नाहीं है यह पक्ष है। ऐसे ये दोऊही चेतन्य विषैं पक्षपात हैं। बहुरि जो तत्त्ववेदी है सो पक्षपातरहित है, ताका चित्‌ही है, मोही अमोही नाहीं है ॥

एकस्य रक्तो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ २७ ॥

अर्थ—एकनयके तौ यह जीव रक्त कहिये रागी है ऐसा पक्ष है, बहुरि दूसरे नयके रक्त नाहीं है ऐसा पक्षपात है। सो ए दोऊही चेतन्यविषैं नयके पक्षपात है ॥ बहुरि जो तत्त्ववेदी है सो पक्षपात नाहीं है, ताकै जो चित् हैं सो चित ही है ॥

एकस्य दुष्टो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदो च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ २८ ॥
एकस्य कर्ता न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ २९ ॥
एकस्य भोक्ता न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३० ॥
एकस्य जीवो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३१ ॥
एकस्य सूक्ष्मो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३२ ॥
एकस्य हेतुर्न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३३ ॥
एकस्य कार्यं न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३४ ॥
एकस्य भावो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३५ ॥
एकस्य चैको न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३६ ॥
एकस्य सांतो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३७ ॥
एकस्य नित्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३८ ॥
एकस्य वाच्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ३९ ॥
एकस्य नाना न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ४० ॥
एकस्य चेत्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ४१ ॥
एकस्य दृश्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ४२ ॥
एकस्य वेद्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ४३ ॥
एकस्य भातो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ४४ ॥

सं. टी.—पूर्ववद् व्याख्येयानि मूढरक्तेतरादिपदपरिवर्तनेन ॥ २६—४४ ॥ अथ नयातिक्रमेण स्वानुभूतिमुपदर्शयति—

अर्थ—एक नयकै तौ दुष्ट कहिये द्वेषी है, बहुरि दूसरे नयके दुष्ट नाहीं है। ऐसैं ए चैतन्यविषैं दोऊ नयके दोय पक्षपात हैं एक नयके कर्ता है दूसरे नयके कर्ता नाही है ए ऐसे चैतन्यविषैं दोऊ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नयके दोऊ पक्षपात हैं। एक नयके भोक्ता है, दूसरे नयके भोक्ता नाहीं है। ए चैतन्यविषैं दोऊ नयके दोऊ पक्षपात हैं,एक नयके जीव है,दूसरे नयके जीव नाहीं है। ऐ चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके सूक्ष्म हैं,दूसरे नयके सूक्ष्म नाहीं। ऐसे ए चैतन्यविषैं दोऊ नयके दोऊ पक्षपात हैं। एक नयके हेतु है,दूसरे नयके हेतु नाहीं है ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके कार्य हैं, दूसरे नयके कार्य नाहीं। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके भावरूप हैं दूसरे नयके अभावरूप है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके एक है,दूसरे नयके अनेक है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके सांत कहिये अन्तसहित है,दूसरे नयके अन्तसहित नाहीं है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके नित्य है, दूसरे नयके अनित्य है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके वाच्य कहिये वचनकरि कहने मैं आवै है, दूसरे नयके वचनगोचर नाही है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके नानारूप है,दूसरेके नानारूप नाहीं है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं एक नयके चेत्य कहिये जानने योग्य है,दूसरेके चिंतवनेयोग्य नाही है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके दृश्य कहिये देखनेयोग्य है, दूसरेके देखनेमें नाहीं आवै है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एकनयके वेद्य कहिये वेदनेयोग्य है, दूसरेके वेदनेमें न आवे है ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। एक नयके भात कहिये वर्तमानप्रत्यक्ष है, दूसरेके नाहीं है। ए दोऊ नयके चैतन्यविषैं दोऊ पक्षपात हैं। ऐसैं चैतन्यसामान्यविषैं ए सर्व पक्षपात हैं। बहुरि तत्त्ववेदी है सो स्वरूपकूं यथार्थ अनुभवन करनेवाला है। ताका चिन्मात्रभाव है सो चिन्मात्रही है पक्षपातसूं रहित है। भावार्थ जीवके परनिमित्ततैं अनेक परिणाम हैं, तथा यामैं साधारण अनेक धर्म हैं। तथापि असाधारण-धर्म चित्स्वभाव है सोही सामान्यभावकरि शुद्धनयका विषय है, तिसहीकूं प्रधानकरि कथन है, सो याके साक्षात् अनुभवके अर्थि ऐसा कह्या है, जो यामैं नयनिके अनेक पक्षपात उपजै हैं बद्ध अबद्ध, मूढ अमूढ, रागी विरागी, द्वेषी अद्वेषी, कर्ता अकर्ता, भोक्ता अभोक्ता, जीव अजीव, सूक्ष्म स्थूल, कारण अकारण, कार्य अकार्य, भाव अभाव, एक अनेक, सांत असांत, नित्य अनित्य, वाच्य अवाच्य, नाना अनाना, चेत्य अचेत्य, दृश्य अदृश्य, वेद्य अवेद्य भात अभात, इत्यादि नयनिके पक्षपात हैं। सो तत्त्वका अनुभव करनेवाला पक्षपात नाहीं करै है। नयनिकूं तौ यथायोग्य विवक्षातैं साधै है। अर चैतन्यकूं चेतनमात्रही अनुभवन करै है। ॥ २८–४४ ॥ इसही अर्थका संक्षेपकरि काव्य कहैं हैं–

स्वेच्छासमुच्छलदनल्पविकल्पजालामेवं व्यतीत्य महतीं नयपक्षकक्षां।
अंतर्बहिःसमरसैकरसस्वभावं स्वं भावमेकमुपयात्यनुभूतिमात्रं ॥ ४५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं. टी.—एकं, स्वं-आत्मीयं, भावं-स्वभावं, अनुभूतिमात्रं अनुभवमेव, उपयाति प्राप्नोति, किंभूतं स्वं? अंतरित्यादिः अंतः अभ्यन्तरे, वहिः वाह्ये, यः समरसः साम्यरसः, स एव एकः अद्वितीयः, आस्वाद्यमानरसस्वभावः स्वरूपं यस्य तत् किं कृत्वा ? एवं उक्तविंशतिपद्योक्तनयप्रकारेण नयपक्षकक्षां नयपक्षांगीकारं, व्यतीत्य हित्वा, किंभूतां ? स्वेच्छेत्यादिः स्वेच्छया समुच्छलंतश्च तेऽनल्पविकल्पाश्च तेषां जालं समूहो यस्या सा तां, महतीं महाप्रसरप्राप्तां ॥ ४५ ॥ अथ विकल्पजालं धिक्कृत्य स्वरूपं तंतन्यते

अर्थ-जो तत्त्वका जाननेवाला पुरुष हैं सो पूर्वोक्तप्रकार आपै आप उठते हैं बहुत विकल्पनिके जाल जामैं, ऐसी जो बडी नयपक्षरूप वनी ताकूं उल्लंघकरि अर समरस जो वीतरागभाव सोही हैं एकरस जामैं ऐसा है स्वभाव जाका ऐसा जो आत्माका भाव अपना स्वरूप अनुभूतिमात्र, ताकूं प्राप्त होय हैं ॥ ४५ ॥ फेरि कहैं हैं—

इंद्रजालमिदमेवमुच्छलत् पुष्कलोच्चलविकल्पवीचिभिः ।
यस्य विस्फुरणमेव तत्क्षणं कृत्स्नमस्यति तदस्मि चिन्महः ॥ ४६ ॥

सं० टी०—यस्य चिन्महसः, विस्फुरणमेव प्रकाशनमेव, इदं प्रसिद्धं, ममैतदस्याहमित्यादिरूपं, कृत्स्नं समस्तं, इन्द्रजालं महेंद्रादिशास्त्रप्रणीतविद्यासादृश्यत्वादसद्रूपत्वाच्चेदं सर्वमिन्द्रजालं,-तत्क्षणं-उदयकालं, अस्यति-निराकरोति, किंभूतं ? उच्छलत् अधिकं प्रापयत्, काभिः ? पुष्कलेत्यादि—विकल्पममत्वादिरूपाः संकल्पास्त एव वीचयः कल्लोलाः बहुलास्ताश्च ता उच्चलंत्यः-ऊर्ध्वं प्राप्नुवंत्यश्च ता विकल्पवीचयस्ताभिः तत्-प्रसिद्धं, चिन्महः चित्स्वरूपं धाम, अस्मि-भवामि ॥ ४६ ॥ अथ समयसारचेतनामाचिंतयति—

अर्थ-तत्त्ववेदी ऐसा अनुभवन करे हैं जो मैं चिन्मात्र मह-तेजका पुंज हूँ । जाका स्फुरायमान होनाही, बडी बडी पुष्ट उठती चंचल जे विकल्परूप लहरीं, तिनिकरि उछलता इनि नयनिका प्रवर्तनरूप इन्द्रजाल, तत्काल समस्तनिहीकूं दूर करे है । भावार्थ-चैतन्यका अनुभवन ऐसा है, जो याकै होते समस्त नयनिका विकल्परूप इन्द्रजाल है सो तत्काल विलय हो जाय हैं ॥ ४६ ॥

चित्स्वभावभरभावितभावाभावभावपरमार्थतयैकं ।
बंधपद्धतिमपास्य समस्तां चेतये समयसारमपारं ॥ ४७ ॥

सं० टी०—चेतये—चिंतयामि-ध्यानविषयीकरोमीत्यर्थः, कं ? समयसारं सम्यक् अयंति-गच्छंति निजगुणपर्यायानिति समयाः—पदार्थाः, अथवा समयंति-जानंति स्वरूपमिति आत्मानः, तेषां मध्ये सारः श्रेष्ठस्तं, किंभूतं अपारं-गुणपाररहितं पुनः एकं-अद्वितीयं, कया ? चिदित्यादि-चिदेव स्वभावो यस्य स चित्स्वभावः—आत्मा, तस्य भरः-अतिशयः प्रतिक्षणं त्रिलक्षणोपादानलक्षणः तेन भाविताः-निष्पादिताः; भावाभावभावाः-भूयत इति भाव उत्पादः, अभावः-पूर्वपर्यायः, भवनं भावः द्रव्यरूपेण ध्रौव्यता, द्वंद्वः, तेषां परमार्थता-सत्यता-एकार्थता तया, किंकृत्वा ? अपास्य—छित्त्वा, कां ? बंधपद्धतिं—कर्मबंधश्रेणीं, समस्तां-निखिलां, प्रकृतिस्थित्यनुभागप्रदेशरूपां ॥ ४७ ॥ अथ समयसारं पापठोति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—मैं जू हौं तत्त्वका जाननेवाला सो समयसार जो परमात्मा ताही अनभवूं हूं। कैसा है समयसार ? चैतन्यस्वभावका भार कहिये पुंज, ताकरि भया है भाव अभावस्वरूप जो एकभाव स्वरूप परमार्थ तिसपणाकरि एक है। भावार्थ—परमार्थकरि विधिप्रतिषेधका विकल्प जामैं नाहीं है। बहुरि पहले कहा करी अनुभवूं हूँ ? समस्तही जो बंधकी पद्धति कहिये परपाटी, ताकूं, दूर करिकै। भावार्थ—परद्रव्यके कर्ता कर्म भावकरि बंधकी परपाटी चाले थी, ताकूं पहले दूरी करि समयसारकूं अनुभवू हौं बहुरि कैसा है, अपार है जाके केवलज्ञानादिगुणका पार नाहीं है ॥४७॥ आगे ऐसा नियम करि ठहरावै हैं जो पक्षतें अतिक्रांत दूरिवर्त्ती ही समयसार है—

विशेष—संस्कृतटीकाकारने श्लोकके पूर्वार्धभागका अर्थ यह किया है कि आत्मामें प्रतिसमय उत्पाद व्यय और ध्रौव्य अवस्था हुआ करतीं है इसलिये इसरूपसे वह अनेक कहा जा सकता हैं परंतु ये तीनों अवस्था परमार्थस्वरूप हैं आत्मामें ही इन अवस्थाओंकी उथल पुथल हुआ करती हैं इसलिये उत्पाद व्यय और ध्रौव्य स्वरूप होनेपर भीं यह आत्मा एक स्वरूप ही हैं। परंतु पं० जयचन्द्रजीका अर्थ इससे भिन्न हैं ॥ ४७ ॥

आक्रामन्नविकल्पभावमचलं पक्षैर्नयानां विना
सारो यः समयस्य भाति निभृतैरास्वाद्यमानः स्वयं।
विज्ञानैकरसः स एष भगवान् पुण्यः पुराणः पुमान् ॥
ज्ञानं दर्शनमप्ययं किमथवा यत्किंचनैकोप्ययं ॥ ४८ ॥

सं० टी०—यः समयस्य-पदार्थस्य मध्ये सारः-उत्कृष्टः आत्मेत्यर्थः, स्वयं—परप्रकाशाद्यभावेन; भाति—शोभते, नयानां बद्धमूढादीनां पक्षैः—अंगीकारैः, विना—अंतरेण, निभृतैः-निश्चलैः,-एकाग्रता-गतैर्योगिभिः, आस्वाद्यमानः-ध्यानविषयीक्रियमाणः अचलं-निश्चलं यथा भवति तथा, अथवा-अविकल्प-भावस्य विशेषः (?) अविकल्पभावं-विकल्परहितभावं, आक्रामन्-स्वीकुर्वन्, पुनः किंभूतः ? विज्ञानैकरसः विज्ञानस्य—विशिष्टबोधस्य, एकरसः, यः सः, पुमान्—आत्मा, भगवान्-ज्ञानी, पुण्यः प्रशस्तः, पवित्रो वा पुराणः-चिरंतनकालीनः—पुरातन इत्यर्थः, अयं-आत्मा, ज्ञानं-बोधः, ज्ञानव्यतिरेकेण तस्यानुपलभ्य-मानत्वात्, अपि-पुनः, अयं, दर्शनं-सत्तालोचनमात्रं, सम्यक्त्वं वा आत्मैव, अथवा किं बहुना ? विकल्पेन किं साध्यं ? न किमपि, यत्किंचन चारित्रं सौख्यं किंचित् एकोप्ययं-अद्वितीय आत्मैव-आत्मव्यतिरेकेण शेषामनुपलभ्यमानत्वात् आत्मस्वरूपत्वाच्च स्वरूपस्वरूपिणोरेकत्वात् ॥ ४८ ॥ अथात्मनो गतानुगततां साधयति—

अर्थ—जो नयनिका पक्षविना निर्विकल्पभावकूं प्राप्त होता, निश्चल जैसे होय तैसे समय कहिये आगम अथवा आत्मा, ताका सार है सो शोभे है। सो कैसा है ? जे निश्चितपुरुष हैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विनिकरि स्वयं आस्वाद्यमान है, तिनिने अनुभवतैं जाणि लीया है। सोही यह भगवान् विज्ञानही एकरस जाका एसा है, सो पवित्र पुराणपुरुष है, याकूं ज्ञान कहौ अथवा दर्शन कहौ अथवा किछू और नाम करि कहो जो कछु हैं सो यह एक ही है, नाना नाम कहावै है ।।४८।। अब कहै हैं, जो यह आत्मा ज्ञानतैं च्युत भाया था सो ज्ञानहीसूं आय मिले है–

दूरं भूरिविकल्पजालगहने भ्राम्यन्निजौघाच्च्युतो
दूरादेव विवेकनिम्नगमनान्नीतो निजौघं बलात् ।
विज्ञानैकरसस्तदेकरसिनामात्मानमात्माहर—
न्नात्मन्येव सदा गतानुगततामायात्ययं तोयवत् ।। ४९ ।।

सं० टी०–तदेकरसिनां–तस्मिन्–आत्मनि–एकः–अद्वितीयः, रसः, येषां तेषां योगिनां, अयं–प्रसिद्धः, आत्मा–चिद्रूपः, आत्मन्येव–स्वस्वरूप एव गमनागमनतां, आयाति–प्राप्नोति, सदा–निरंतरं, आत्मानं स्वस्वरूपं, आहरन्–स्वीकुर्वन्, किंभूतः ? विज्ञानैकरसः–विशिष्टबोधैकरसास्वादकः; निजौघात् विज्ञानैकरससमूहात्, च्युतः–परिच्युतः सन् भूरीत्यादिः–भूरिविकल्पानां जालं–समूहस्तदेव गहनं–वनं, अवगाहयितुमशक्यत्वात् तस्मिन्, दूरं–आत्मस्वरूपादनिकटं यथा भवति तथा भ्राम्यन्–भ्रमणं कुर्वन्, दूरादेव–स्वस्वरूपादसमीपत एव, बलात्–हठात्, बहिर्द्रव्यममत्वादिपरीत्यागरूपात्, निजौघं–विज्ञानैकरस समूहं, नीतः प्राप्तः, कुतः ? विवेकनिम्नगमनात्–विवेकः–परात्मनोर्भेदेन विवेचकत्वं, स एव निम्नं–गभीरं गमनं–गतिः, तस्मात्, बहिर्भ्रमन् विकल्पे विवेकवशात् स्वस्वरूपे आयाति । किमिव ? तोयवत् यथा पानीयं स्वस्थाने गतानुगततां करोति निजौघाच्च्युतं वने भ्राम्यत्, निम्नगमनविशेषनिजस्थानं प्राप्नोतीति, उक्तिलेशः ।। ४९ ।। अथ विकल्पस्वरूपं विकल्पयति–

अर्थ–यह आत्मा अपने विज्ञानघनस्वभावतैं च्युत भया संता, प्रचुरविकल्पनिके जालके गहनवनमें अतिशयकरि भ्रमण करैथा, तिस भ्रमतेकूं विवेकरूप नीचे मार्गके गमनकरि जलज्यौं अपना विज्ञानघनस्वभावविषैं दूरतैं आणि मिलाया। कैसा है ? जे विज्ञानका रसहीके एकरसीले हैं, तिनिकूं एक विज्ञानरसस्वरूप ही है। सो ऐसा आत्मा अपने आत्मास्वभावही विषैं समेटता संता जैसा बाह्य गया था तेसे ही अपने स्वभावविषैं आय प्राप्त होय है। भावार्थ इहां जलका दृष्टांत हैं। जैसे जल है सो जलके निवासमेंसूं कोई मार्गकरि बाह्य निसरै है सो वनमें अनेक जायगा भ्रमै, फेरि कोई नीचामार्गकरि ज्यौंका त्यौं अपना जलके निवासमें आय मिले। तेसे आत्माभी अनेक विकल्पनिके मार्गकरि स्वभावतैं च्युत भया भ्रमण करता संता कोई विवेक भेदज्ञानरूप नीचा मार्गकरि आपही आपकूं खेचता संता, अपने स्वभाव विज्ञानघनविषैं आय मिले है ।। ४९।। अब कर्ताकर्म अधिकारकूं पूर्ण कीया हैं' सो कर्ताकर्मका संक्षेप अर्थका कलशरूप श्लोक कहैं हैं–

विकल्पकः परं कर्ता विकल्पः कर्म केवलं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न जातु कर्तृकर्मत्वं सविकल्पस्य नश्यति ।। ५० ।।

सं० टी०—परं-केवलं, विकल्पकः-परद्रव्ये ममेदमिति, अभिनिवेशो विकल्पः स्वार्थे कप्रत्ययविधानात्, कर्ता-कर्मणां कर्तृत्वेन प्रतिभवति, केवलं-परं, विकल्पः कर्म, भावकर्मणां विकल्पस्वरूपत्वात् कर्महेतुत्वाद्वा विकल्पस्य कर्मत्वं कारणे कार्योपचारात्, जातु—कदाचित्, सविकल्पस्य-देहिनः, कर्तृकर्मत्वं न नश्यति-न निरस्यति ।। ५० ।। अथ जीवपुद्गलयोः कर्तृवेतृत्वं भिनत्ति—

अर्थ-विकल्प करनेवाला तौ केवल कर्त्ता हैं। बहुरि विकल्प हैं सो केवल कर्म हैं । अन्य किछु कर्त्ताकर्म नाहीं हैं, यातैं जो विकल्पसहित है, ताका कर्ताकर्मपणा कदाचित् भी नष्ट नाहीं होय है। भावार्थ-जहां तांई विकल्पभाव हैं, तहां तांई कर्ताकर्मभाव हैं। जिस काल विकल्पका अभाव होय, तिस काल कर्ताकर्मभाव का भी अभाव होय है ।।५०।। अब कहैं हैं, जो करे हैं सो करेही हैं जाने सो जानैही है—

यः करोति स करोति केवलं यस्तु वेत्ति स तु वेत्ति केवलं।
यः करोति नहि वेत्ति स क्वचित् यस्तु वेत्ति न करोति स क्वचित् ।। ५१ ।।

सं० टी०—यः-पुद्गलः करोति-द्रव्यभावनोकर्म विदधाति स पुद्गलः केवलं-परं, करोति कर्मादि सृजत्येव । तु-पुनः, यः-आत्मा-वेत्ति स्वपरस्वरूपं परिच्छिनत्ति, सः-आत्मा, केवलं-परं, वेत्त्येव-जानात्येव तु शब्दः एवार्थे । ननु यत्प्रधानं महदादि करोति तदेव वेत्ति नत्वात्मा—

प्रकृतेर्महांस्ततोऽहंकारस्ततश्च गणः षोडशकः । तस्मादपि षोडशकात्पंचभ्यः पंच भूतानि ।।

इति वचनात्, एकस्यैव कर्तृत्ववेतृत्वोपपत्तेः, नत्वात्मनः किंचिदुपपन्नं तस्य सकलजगत्साक्षिकत्वात् ? इति चेत्तन्न तस्याचेतनत्वान्मृदादिवत् अन्यथा पुमान्निष्फलः स्यात् चेतनेतरस्वभावत्वे तस्य चेतनेतरत्वविभागानुपपत्तिः, अत आत्मनश्चेतनत्वं तस्याचेतनत्वं हीति यस्मात् कारणात्। यः-पुद्गलः, करोति कर्मादिकं, सः-पुद्गलः, क्वचित्-कदाचित् न वेत्ति-न जानाति तस्य सर्वथाऽचेतनत्वात् । तु-पुनः, यः-आत्मा वेत्ति सः-आत्मा कचिद्देशे कस्मिंश्चित्काले न करोति कर्मादि, तस्य कर्माकर्तृकत्वात् ।। ५१ ।। अथ ज्ञप्तिकरोत्योर्भिन्नत्वमुद्भासते—

अर्थ-जो करै है, सो केवल करैही है। बहुरि जो जानै है, सो केवल जानैही है। बहुरि जो करै है, सो कछू ही नाही जानै है। अर जो जानै, सो कछूही नाहीं करै है।। भावार्थ-कर्ता है सो ज्ञाता नाहीं, अर ज्ञाता है सो कर्ता नाहीं ।। अब कहै हैं ऐसेही करनेरूपक्रिया अर जाननेरूपक्रिया दोऊ भिन्न हैं—

विशेष-पुद्गल कर्ता है वह कुछ जानता नहीं। आत्मा जानता है वह कुछ करता नहीं इसलिये कर्ता पुद्गल कर्ता ही है और ज्ञाता आत्मा ज्ञाता ही है। संस्कृतटीकानुसार यह इसका तात्पर्य है और इस श्लोकका उल्लेख खासकर खंडनार्थ किया है ।। ५१ ।।

ज्ञप्तिः करोतौ नहि भासतेंऽतः ज्ञप्तौ करोतिश्च न भासतेंऽतः ।
ज्ञप्तिः करोतिश्च ततो विभिन्ने ज्ञाता न कर्तेति ततः स्थितं च ।। ५२ ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी—हीति-स्फुटं, करोतौ-कर्तृ क्रियायां सत्यां, अंतः-मध्ये, ज्ञप्तिः-ज्ञातृता, न भासते-न प्रतिभासते, च-पुनः, ज्ञप्तौ-ज्ञातृतायां प्रतिभासमानायां अंतः-अभ्यंतरे, करोतिः-आत्मनः कर्तृस्वभावः, न भासते-न चकास्ति, ततः कारणात् परस्परपरिहारेण व्यवस्थानात्, ज्ञप्तिः-ज्ञातृता च-पुनः, करोति-कर्तृता च विभिन्ने-पृथक्स्वभावे, ततः परस्परं भिन्नस्वभावत्वात्, इति च स्थितं-इति सुप्रतिष्ठं-यो ज्ञाता चिद्रूपः स कर्ता न भवेदिति ॥ ५२ ॥ अथ कर्तृकर्मणोः परस्परमैक्यं निराचेक्रीयते—

अर्थ—जाननेरूप क्रिया है, सो तौ करनेरूप क्रियाविषैं अंतरंगमें नाहीं भासै है। बहुरि करनेरूप क्रिया है, सो जाननेरूप क्रियाविषैं अंतरंगमें नाहीं भासै है। तातैं ज्ञप्तिक्रिया अर करोतिक्रिया दोऊ भिन्न हैं। तातैं यह ठहरी जो ज्ञाता है सो कर्ता नाहीं है॥ भावार्थ जिसकाल ऐसे परिणमै हैं, जो मैं परद्रव्यकूं करूं हौं, तिसकाल तिस जाननक्रियारूप ज्ञाता ही है॥ इहां कोई पूछे है, अविरतसम्यग्दृष्टि आदिकै जेतैं चारित्रमोहका उदय है तेतैं कषायरूप परिणमै है। तहां कर्ता कहिये कि नाहीं ?॥ ताका समाधान—जो अविरतसम्यग्दृष्टिआदिकै श्रद्धान ज्ञानमय परद्रव्यके स्वामीपणारूप कर्तापणाका याकै नाहीं, अर कषायरूप परिणमन हैं सो उदयकी बरजोरीसूं हैं, ताका यह ज्ञाता है॥ तातैं अज्ञानसंबंधी कर्तापणा याकै नाही है। अर निमित्तकी बरजोरीका परिणमनका फल किंचित होय हैं। सो संसारका कारण नाहीं है। जैसैं वृक्षकी जड कटे पीछैं किंचित्काल रहैं तैसैं है॥ फेरि दृढ करै हैं—

कर्ता कर्मणि नास्ति नास्ति नियतं कर्मापि तत्कर्तरि
द्वंद्वं विप्रतिषिध्यते यदि तदा का कर्तृकर्मस्थितिः।
ज्ञाता ज्ञातरि कर्म कर्मणि सदा व्यक्तेति वस्तुस्थिति—
र्नैष्प (प) थ्ये वत नानटीतिं रभसान्मोहस्तथाप्येष किं ॥५३॥

सं० टी०—कर्मणि-ज्ञानावरणादिकर्मरूपपरिणतपुद्गलपर्याये, कर्ता-आत्मनः कर्तृत्वं, नास्ति-न विद्यते, नत् तस्मात् कर्मणि कर्तृत्वाव्यवस्थानात् नियतं-निश्चितं। यदि कर्मणि कर्ता न तर्हि कर्तरि कर्म भविष्यति ? तन्निषेधार्थमाह-कर्मापि-ज्ञानावरणादिपरिणतपुद्गलपर्यायः, कर्तरि-आत्मनि, नास्ति-न विद्यते, यदि चेत् ? विप्रतिषिध्यते-निराक्रियते, किं ? द्वंद्वं-युग्मं-कर्तृकर्मरूपं, तदा तर्हि कर्तृकर्मस्थितिः-कर्तृकर्मणोः आत्मा कर्ता पुद्गलपर्यायः कर्म इति व्यवस्था का नाम ? न कापि। इति अमुना प्रकारेण वस्तुस्थितिः-वस्तुव्यवस्था व्यक्ता-स्पष्टा, इति किं ? ज्ञातरि-आत्मनि, ज्ञाता-ज्ञातृस्वभावः, नान्यत्र न पुनः कर्तृस्वभावः, सदा-निरंतरं कर्मणि-कर्मपर्यायपरिणतपुद्गले कर्म कर्मेति व्यपदेशः नान्यत्र ज्ञातरि, वत इति खेदे परस्परं तयोर्भिन्नत्वे वेदयत्याचार्यः एष मोहः-ममत्वकारकमोहनीयं कर्म, तथापि-परस्परमात्मकर्मणोर्भिन्नत्वेऽपि रभसात्-शीघ्रं, नैष्पथ्ये-निर्गतः पंथा मार्गो यत्र स्थाने तत् निष्पथं तस्य भावो नैष्पथ्यं तस्मिन् अमार्गस्थानत्वे इत्यर्थः किं कथं, नानटीति अतिशयेन नाटयति कर्मकर्तृविकल्पानवकाशे मोहः कथं कर्तृकर्मविकल्पान् कारयतीति यावत्॥ ५३॥ अथ ज्ञानज्योतिर्ज्वलतीति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—कर्ता है सो तौ कर्मविषै निश्चयकरि नाहीं है, बहुरि कर्म है सो भी कर्ताविषैं निश्चयकरि नाहीं है। ऐसैं दोऊही परस्पर विशेषकरि प्रतिषेधिये, तब कर्ताकर्मकी कहा स्थिति होय? नाहीं होय। तब वस्तुकी मर्यादा प्रगट व्यक्तरूप यह ठहरी, जो, ज्ञाता तौ सदा ज्ञानविषैंही है। अर कर्म है सो सदा कर्मविषैंही है। तौऊ यह मोह अज्ञान है, सो नेपथ्यविषैं कैसैं नाचै है! सो यह बडा खेद है॥ नेपथ्य कहिये शांत ललित उदात्त धीर इनि च्यारि आभरणनि सहित जो यह तत्त्वनिका नृत्य, ताविषैं यह मोह कैसैं नाचै है? कर्ताकर्मभाव तौ नेपथ्यस्वरूप नृत्यका आभूषण नाहीं, ऐसैं खेदसहित वचन आचार्यनैं कह्या है॥ भावार्थ—कर्म तौ पुद्‌गल है, ताका कर्ता जीवकूं कहिये, तौ तिनि दोऊनिकै तौ बडा भेद है, जीव तौ पुद्‌गलमें नाहीं अर पुद्‌गल जीवमें नाहीं। तब इनिके कर्तृकर्मभाव कैसा बनै! तातैं जीव तौ ज्ञाता है, सो ज्ञाता ही है, पुद्‌गलका कर्ता नाही। बहुरि पुद्‌गलकर्म है सो कर्मही है। तहां आचार्य खेदकरि कह्या है—जो, एसैं प्रगट भिन्नद्रव्य है, तौऊ अज्ञानीकै ए मोह कैसे नाचै है! जो मैं तो कर्ता हूं अर यह पुद्‌गल मेरा कर्म है, यह बडा अज्ञान है॥ ५३॥ फेरि कहे हैं, जो ऐसैं मोह नाचै है, तो नाचो, वस्तुस्वरूप तौ जैसा है तैसाही तिष्ठै है—

विशेष—श्लोकमें 'नेपथ्य' और नैष्पथ्य दोनों पाठ मिलते हैं जिसमें पं० जयचंद्रजीने नेपथ्य पाठ रख रंगभूमि अर्थ किया है और भट्टारक शुभचंदजीने नेपथ्यकी जगह नैष्पथ्य पाठ रख उसका अर्थ कुमार्ग किया है॥ ५३॥

कर्ता कर्ता भवति न यथा कर्म कर्मापि नैव
ज्ञानं ज्ञानं भवति च यथा पुद्‌गलः पुद्‌गलोऽपि।
ज्ञानज्योतिर्ज्वलितमचलं व्यक्तमंतस्तथोच्चै-
श्चिच्छक्तीनां निकरभरतोऽत्यंतगंभीरमेतत्॥५४॥

सं० टी०—एतत् प्रत्यक्षं, ज्ञानज्योतिः-बोधमहः, तथा तेनैव प्रकारेण, उच्चैः-अतिशयेन, अंतः-अभ्यंतरे, उपलक्षणाद्बाह्येऽपि ज्वलितं-देदीप्यमानं जातं, कुतः? चिच्छक्तीनां-ज्ञानाविभागप्रतिच्छेदानां, निकरमात्रः निकरो द्विकवारानंतभावः, तस्य भरः अतिशयः, तस्मात्, किंभूतं? अचलं न चाल्यते यच्छक्तिः परैः पुद्गलादिभिः, इत्यचलं, पुनः कीदृक्षं? व्यक्तं-स्पष्टं, समस्तवस्तुप्रकाशकत्वात् पुनः अत्यंतगंभीरं-अत्यर्थं-अतलस्पर्शं, ज्ञानशक्तेरनंतत्वात् तथेति कथं? यथा कर्ता पुद्गलः कर्ता कर्मणां निष्पादकः, न भवति न जायते अशुद्धं ज्ञानं निमित्तीकृत्य पुद्गलः कर्मणां कर्ता अधुना ज्ञानज्वलनात्तच्छुद्धं जातं तथा-यथा पुद्गलस्य कर्मकर्तृत्वेन निमित्तत्वं निमित्ताभावे नैमित्तकस्याप्यभावात्। अपि पुनः कर्म ज्ञानावरणादिकर्म स्वरूपेण नैव निश्चयेन न व्यवतिष्ठते समर्थे विनाशके विनाश्यस्याव्यवस्थानात प्रकाशे सति तमोवत्, च पुनः यथा येन प्रकारेण ज्ञानं कर्मकलंककलंकितं ज्ञानं ज्ञानं-निर्मलज्ञानं, भवति जायते अपि-पुनः, पुद्गलः-पुद्गलपरमाणुः, पुद्गल एव भवति न कर्मरूपेण परिणमति॥ ५४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—यह ज्ञानज्योति है सो अंतरंगविषै अतिशयकरि अपनी चैतन्यशक्तीके समूहके भारतैं अत्यंत गंभीर, जाका थाह नाहीं, सो ऐसें निश्चल व्यक्तरूप प्रगट भया। जैसें अज्ञानविषैं आत्मा कर्ता था, सो तौ अब कर्त्ता न होय अर याके अज्ञानतैं पुद्गल कर्मरूप होय था, सो अब कर्म रूप न होय बहुरि जैसें ज्ञान तो ज्ञानरूपही होय अर पुद्गल है सो पुद्गलरूपही रहै, ऐसें प्रगट भया भावार्थ—आत्मा ज्ञानी होय तब ज्ञान तौ ज्ञानरूप ही परिणमैं, पुद्गलकर्मका कर्ता न बने, बहुरि पुद्गल है सो पुद्गलरूपही रहै कर्मरूप न परिणमै ऐसें आत्माकै ज्ञान यथार्थ भये दोऊ द्रव्यके परिणामके निमित्तनैमित्तिकभाव नाही होय है, ऐसा सम्यग्दृष्टिकै ज्ञान होय है। ऐसें जीव अर अजीव दोऊ कर्ता कर्मके वेषकरि एक होय नृत्यके अखाडेमैं प्रवेश कीया था, सो सम्यग्दृष्टिका ज्ञान यथार्थ देखनेवाला है, सो दोऊकूं न्यारे न्यारे लक्षणतैं दोय जानि लिये, तब वेप दूरि करी रंगभूमितैं बाह्य नीसरी गये। बहुरूपीका वेषका यह ही प्रवर्तन है—जो, देखनेवाला जेतैं पहिचाने नाही, तेतैं चेष्टा किया करै, अर यथार्थ पहिचानि ले तब निजरूप प्रगट करी चेष्टा न करता बैठि रहै, तैसें जानना ॥ ऐसें कर्ताकर्म नामा दूसरा अधिकार पूर्ण भया ॥

जीव अनादि अज्ञान वसाय विकार उपाय वणैं करता सो।
ताकरि बंधन आन तणूं फल ले सुख दुःख भवाश्रमवासो ॥
ज्ञान भये करता न बणे तब बंध न होय खुलै परपासो।
आतममाहि सदा सुविलास करै सिव पाय रहै निति थासो ॥

इति श्रीसमयसारपद्यस्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां द्वितीयोंकः ॥ २ ॥

ऐसें इस अध्यात्मतरंगिणीनामा टीकाकी वचनिकाविषैं दूसरा कर्ताकर्मनामा अधिकार पूर्ण भया ॥ २ ॥

अथ पुण्यपापाधिकारः ॥ ३ ॥

पुण्य पाप दोऊ करम, बंधरूप दुर मानि। शुद्ध आतमा जिन लह्यो, नमूं चरण हित जानि ॥

अब टीकाकारके वचन हैं ॥ तहां कर्म एकही प्रकार है, सो दोय जो पुण्यपाप रूप तिनिकरि प्रवेश करै है। जैसें नृत्यके अखाडेमैं एकही पुरुष अपने दोय रूप दिखाय नाचै, ताकूं यथार्थज्ञानी पहिचानै, तब एकही जानै। तैसें सम्यग्द्रष्टीका ज्ञान यथार्थ है। सो यद्यपि कर्म एक हीं है, सो पुण्य पाप भेदकरि दोय प्रकाररूप करि नाचै है, ताकूं एकरूप पहिचानि लै ॥ तिस ज्ञानकी महिमारूप इस अधिकारके आदिविषैं काव्य कहै हैं—

जीयादमृतहिमांशुप्रणीतमध्यात्मविशदपद्यमिदं।
शुभचंद्रदेवविवृत्तं सुकृतचयं कुन्दकुन्दपरं ॥ १ ॥

अथैकमेव द्विपात्रीभूय पुण्यपापरूपेण प्रविशति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदथ कर्म शुभाशुभभेदतो द्वितयतां गतमैक्यमुपानयन्।
ग्लपितनिर्भरमोहरजा अयं स्वयमुदेत्यवबोधसुधाप्लवः ॥ १ ॥

सं० टी०—अथ-जीवाजीवयोः कर्तृकर्मत्वनिराकरणादनंतरं, अयं बोधसुधाप्लवः-ज्ञानामृतपूरःस्वयं-स्वत एव-कर्मनिरपेक्षत्वेन, उदयति-उदयं प्राप्नोति, किंभूतः ? ग्लपितेत्यादि—ग्लपितं-विनाशितं निर्भरं निर्विशेषं भुवनं बिभर्ति-धारयतीति निर्भरं समस्तमोहाक्रांतत्वात् मोह एव रजो धूलिर्येन सः, अन्योऽपि सुधास्रवः रेणुं ग्लपयति इत्युपमोपमेययोः साम्यं, तत्-प्रसिद्धं कर्म ऐक्यं-एकतां, उपानयन्-कुर्वन्, किंभूतं तत् शुभाशुभभेदतः पुण्यप्रकृतिः शुभायुर्नामगोत्ररूपा, पापप्रकृतिः-घातिचतुष्काशुभायुर्नामगोत्ररूपा तयोर्भेदतः प्रभेदात्, द्वितयतां-द्विरूपतां गतं-प्राप्तं शुभाशुभभेदेन द्विधापि ज्ञाने भवतः, संसारदायकत्वात् सर्वं कर्मसदृशमित्येकमिति भावः ॥ १ ॥ अथ शुभाशुभकर्मणोर्दृष्टांतेनैक्यमुररीकरोति पद्यद्वयेन—

अथ-अथ कहिये कर्ताकर्म अधिकारके अनंतर, यह प्रत्यक्ष अनुभवगोचर सम्यग्ज्ञानरूप चंद्रमा है, सो स्वयं आपै आप उदयकूं प्राप्त होय है। कैसा है तत् कहिये सो प्रसिद्ध कर्म है सो कर्म सामान्यकरि एकही प्रकार है। सो शुभ अर अशुभके भेदतैं दोयरूपपणाकूं प्राप्त भया है, ताकूं एकपणाकूं प्राप्त करता संता, उदय होय है। भावार्थ-अज्ञानतैं एक कर्म दोय प्रकार दीखै था, सो ज्ञान एकप्रकार दिखाय दिया। बहुरि कैसा है ज्ञान ? दूरी किया है अतिशयरूप मोहमयी रज जानैं,भावार्थ-ज्ञानविषैं मोहरूप रज लागि रह्या था,सो दूरी किया, तब यथार्थ ज्ञान भया। जैसैं चंद्रमाकै बादला, तथा पालाका पटल आडा आवै, तब यथार्थप्रकाश होय नाहीं, आवरण दूरी भये यथार्थ प्रकासै तैसैं जानना।१। आगैं पुण्यपापका स्वरूपका दृष्टांतरूप काव्य कहै हैं—

एको दूरात्त्यजति मदिरां ब्राह्मणत्वाभिमाना-
दन्यः शूद्रः स्वयमहमिति स्नाति नित्यं तयैव।
द्वावप्येतौ युगपदुदरान्निर्गतौ शूद्रिकायाः
शूद्रौ साक्षादपि च चरतो जातिभेदभ्रमेण ॥ २ ॥

सं० टी०—दृष्टांतं तावद् वक्ति-यथा एकः-कश्चित्, सदाचरणः मदिरां-सुरां, दूरात्-आरात्-त्यजति परिहरति, कुतः ? ब्राह्मणत्वाभिमानात्-एवं 'वयं ब्राह्मणाः, ब्राह्मणैस्तु सुरा न पेया' ईदृग्विधाभिप्रायस्तस्मात्, अन्यः कश्चिदसदाचरणः 'अहं स्वयं शूद्रः' इति कृत्वा तया-मदिरया, एव-निश्चियेन, नित्यं-निरंतरं, स्नाति-स्नानं करोति पानस्य का वार्ता ? अतिशयालंकारोयं, द्वावपि सदसच्चारिणौ,एतौ-ब्राह्मणशूद्रौ, साक्षात् प्रत्यक्षं, शूद्रौ-अवरवर्णौ, शूद्रत्वमनयोः, कथं ? यतः युगपत् सकृत्, शूद्रिकायाः-शूद्रभार्यायाः, उदरात्-जठरात्, निर्गतौ-निष्क्रांतौ, अथ च अनु च पश्चादित्यर्थः, जातिभेदभ्रमेण—जातेः-संतानस्य भेदः तस्य भ्रमः-भ्रांतिः, तेन, एको वेत्त्यहं द्विजः, एको वेत्त्यहं शूद्रः, इत्यभिप्रायतः चरतौ भिन्नाचारमाचरतः, तथा एकपुद्गलनिष्पन्ने शुभाशुभकर्मणी एकं शुभं स्वर्गादिदायि, अशुभमपरं नरकगत्यादिदायि, पुनः उभे बंधनहेतुके ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ-काहू शूद्री स्त्रीके उदरतैं युगपत् एकही काल दोय पुत्र निसरे जन्मे, तिनिमें एक तौ ब्राह्मणके घर पल्या, ताकै ब्राह्मणपनाका अभिमान भया जो मैं ब्राह्मण हौं, सो तिस अभिमानतैं मदिराकूं दूरीहीतैं छोडै है, स्पर्शै भी नाही है। बहुरि दूजा शूद्र हीके घर रह्यो, सो मैं आप शूद्र हौं ऐसैं मानि तिस मदिराकरि नित्य सौच करे है, शुचि माने है। सो याका परमार्थ विचारिये तब दोऊही शूद्रीके पुत्र हैं जातैं दोऊ ही शूद्रीके उदरतैं जन्मे हैं सो साक्षात् शूद्र हैं ते जाति भेदके भ्रमकरि प्रवर्तै हैं, आचरण करे हैं। ऐसैं पुन्यपाप कर्म जानने, विभावपरिणतीतैं उपजैं, दोऊही बंधरूप हैं, प्रवृत्तिभेदकरि दोय दीखे हैं, परमार्थदृष्टि करि कर्म एक ही जानने॥

हेतुस्वभावानुभवाश्रयाणां सदाप्यभेदान्नहि कर्मभेदः।
तद् बंधमार्गाश्रितमेकमिष्टं स्वयं समस्तं खलु बंधहेतुः॥ ३॥

सं० टी०—हीति-स्फुटं, कर्मभेदः-शुभाशुभप्रकृत्योर्भेदो न, कुतः? हेत्वित्यादि-हेतुः-कारणं, स्वभावः-स्वरूपं, अनुभवः-अनुभूतिः, आश्रयः, द्वंद्वः तेषां सदाप्यभेदात्-शुभाशुभयोः केवलाज्ञानमयहेतुत्वादेकत्वं, केवलपुद्गलमयहेतुत्वात तयोः स्वभावाभेदः शुभोशुभो वा फलपाकः केवलपुद्गलमयः इत्यनुभवाभेदः, केवलपुद्गलमयबंधमार्गाश्रितत्वात् तयोरभेदः, इतिचतुर्विधस्वभावाभेदादेक्यं, तत्-तस्मात् चतुर्भिः प्रकारैरेकत्वसंभवात् एकं कर्म, इष्टं, पूर्वाचार्यैर्मतं कथितमित्यर्थः, स्वयं-स्वतः, खलु इति निश्चितं, समस्तं शुभाशुभं कर्म बंधहेतुः—चतुर्विधबंधानां कारणं, हेतुगर्भितविशेषणमिदं, पुनः किंभूतं? बंधमार्गाश्रितं-मोक्षबंधमार्गौ द्वौ तत्र बंधनदशासमाश्रितं॥ ३॥ अथ सर्वस्यापि कर्मणो बंधहेतुत्वमुशंति—

अर्थ-हेतु स्वभाव अनुभव आश्रय इनि च्यारीनिके सदाही अभेदतैं कर्मविषे भेद नाहीं तातैं बंधका मार्गकूं आश्रय करी कर्म एकही इष्ट किया है, मान्या है। जातैं शुभरूप तथा अशुभरूप दोऊही आप स्वयं निश्चयतैं बंधहीका कारण है॥ ३॥

कर्म सर्वमपि सर्वविदो यद्बन्धसाधनमुशंत्यविशेषात्।
तेन सर्वमपि तत्प्रतिषिद्धं ज्ञानमेव विहितं शिवहेतुः॥ ४॥

सं. टी.—यत्—यस्माद्धेतोः उशंति-वदंति, प्रतिपादयंतीत्यर्थः के? सर्वविदः-सर्वज्ञभट्टारकाः जिनेंद्रा इत्यर्थः, किं? सर्वमपि समस्तमपि, कर्म—शुभाशुभं कर्म, बंधसाधनं—चतुर्विधकर्मबंधनकारणं, कुतः? अविशेषात्-शुभाशुभयोः कर्मबंधनकारणत्वाभेदात् तेन कारणेन, तत्-कर्म, सर्वमपि-समस्तमपि, शुभाशुभं प्रतिषिद्धं-निराकृतं, तर्हि किमादृतं? ज्ञानमेव भेदबोध एव, शिवहेतुः शिवस्य-मोक्षस्य, हेतुः-कारणं, विहितं कथितं, परमागमकोविदैः॥ ४॥ अथ कर्मामार्गनिराकरणे मोक्षावाप्ति विचकयति—

अर्थ-सर्वज्ञदेव हैं ते, सर्वही कर्म, शुभ तथा अशुभकूं अविशेषतैं बंधका कारण कहै हैं, तिसही कारणकरि सर्वही कर्म प्रतिषेध्या है। मोक्षका कारण तौ एक ज्ञानहीकूं कह्या है अब कहै हैं, जो कर्म सर्वही प्रतिषेध्या है, तौ मुनि हैं ते कौनके शरणै आश्रय मुनिपद पालैंगे याके निर्वाहकूं काव्य कहै हैं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निषिद्धे सर्वस्मिन् सुकृतदुरिते कर्मणि किल
प्रवृत्ते नैष्कर्म्ये न खलु मुनयः संत्यशरणाः ।
तदा ज्ञाने (ते) ज्ञानं प्रतिचरितमेषां हि शरणं
स्वयं विंदंत्येते परममममृतं तत्र निरताः ॥ ५ ॥

सं० टी०—किल-इति आगमोक्तौ, खलु-इति निश्चितं मुनयः-मननमात्रभावमात्रतया मुनयः-यतीश्वराः, अशरणाः-शरण्यपथवर्जिताः, न संति-न जायते क सति सर्वस्मिन्-समस्ते, सुकृतदुरिते-शुभाशुभे कर्मणि प्रकृतौ, निषिद्धे-निवृत्ते सति, पुनः नैष्कर्म्ये-कर्मणः निष्क्रांतं निष्कर्म, तस्य भावः नैष्कर्म्यं, तस्मिन् प्रवृत्ते कर्मातीते पथि विजृंभिते सति, हीति-व्यक्तं तदा कर्मरोधादिसमये, एषां योगिनां, ज्ञानं भेदबोध एव, शरणं-आश्रयः, किंभूतं ज्ञानं ? ज्ञाने-चेतनास्वभावे, प्रतिचरितं-प्रवृत्तं व्यापृतमित्यर्थः, एते-योगिनः, स्वयं-प्रयासमंतरेण, विंदंति-लभंते, किं ? परमं उत्कृष्टं, परा-उत्कृष्टा मा-ज्ञानाद्यतिशयलक्षणा लक्ष्मीर्यत्र तत्परममिति वा अमृतं-अपवर्गं, किंभूताः संतः ? तत्र-तस्मिन् ज्ञाते इति ज्ञाने इति पदमत्र ग्राह्यं वा निरताः-निश्शेषमासक्ताः संतः ॥ ५ ॥ अथ ज्ञानस्य शिवहेतुत्वं विध्यापयति—

अर्थ—सुकृत कहिये शुभ आचरणरूप कर्म, बहुरि दुरित कहिये अशुभ आचरणरूप कर्म, ऐसा सर्वही कर्मका निषेध करते संते, बहुरि नैष्कर्म्य कहिये कर्मरहित निवृत्ति अवस्थाकूं प्रवर्तते संते, मुनि हैं ते अशरण नाहीं हैं। इहां ऐसी नाहीं आशंका करनी-जो ए मुनिपद काहे कै आश्रय पालेंगे। जिसकाल निवृत्ति अवस्था प्रवृत्तौ, तिसकाल इनि मुनिनिके ज्ञानविषे लीन भये संते परम उत्कृष्ट अमृतकूं आप स्वयं भोगवे हैं॥ भावार्थ—सर्व कर्मका त्याग भये ज्ञान का वडा शरण है। तिस ज्ञानमैं लीन भये सर्व आकुलतारहित परमानन्दका भोगना होय है, याका स्वाद ज्ञानीही जानै है। अज्ञानी कषायी जीव कर्महीकूं सर्वस्व जानि तामें लीन है, ज्ञानानंदका स्वाद नाहीं जानै है।

यदेतज्ज्ञानात्मा ध्रुवमचलमाभाति भवनं
शिवस्यायं हेतुः स्वयमपि यतस्तच्छिव इति ।
अतोऽन्यद्बंधस्य स्वयमपि यतो बंध इति तत्
ततो ज्ञानात्मत्वं भवनमनुभूतिर्हि विहितं ॥६॥

सं० टी०—ध्रुवं-निश्चितं, यत्-यस्मात्कारणात् एतत्-प्रसिद्धं, शिवस्य सर्वकल्याणरूपस्य मोक्षस्य,-भवनं-गृहं स्थानमिति यावत्। किंभूतं ? अचलं-निश्चलं-अनंतकालस्थायित्वात्, स इत्यध्याहारः, ज्ञानात्मा-ज्ञानमयात्मा, आभाति-चकास्ति-शोभते, अपि-पुनः यतः-यस्माद्धेतोः अयं-ज्ञानात्मा, स्वयं-स्वभावतः हेतुः-शिवस्य कारणं, तत् तस्मात्-स्वयं शिवात्मकत्वात्, शिवहेतुत्वाच्च शिव इति कीर्तितः, तथाऽज्ञानम-भिधत्ते-यतः-यस्माद्धेतोः, अतः-ज्ञानात्मनः, अन्यत्-भिन्नं-अज्ञानात्मा, बंधस्य-कर्मबंधस्य, भवनम् आभाति, अपि-पुनः, स्वयं-स्वतः, बंधस्य हेतुरपि भवतादं तत्-तस्मात् बंधात्मकत्वात्-बंधहेतुत्वाच्च बंध

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति अज्ञानात्मा बंध इति कीर्तितः, हीति स्फुटं ततः—तस्मात् कारणात्, स्वं—स्वकीयं, भवनं—प्रवर्तनं, ज्ञानात्मज्ञानस्वरूपं, विहितं प्रतिपादितं, परमार्थपंडितैः किंभूतं ? अनुभूतिः—स्वस्यानुभवनं अनुभूतिः, अजहल्लिंगवृत्तित्वात्पुल्लिंगे ॥ ६ ॥ अथ ज्ञानस्य वृत्तत्वमनुवर्ण्यते—

अर्थ—जो यह ज्ञानस्वरूप आत्मा ध्रुव है सो जब निश्चल अपने ज्ञानस्वरूप होता सोहै है, सोही यह मोक्षका कारण है। जातैं आप स्वयमेव ही मोक्षस्वरूप है। बहुरि या सिवाय अन्य है सो बंधका कारण है। जातैं सो आप स्वयमेव बंधस्वरूप है, तातैं ज्ञानस्वरूप अपना होना सोही अनुभूति है, ऐसैं निश्चयतैं बंधमोक्षका हेतुका विधान किया है ॥६॥

वृत्तं ज्ञानस्वभावेन ज्ञानस्य भवनं सदा ।
एकद्रव्यस्वभावत्वान्मोक्षहेतुस्तदेव तत् ॥ ७ ॥

सं० टी०—सदा—निरंतरं, वृत्तं चारित्रं, ज्ञानस्वभावेन—रागादिपरिहरणलक्षणबोधस्वरूपेण, ज्ञानस्य—भेदबोधस्य, आत्मनो वा भवनं—प्रवर्तनं, अवस्थानं वा, स्वात्मनि स्थितिः—आत्मनि चारित्रमिति वचनात्। ननु ज्ञानचारित्रयोरेकत्वं कथं तयोः परस्परं भिन्नत्वात् ? इति चेत्सत्यं एकद्रव्यस्वभावत्वात्—एकद्रव्यं—आत्म द्रव्यं, ज्ञानचारित्रयोस्तस्य स्वभावत्वात् ज्ञानभवनतत्स्वभावेन भवनात्, ज्ञानपूर्वकत्वाच्च तस्य, तत् तस्माद्धेतोः, तदेव—निश्चयचारित्रमेव नान्यत् मोक्षहेतुः—मोक्षकारणं ॥ ७ ॥ अथान्याभिमतक्रियाकांडस्य वृत्तत्वं निरुणद्धि—

वृत्तं कर्मस्वभावेन ज्ञानस्य भवनं नहि ।
द्रव्यांतरस्वभावत्वान्मोक्षहेतुर्न कर्म तत् ॥८॥

सं० टी०—कर्मस्वभावेन—व्रततपःप्रभृतिकर्म—क्रियाकांडं तत्स्वभावेन वृत्तं—चारित्रं ज्ञानस्य—बोधस्य, भवनं,प्रवर्त्तनं अनुचरणं न भवेत् ज्ञानभवनस्याभवनात्, कुतः द्रव्यांतरस्वभावत्वात् द्रव्यांतरस्य—आत्मद्रव्यादन्यद्रव्यस्य स्वभावः—स्वरूपं तस्य भावस्तत्त्वं तस्मात् तत् क्रियाकांडं कर्म—आचरणं, मोक्षहेतुः, मोक्षस्य हेतुः—कारणं न भवेत् ॥ ८ ॥ अथ क्रियाकांडस्य मोक्षहेतुत्वं कुतो नेति जंजल्प्यते—

अर्थ—जो ज्ञानस्वभावकरि वर्तना ज्ञानका होना है सो ही मोक्षका कारण है। जातैं ज्ञान के एक आत्मद्रव्यका स्वभावपणा है। बहुरि जो कर्मस्वभावकरि वर्तना है, सो ज्ञानका होना नाहीं, सो कर्मका वर्तना मोक्षका कारण नाही जातैं कर्मकै अन्यद्रव्यका स्वभावपणा है। भावार्थ—मोक्ष आत्माकै होय है, सो आत्माका स्वभावही मोक्षका कारण है ॥ बहुरि कर्म है सो अन्यद्रव्य जो पुद्गलद्रव्य ताका स्वभाव है, सो आत्माकै मोक्षका कारण नाहीं होय है, यह निश्चय है ॥ ७–८ ॥

मोक्षहेतुतिरोधानाद्बंधत्वात् स्वयमेव च ।
मोक्षहेतुतिरोधायिभावत्वात्तन्निषिध्यते ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—तत्-क्रियाकांडं, निषिध्यते-निवार्यते, कुतः ? मोक्षेत्यादि-मोक्षस्य-मुक्तेः, हेतुः-कारणं स्वात्मध्यानादि, तस्य तिरोधानं-अपवारणं, तस्मात् क्रियाकाण्डपरिणतस्य ध्यानानवकाशात्, स्वयमेव-स्वत एव, बंधत्वात्-कर्मबंधस्वभावत्वात्, च-पुनः, मोक्षेत्यादि-मोक्षस्य हेतुः-कारणं-शुद्धध्यानादिः तस्य तिरोभावं दधातीत्येवं शीलो भावः स्वभावो यस्य तस्य भावस्तत्त्वं तस्मात् शुभकर्मकारकपरिणामाविर्भावात् ॥ ९ ॥ अथ समस्तामपि कर्मतितिक्षां संलक्षयति—

अर्थ—कर्म है सो मोक्षके कारणका तिरोधान है-आच्छादन करनेवाला है अर आप स्वयमेव बंधस्वरूप है। बहुरि मोक्षका कारणका तिरोधायीभावपणा याकै है। ऐसे तीन हेतुतैं सो कर्म निषेधिये है ॥९॥

संन्यस्तव्यमिदं समस्तमपि तत्कर्मैव मोक्षार्थिना
संन्यस्ते सति तत्र का किल कथा पुण्यस्य पापस्य वा।
सम्यक्त्वादिनिजस्वभावभवनान्मोक्षस्य हेतुर्भव—
न्नैष्कर्म्यप्रतिबद्धमुद्धतरसं ज्ञानं स्वयं धावति ॥ १० ॥

सं० टी०—तदिदं-प्रसिद्धं, समस्तमपि-निखिलमपि, कर्म-ज्ञानावरणादि प्रकृतिः, संन्यस्तव्यं-त्याज्यमेव निश्चयेन, केन ? मोक्षार्थिना-कर्मणां मोचनं—मोक्षः, स एवार्थः प्रयोजनं पदार्थो वा यस्य स तेन किलेत्यागमोक्तौ पुण्यस्य-शुभकर्मणः, का कथा-का वार्ता ? न कापि वा—अथवा पापस्य-अशुभकर्मणः का वार्ता ? क्व सति ? तत्र—कर्मणि, सन्यस्ते—त्यक्ते सति, पुनस्तथा सति ज्ञानं—भेदबोधः, स्वयं-स्वतः, धावति—शुद्ध्यति—शुद्धं भवति, उल्लसति वा धावु गतिशुद्ध्योरेतस्य धातोः प्रयोगः, किंभूतं ? उद्धतरसं उत्कटस्वभावं, पुनः—नैष्कर्म्यप्रतिबद्धं—नैष्कर्म्येण कर्मातीतत्वेन, प्रतिबद्धं संबद्धं, पुनः—मोक्षस्य-मुक्तेः, हेतुः कारणं भवत्—जायमानम्, कुतः ? सम्यक्त्वेत्यादि—सम्यक्त्वं तत्त्वश्रद्धानं, आदिशब्दात् ज्ञानचारित्रादि स एव निजस्वभावः—आत्मस्वरूपं तेन भवनं-आत्मस्वरूपेण जायमानत्वमित्यर्थः तस्मात् ॥ १० ॥ अथ कर्मणामभावे ज्ञानभाव इति प्ररूपयति—

अर्थ—मोक्षके अर्थी पुरुषकूं यह समस्त कर्म त्यागने योग्य हैं, ऐसे तिससमस्तही कर्मकूं छोडे संते पुण्य अथवा पापकी कहा कथा है ? कर्मसामान्यमें दोऊ आय गये। ऐसे समस्तकर्मका त्याग भये ज्ञान है सो सम्यक्त्व आदिक जो अपना स्वभाव, तिसरूप होनेतै मोक्षका कारण होता संता कर्मरहित अवस्थातैं प्रतिबद्ध उद्धत है रस जाका ऐसा आपै आप दौड्या आवै है।

भावार्थ—कर्मकौं पटकि ज्ञान आपै आप अपना मोक्षका कारणस्वभावरूप भया संता प्रगटै है, फेरि कौन रोकै ? आगै आशंका उपजै है, जो अविरतसम्यग्दृष्टि आदिकै जेतैं कर्मका उदय रहै, तेतै ज्ञान मोक्षका कारण कैसे ? कर्म अर ज्ञान दोऊ लार कैसे रहैं ? ताका समाधानकूं काव्य कहै हैं—

यावत्पाकमुपैति कर्मविरतिर्ज्ञानस्य सम्यङ्‌ न सा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्मज्ञानसमुच्चयोऽपि विहितस्तावन्न काचित्क्षतिः ॥
किं त्वत्रापि समुल्लसत्यवशतो यत्कर्म बंधाय त-
न्मोक्षाय स्थितमेकमेव परमं ज्ञानं विमुक्तं स्वतः ॥ ११ ॥

सं० टी०—यावत्पर्यंतं सा-प्रसिद्धा, कर्मविरतिः-कर्मणां विरतिः विरमणं, सम्यक्-यथोक्तं, पाकं-परिपूर्णतां न उपैति न याति, तावत्पर्यंतं कर्मेत्यादि-कर्म च ज्ञानं च कर्मज्ञाने तयोः समुच्चयः-समुदायः, विहितः कथितः, अपि-पुनः, तावत्-ज्ञानकर्ममेलापकपर्यंतं काचित् क्षतिः-कर्मणां क्षयो न भवेत्, अपि-पुनः, किमु विशेषोऽस्ति ? अत्र-कर्मज्ञानसमुच्चययोर्मध्ये यत् कर्म तत् अवशतः-अवश्यंभावात् बंधाय कर्मबंधनकृते समुल्लसति समुल्लासं गच्छति, विजृंभत इति यावत्, पुनरत्रापि यदा एकमेव कर्मनिरपेक्षं-केवलं यत्-ज्ञानं-बोधः, तत्, मोक्षाय-मुक्तये स्थितं प्रतिष्ठं, किंभूतं ? परमं-उत्कृष्टं, स्वतः-स्वभावेन विमुक्तं कर्मभिः ॥ ११ ॥ अथ नयावलंबित्वमुपशाम्यति—

अर्थ—जेतै कर्मका उदय है अर ज्ञानकी सम्यक् विरति नाहीं है तेतै कर्मका अर ज्ञानका समुच्चय कहिये एकट्ठापणा भी कह्या है, तेतै यामैं कछू हानि नाहीं है। इहां विशेष ऐसा जो इस आत्माविषैं जो कर्मके उदयकी बरजोरीतैं आत्माके वशविना कर्म उदय होय है, सो तौ बंधके ही अर्थी है ॥ बहुरि मोक्षके अर्थि एक परमज्ञान है, सोही है। कैसा है ज्ञान ? कर्मतै आपहीतै रहित है कर्मके करनेविषैं आपका स्वामीपणारूप कर्तापणाका भाव नाहीं है ॥ भावार्थ—जेतै कर्म उदय है तेतैं कर्म तौ अपना कार्य करै है, अर तहांही ज्ञान है, सो अपना कार्य करै है, एक ही आत्मामैं ज्ञान अर कर्म दोऊ एकट्ठे रहनेमेंभी विरोध नाहीं है। मिथ्याज्ञान सम्यग्ज्ञानकै जैसे विरोध है, तैसे कर्मसामान्यकै अर ज्ञानकै विरोध नाही है ॥ ११ ॥ आगैं कर्मका अर ज्ञानका नयविभाग दिखावै है—

मग्नाः कर्मनयावलंबनपरा ज्ञानं न जानंति ये
मग्ना ज्ञाननयैषिणोऽपि सततं स्वच्छंदमंदोद्यमाः।
विश्वस्योपरि ते तरंति सततं ज्ञानं भवंतः स्वयं
ये कुर्वंति न कर्म जातु न वशं यांति प्रमादस्य च ॥ १२ ॥

सं० टी०—मग्नाः-भवार्णवे निमग्नाः, के ? कर्मेत्यादिः-कर्म व्रततपश्चरणादिक्रियाकांडं, तदेव नयः पक्षः कर्मणैव मोक्षसाध्यत्वात् इति पक्षः-तस्य अवलंबनं अंगीकारः, तत्र परास्तत्पराः-सावधानाः-क्रियावादिन इत्यर्थः, तथा चोक्तं—

क्रियाश्च शतधाशीतिश्चतस्रोऽशीतिरक्रियाः। अज्ञानाः सप्तषष्टिश्च द्वात्रिंशद्विनयाश्रिताः ॥ इति कुतः ? यत्-यस्माद्धेतोः ते ज्ञानं भेदबोधं, न जानंति न विदंति, अपि-पुनः, ज्ञानेत्यादि ज्ञानं बोधस्तदेव नयः, ज्ञानव्यतिरिक्तं न किंचिदस्ति यथा इष्टं चरेत् तिष्ठेदित्यादिः ज्ञानाद्वैतवादिपक्षः, ज्ञाने सति साध्यसिद्धिर्न तु तत्र ध्यानमिति वा पक्षः तमिच्छंतीत्येवं शीलाः, ज्ञाननयैषिणः, मग्ना भवार्णवे, कुतः ?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्—यस्माद्धेतोः, अतीत्यादिः यं अति—स्वच्छंदेन—स्वेच्छाचारेण प्रमादमांद्यकरणे मंदः उद्यमः उद्योगो येषां ते, स्वं ज्ञात्वा ध्याने मंदा इत्यर्थः, तर्हि के उन्मग्नाः ? ते—पुरुषा, विश्वस्य-जगतः, उपरि तरंति-जगदतिशायिनो भवंतीति तात्पर्यं, ते के ? ये पुरुषाः, जातु कदाचित्, कर्मक्रियाकांडं न कुर्वंति-न विदधति किंभूताः संतः ? स्वयं कालक्षेत्रादिनिरपेक्षत्वेन, सततं प्रतिक्षणं, ज्ञानं भेदविज्ञानं, भवंतः अनुभवंतः, बोधमयाः—जायमाना वा, च—पुनः, वशं—अधीनत्वं न यांति—न प्राप्नुवंति, कस्य—प्रमादस्य, सदा ज्ञानानुभवनं कर्मप्रमादपरिहरणं मोक्षार्थिन उक्तं ॥ १२ ॥ अथ ज्ञानज्योतिषो विजृंभणं बंभणीति—

अर्थ—जे केई कर्मनयके अवलंबनविषे तत्पर हैं, ताके पक्षपाती हैं, ते डूब जाते, जे ज्ञानकूं जानैंही नाही बहुरि जे ज्ञाननयके इच्छक है पक्षपाती हैं, तेभी डूबे जाते, जे क्रियाकांडको छोडि स्वच्छंद होई प्रमादी होय स्वरूपविषे मंद उद्यमी हैं। बहुरि जे आप निरंतर ज्ञानरूप होते कर्मकूं तौ नाही करै हैं अर प्रमादके वश नाही होय हैं स्वरूपमें उत्साहवान हैं ते सर्वलोकके उपरि तरै हैं॥ भावार्थ—इहां सर्वथा एकांत अभिप्रायका निषेध कीया है, जातै एकांतका अभिप्राय है, सोही मिथ्यादृष्टि है। तहां जे परमार्थभूत ज्ञानस्वरूप आत्माकूं तौ नाहीं जाने हैं अर व्यवहार-दर्शनज्ञानचारित्ररूप क्रियाकांडके आडंबरहीकूं मोक्षका कारण जाणि, तिसहीविषे तत्पर रहै हैं, ताका पक्षपात करै हैं यह कर्मनय है याके पक्षपाती ज्ञानकूं तौ जाने नाहीं अर इस कर्मनयहीविषे खेदखिन्न हैं ते संसारसमुद्रमें डूबे हैं॥ बहुरि जे परमार्थ-भूत आत्मस्वरूपकूं यथार्थ तो जान्या नाही अर मिथ्यादृष्टि सर्वथा एकांतिनिके उपदेशकरि तथा स्वयमेवही किछू अंतरंगविषे ज्ञानका स्वरूप मिथ्या कल्पि तिसविषे पक्षपात करै हैं अर व्यवहारदर्शनज्ञानचारित्रका क्रियाकांडकूं निरर्थक जानि छोडि स्वेछाचारी रहै हैं स्वरूपविषे मंद उद्यमी रहै हैं। तातै जे पक्षपातका अभिप्राय छोडै निरंतर ज्ञानस्वरूप होतै कर्मकांडकूं छोडै हैं, अर निरंतर ज्ञानस्वरूपविषे जेतै न थाम्या जाय तेतै अशुभकर्मकूं छोडि स्वरूपका साधनरूप शुभकर्मकांडविषे प्रवर्ते हैं ते कर्मका नाश करि, संसारतै निवृत्त होय हैं, ते सर्व लोकके उपरि वर्ते हैं, ऐसा जानना ॥ आगै इस पुण्यपापाधिकारकूं सम्पूर्णकरि अर ज्ञानकी महिमा करै हैं—

भेदोन्मादं भ्रमरसभरान्नाटयत्पीतमोहं,
मूलोन्मूलं सकलमपि तत्कर्म कृत्वा बलेन।
हेलोन्मीलत्परमकलया सार्धमारब्धकेलि,
ज्ञानज्योतिः कवलिततमः प्रोज्जजृंभे भरेण ॥ १३ ॥

सं० टी०—भरेण-अतिशयेन, ज्ञानज्योतिः समस्ताखंडज्ञानज्योतिः प्रोज्जजृंभे रूपकालंकारोयं। पुनः हेलोन्मीलत्-हेलया-लीलया, उन्मीलत्-उत्प्रकटयत्, पुनः आरब्धकेलि-आरब्धा-प्रारंभविषयीकृता केलिः क्रीडा येन तत्, सार्धं-समं, कया ? परमकलया परमा-उत्कृष्टा चासौ कला च दर्शनाद्यंशः, मुक्तिकला वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तया, किं कृत्वा ? बलेन-हठात्कारेण, ध्यानलक्षणेन, सकलमपि समस्तमपि, प्रकृत्यादिचतुःस्वभावमपि, तत् प्रसिद्धं कर्मज्ञानावरणादिप्रकृतिः, मूलोन्मूलं—मूलेन बुध्नेन,, उन्मूलं—मूलतलनाशं कृत्वा, किंभूतं ? भेदोन्मादं भेदेन पुण्यपापविशेषेण, उन्मादं–उन्मत्तं पुनः पीतमोहं–पीतः–पानविषयीकृतः मोहः–मोहनीयं कर्म येन पुरुषेण तं प्राणिनं नाटयत्—भवरंगावनौ मनुष्यतिर्यगादिविशेषेण नृत्यं कारयत्, कुतः ? भ्रमरसभरात्—ममेदं, अहमस्येत्यादि भ्रांतिरसवेगात् । अन्योऽपि नटः भ्रमणादिरसादपरं नाटयति इत्युक्तिलेशः ॥ १३ ॥

अर्थ–ज्ञानज्योति है सो अतिशयकरि उदयकूं प्राप्त होता भया सर्वत्र फैल्या । कैसा है लीलामात्रकरि उघडी जो अपनी परमकला केवलज्ञान, तिससहित आरंभी है क्रीडा जाने, इहां भावार्थ ऐसा, जो जेतै सम्यग्दृष्टि छद्मस्थ है तेतै तौ ताका ज्ञान परमकला जो केवलज्ञान, तिससहित शुद्धनयके बलतैं परोक्ष क्रीडा करै है बहुरि केवलज्ञान उपजै तब साक्षात् है ॥ बहुरि कैसा है ? ग्रासीभूत क्रिया है दूरी क्रिया है अज्ञानरूप अंधकार जाने । सो यह ऐसा ज्ञानज्योति पहले कहा करि प्रगट भया है ? पूर्वोक्त शुभ अशुभरूप समस्तकर्म, ताकूं अपना बल जो वीर्य-शक्ति, ताकरि मूलतै उन्मूल कहिये उपाडिकरि । कैसा है यह कर्म ? पीया है मोह जाने । याहीतै भ्रमके रसके भारतै शुभ अशुभका भेदरूप उन्मादकूं नचावता संता है । भावार्थ–ज्ञान-ज्योति है सो अपना प्रतिबंधक कर्म था सो भेदरूप होय नृत्य करे था, ज्ञानकूं भुलावा दे था, ताकूं अपनी शक्तिकरि विगाडि आप अपना संपूर्ण रूपसहित प्रकाशरूप भया । इहां आशय ऐसा जानना–कर्म सामान्यकरि एक ही है, तथापि शुभ अशुभ दोय भेदरूप स्वांग करी रंग-भूमिमें प्रवेश कीया था, ताकूं ज्ञान यथार्थ एक जान लिया, तब कर्म रंगभूमितै निकसि गया, ज्ञान अपनी शक्तिकरि यथार्थप्रकाशरूप भया, ऐसे जानना ॥ एसे कर्म है सो नृत्यके अखाडेमैं पुण्यपापरूपकरि दोय नृत्यकारिणी बनी नाचे था, सो ज्ञान यथार्थ जानि लिया-जो, कर्म एकही है, तब एकरूपकरि निकसी गया, नृत्य करता रह गया ॥

आश्रय कारण रूप सवादसु भेद विचारि गिनै दोऊ न्यारे ।
पुण्य रु पाप शुभाशुभभावनि बंध भये सुखदुःख करारे ॥
ज्ञान भये दोऊ एक लखै बुध आश्रय आदि समान विचारे ।
बंधके कारण हैं दोउरूप इन्हैं तजि श्रीजिन मोक्ष पधारे ॥ १ ॥

इति श्रीसमयसारपद्यस्याध्यात्मतरंगिणीनामधेयस्य व्याख्यायां पुण्यपापैकत्वनिरूपकस्तृतीयोंकः ॥ ३ ॥

ऐसैं इस अध्यात्मतरंगिणीनामा टीकाकीं वचनिकाविषैं तीसरा पुण्यपाप नामा अधिकार पूर्णभया

आस्रवाऽधिकारः ॥ ४ ॥

शुभचंद्रामृतचंद्रो भिनत्ति यत्तामसं सुतत्त्वेषु ।
पुण्येतरेषु च तद्धि न भिद्यते दीपचंद्राकैंः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुभं-प्रशस्तं पुन्यादि चंद्रयति--आह्लादयति इति शुभचंद्रः स चासौ अमृतचंद्रश्च इति व्याख्यानं विधेयं । अथास्रवमाश्रयति–

दोहा–द्रव्यास्रवतैं भिन्न ह्वै, भावास्रव करि नास ।

भये सिद्ध परमातमा, नमूं तिनहि सुखआस ॥

अब इहां आस्रव प्रवेश करै है ।। जैसैं नृत्यके अखाडेमैं नाचनेवाला स्वांग करी प्रवेश करै तैसैं इहां आस्रवका स्वांग है तहां इस स्वांगकूं यथार्थ जाननेवाला सम्यग्ज्ञान है ; ताकी महिमारूप मंगल करै हैं–

अथ महामदनिर्भरमंथरं, समररंगपरागतमास्रवं ।

अयमुदारगभीरमहोदयो, जयति दुर्जयबोधधनुर्धरः ॥ १ ॥

सं० टी०—अथ—पुण्यपापतत्त्वकथनानंतरं, अयं-प्रसिद्धः दुर्जयबोधधनुर्धरः-दुखेन जीयते इति दुर्जयः स चासौ बोधश्च ज्ञानं स एव धनुर्धरः-धानुष्कः, जयति, कं ? आस्रवं, आस्रवति कर्म येन स आस्रवस्तं निराकरोतीत्यर्थः, किंभूतः ? उदारेत्यादिः-उदारः-उत्कटः स चासौ गभीरश्च-अलब्धमध्यः,-महानुदयो यस्य सः, किंभूतं तं ? महेत्यादिः महांश्चासौ मदश्च--अहंकारस्तस्य निर्भरः अतिशयः, तेन मंथरः-मेदुरः तं, पुनः कीदृशं ? समरेत्यादिः-समरः संग्रामस्तस्य रंगः-अंगणं, तत्र आगतः-समुपस्थितः तं, ज्ञानपराभवार्थमुद्युक्तमित्यर्थः ॥ १ ॥ अथ ज्ञाननिर्वृत्तं भावं समुत्साहयति–

अर्थ–अथ शब्द तौ मंगल तथा प्रारंभवाची है। सो इहांतैं आगे कहै हैं। जो काहूकरि जीत्या न जाय ऐसा यह अनुभवगोचरज्ञानरूप सुभट धनुषधारी है, सो आस्रव है ताहि जीतै है। कैसा है ज्ञानरूप सुभट ? उदार कहिये अमर्यादरूप फैलता अर गंभीर कहिये जाका छद्मस्थ थाह न पावे ऐसा है महान उदय जाका ।। बहुरि आस्रव कैसा है ? महान जो मद ताकरि अतिशयकरि भरचा मंथर है उन्मत्त है बहुरि कैसा है समररंग कहिये संग्रामभूमि ताविषै आया है ॥ भावार्थ–इहां नृत्यके अखाडेमैं आश्रव प्रवेश कीया सो नृत्यमें अनेकरस वर्णन होय है, तातैं रसवत् अलंकारकरि शांतरसमैं वीररस प्रधानकरि वर्णन कीया है। जो ज्ञानरूप धनुषधारी आस्रवकूं जीतै हैं, सो आश्रव सर्व जगतकूं जीति मदोन्मत्त भया संग्रामकी रंगभूमीमैं आय खडा रह्या, तब ज्ञान यासूं भी बलवान् सुभट है, सो तत्काल जीतै है, अंतर्मुहूर्तमें कर्मका नाशकरि केवलज्ञान उपजावै है। ऐसा ज्ञानका सामर्थ्य है ॥

भावो रागद्वेषमोहैर्विना यो जीवस्य स्याज्ज्ञाननिर्वृत्त एव ।

रुंधन् सर्वान् द्रव्यकर्मास्रवौघानेषोऽभावः सर्वभावास्रवाणां ॥ २ ॥

सं० टी०-एषः-कथ्यमानः,-अभावः,स्यात् भवेत्,-केषां ? सर्वेत्यादि-सर्वे च ते भावास्रवाश्च रागद्वेषमोहाद्याः तेषां,एष कः ? यः,एव-निश्चयेन,जीवस्य-प्राणिनः,ज्ञाननिर्वृत्तः-ज्ञानमयः,भावः-चित्परिणामः,राग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वेषमोहैः-रागः-रतिः, द्वेषः-अरतिः, मोहः—ममत्वं, द्वंद्वः, तैर्विना-अंतरेण, किं कुर्वन्? रुंधन्-निवारयन्, कान्? सर्वान्-समस्तान्, द्रव्येत्यादिः-द्रव्यकर्मणां-ज्ञानावरणादिप्रकृतीनां, आस्रवौघान्-मिथ्यात्वाविरतिकषाययोगसमूहान्। रागद्वेषमोहानामिह स्वपरिणामनिमित्तत्वात् अजडत्वे सति चिदाभासत्वात् भावास्रवत्वं, मिथ्यात्वाविरतिकषाययोगानां पुद्गलपरिणामानां ज्ञानावरणादिपुद्गलकर्मास्रवणनिमित्तत्वाद् द्रव्यास्रवत्वं ॥ २ ॥ अथ ज्ञानिनो निराश्रवत्वं श्रद्दधीति—

अर्थ—जो जीवका रागद्वेषमोहविना भाव होय है, सो भाव ज्ञानहीकरि रचा हुआ है सो यह भाव है सो सर्व द्रव्यास्रवनिकूं रोकता संता है, तातैं सर्वही भावास्रवनिका अभाव कहिये भावार्थ-पूर्वोक्तही जानना ॥ इहां सर्व भावास्रवनिका अभाव कह्या सो संसारका कारण मिथ्यात्वही है तिस संबंधी रागादिकका अभाव भया, सो सर्वभावास्रवका अभाव भया ॥

भावास्रवाभावमयं प्रपन्नो द्रव्यास्रवेभ्यः स्वत एव भिन्नः ।
ज्ञानी सदा ज्ञानमयैकभावो निरास्रवो ज्ञायक एक एव ॥ ३ ॥

सं० टी०—अयं-ज्ञानी-भेदज्ञः, निरास्रव एव-द्रव्यभावास्रवेभ्यो निवृत्त एव, एकः-अद्वितीयः ज्ञायकः, किंभूतः? सदा नित्यं, ज्ञानमयैकभावः-ज्ञानेन निर्वृत्तः ज्ञानमयः स एव एको भावः स्वभावो यस्य सः, किंभूतः भावास्रवाभावं-भावाश्रवाणां रागद्वेषादीनां, अभावं प्रपन्नः-प्राप्तः, यावत्पर्यंतं रागद्वेषास्तावन्न ज्ञायकत्वं अतः ज्ञायकत्वे सति रागद्वेषलक्षणभावास्रवाभावः, पुनस्तत एव—स्वभावत एव, द्रव्यास्रवेभ्यः-मिथ्यात्वादिभ्यो भिन्नः पृथग्भूतः, ये पूर्वमज्ञानेन मिथ्यात्वादयो द्रव्यास्रवा बद्धास्ते ज्ञानिनो द्रव्यांतरभूता अचेतनपुद्गलपरिणामत्वात् पृथ्वीसमा अचेतनास्ते तु स्वतः कार्मणशरीरेणैव संबद्धा नत्वात्मना, अतः सिद्धः स्वभावतो ज्ञानिनो द्रव्यास्रवाभावः, बुद्धिपूर्वकरागद्वेषमोहरूपाश्रवभावाभावान्निराश्रव एव ॥ ३ ॥ अथ ज्ञानिनो निरास्रवत्वं नियम्यते—

अथ—यह ज्ञानी है सो भावास्रवके अभावकूं तौ प्राप्त भया है। बहुरि द्रव्यास्रवनितैं स्वयमेवही भिन्न है जातैं ज्ञानी है, सो सदा ज्ञानमयीही है केवल एक भाव जाका ऐसा है, यातैं निरास्रवही है, एक ज्ञायक ही है। भावार्थ—भावास्रव जे राग द्वेष मोह तिनिका तौ ज्ञानीकै अभाव भया। अर द्रव्यास्रव हैं, ते पुद्गल परिणाम हैं तिनतैं सदाही स्वयमेव ही भिन्न है तातैं ज्ञानी निरास्रव ही है ॥

संन्यस्यन्निजबुद्धिपूर्वमनिशं रागं समग्रं स्वयं
वारंवारमबुद्धिपूर्वमपि तं जेतुं स्वशक्तिं स्पृशन् ॥
उच्छिंदन् परवृत्तिमेव सकलां ज्ञानस्य पूर्णो भव-
न्नात्मानित्यनिरास्रवो भवति हि ज्ञानी यदा स्यात्तदा ॥ ४ ॥

सं० टी०—हीति व्यक्तं, आत्मा—चिद्रूपः, यदा-यस्मिन् काले नित्यं निरास्रवः-निरंतरमास्रवभावातीतः, भवति-जायते, तदा तस्मिन् समये, ज्ञानी सकलवस्तुपरिच्छेदकज्ञानयुक्तः स्याद्-भवेत्, ननु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संसारदशायां कथं निरास्रवत्वमिति चेत् ? अनिशं नित्यं स्वयं कर्तृत्वेन समग्रं-समस्तं, रागद्वेषमोहमयं भावास्रवं संन्यस्यन्-त्यजन्-परिहरन्, निजबुद्धिपूर्वं-स्वबुद्धिपूर्वकं-स्वाभिप्रायपूर्वकं रागं त्यजन्नित्यर्थः, अपि-पुनः,तं-द्रव्यरूपमिथ्यात्वाद्यास्रवं,अबुद्धिपूर्वं पूर्वनिबद्धाचेतनास्रवं-स्वाभिप्रायातिरिक्तं, सूक्ष्मं-अज्ञानस्वरूपं, अकषायिणामास्रवसदृशं वा अबुद्धिपूर्वं, वारं वारं-पुनः पुनः, जेतुं-जयार्थं-नाशार्थमित्यर्थः, स्वशक्तिं स्वस्य आत्मनः शक्तिं-सामर्थ्यं,स्पृशन्-स्वसात्कुर्वन्,पुनः किंकुर्वन् ? उच्छिन्दन्-उच्छिदन्,समूलं कर्षन्नित्यर्थः, कां ? सकलां-समस्तां एव-निश्चयेन, परवृत्तिं-परेषु-आत्मव्यतिरिक्तपदार्थेषु वृत्तिः-प्रवर्तना तां, तत्रानुचरणमिति भावः, पुनः पूर्णः-परिपूर्णः समग्र इत्यर्थः, भवन्-जायमानो भावः कस्य ? ज्ञानस्य वस्तुविशेषग्राहकस्य ॥ ४ ॥ अथ ज्ञानिनो द्रव्यप्रत्यये सति न निरास्रवत्वमिति पूर्वपक्षपूर्वकं पद्यद्वयेन प्रत्युत्तरयति—

अर्थ—यह आत्मा जब ज्ञानी होय है तब अपने बुद्धिपूर्वक रागकूं तौ समस्तकूं आप दूरि करता संता निरंतर प्रवर्त्तै है, बहुरि अबुद्धिपूर्वक रागकूं भी जीतनेकूं बारंबार अपनी ज्ञानानुभवनरूप शक्तीकूं स्पर्शता संता प्रवर्तै है बहुरि ज्ञानकी पलटनी है ताकूं समस्तहीकूं दूरी करता संता ज्ञानकूं स्वरूपविषैं थांमता पूर्ण होता संता प्रवर्तै है। ऐसा ज्ञानी होय तब शाश्वता निरास्रव होय है ॥ भावार्थ तौ सुगम है—जब समस्तरागकूं हेय जान्या तब ताका मेटनेहीका उद्यमी भया प्रवर्तै है। तब सदा निरास्रव ही कहिये जाते आस्रव के भावनिकी भावनाका अभिप्रायका याकै अभाव है। बहुरि इहां बुद्धिपूर्वक अबुद्धिपूर्वक दोय सूचना है। एक तौ जो आप कीया न चाहै अर परनिमित्ततैं जबरीतैं होय ताकूं आप जाणैभी तोऊ ताकूं बुद्धिपूर्वक कहिये। बहुरि दूजा जो अपने ज्ञानगोचरही नाही प्रत्यक्षज्ञानी जानैं है। तथा ताकै अविनाभाविचिन्हकरि अनुमानतैं जानिये सो अबुद्धिपूर्वक है ऐसैं जानना ॥ ४ ॥ आगै पूछै है जो सर्वही द्रव्यास्रवकी संततीकूं जीवते ज्ञानी निरास्रव कैसैं ? ऐसे प्रश्नका श्लोक है

विशेष—संस्कृत टीकाकारने " जिससमय यह आत्मा निरंतर आस्रवभावसे रहित होजाता है उससमय ज्ञानी—संसारके समस्तपदार्थोंका भलेप्रकार जानकार होता है" यह अर्थ किया है और पं० जयचंद्रजीने—'जिससमय यह आत्मा ज्ञानी हो बुद्धिपूर्वक राग आदिको दूरकर प्रवृत्ति करता है उससमय इसके शाश्वत निरास्रव होता है' यह अर्थ किया है यद्यपि यहां विरोधसा तो प्रतीत होता है परन्तु वास्तवमें कुछ विरोध नहीं है क्योंकि संस्कृत टीकाकारने ज्ञानीका केवल ज्ञानी अर्थ अभीष्ट रक्खा है और भाषाटीकाकारने ज्ञानीपदसे भेदविज्ञानी अर्थ लिया है तथा प्रकृतमें दोनोंही अर्थ उत्तम हैं ॥ ४ ॥

सर्वस्यामेव जीवंत्यां द्रव्यप्रत्ययसंततौ ।
कुतो निरास्रवो ज्ञानी नित्यमेवेति चेन्मतिः ॥ ५ ॥

सं० टी०—ननु ज्ञानी-भेदज्ञः, नित्यं, निरास्रवः-आस्रवरहितः कुतः ? न कुतोऽपि ! क सत्यां ? सर्वस्यां-समस्तायां अपि, द्रव्यप्रत्ययसंततौ-द्रव्यप्रत्ययानां-पुद्गलरूपनिबद्धमिथ्यात्वादीनां, संततिः-संतानं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्यां जीवंत्यां-विद्यमानायां सत्यामेव । अथ तदा तदुदयाभावान्निरास्रव इति भण्यते तदप्यसत्, यतः सदवस्थायां पूर्वमनुपभोग्यत्वेऽपि तदात्वपरिणीतबालस्त्रीवत्, विपाकावस्थायामुपभोग्यत्वात् उपभोगप्रायोग्यं पुद्गलकर्म प्राप्तयौवनपूर्वपरिणीतस्त्रीवत् इति न निरास्रवत्वमिति चेत् ते मतिः-मनीषा ॥ ५ ॥ तत्रोत्तरयति—

अर्थ-ज्ञानीकै सर्वही द्रव्यास्रवकी संततिकूं जीवते संते ज्ञानी नित्यही निरास्रव है ऐसा काहेतैं कह्या ? जो शिष्यकी ऐसी आशंकारूप बुद्धि है, ताका उत्तरका श्लोक कहै हैं—

विजहति न हि सत्तां प्रत्ययाः पूर्वबद्धाः समयमनुसरंतो यद्यपि द्रव्यरूपाः ।
तदपि सकलरागद्वेषमोहव्युदासादवतरति न जातु ज्ञानिनः कर्मबंधः ॥ ६ ॥

सं० टी०—हि-स्फुटं, यद्यपि ज्ञानिनः पुंसः, द्रव्यरूपाः-पुद्गलकर्मरूपमिथ्यात्वादयः, पूर्वबद्धाः-पूर्वं रागद्वेषादिभिः बद्धाः-निबद्धाः-आत्मसात्कृता इत्यर्थः, प्रत्ययाः-उत्तरकर्मबंधकारणानि, सत्तां-अस्तित्वं, न विजहति, न त्यजंति समयं-उदयकालं, अनुसरंतः-आश्रयंतः, उदयमागच्छंत इत्यर्थः, तदपि-तथापि, जातु कदाचित्, कर्मबंधः-कर्मणां बंधः, न अवतरति-अवतारं न प्राप्नोति-न भवतीत्यर्थः, कस्य ? ज्ञानिनः, कुतः सकलेत्यादिः-सकलाः समस्तास्ते च ते रागद्वेषमोहाश्च तेषां व्युदासः-परित्यागस्तस्मात् रागद्वेषमोहानां आस्रवभावानामभावे द्रव्यप्रत्ययानामबंधहेतुत्वात् कारणाभावे कार्यस्याप्यभावात् ॥ ६ ॥ अथ पुनर्बंधाभावो विभाव्यते—

अर्थ-यद्यपि पूर्वैं अज्ञान अवस्थामैं बंधरूप भये थे, ते द्रव्यरूप प्रत्यय कहिये द्रव्यास्रव, ते सत्तामैं विद्यमान हैं । जातैं तिनिका उदय अपनी स्थितिके अनुसार है, तातै जेतै उदयका समय नाहीं आवै तेतैं सत्ताहीमैं रहैं ऐसैं द्रव्यास्रव सत्तामैं रहैं ते अपनी सत्ताकूं नाहीं छोडै हैं । तौऊ ज्ञानीकै समस्त राद्वेषमोहका अभावतैं नवीनकर्मका बंध कदाचित् ही अवतार नाही धरै है ॥ भावार्थ-रागद्वेषमोहभावविना सत्ताका द्रव्यास्रव बंधका कारण नाहीं है । इहां सकल रागद्वेषमोहका अभाव बुद्धिपूर्वक अपेक्षा जानना ॥

रागद्वेषविमोहानां ज्ञानिनो यदसंभवः ।
तत एव न बंधोऽस्य ते हि बंधस्य कारणं ॥ ७ ॥

सं० टी०—तत एव-तस्माद्धेतोः, निश्चयेन, अस्य-ज्ञानिनः-मुनेः, बंधः-कर्मणां बंधः, न, कुतः ? यत्-यस्मात्कारणात्, ज्ञानिनः ज्ञानं-आत्मज्ञानं, विद्यते यस्यासौ तस्य, असंभवः-न संभवः, केषां ? रागद्वेषविमोहानां-रागश्च द्वेषश्च विमोहश्च रागद्वेषविमोहास्तेषां, ननु तेषामभावे कथं बंधाभावः हीति यस्मात् ते रागद्वेषादयः, बंधस्य-कर्मबंधस्य कारणं-हेतुः, हेतुत्वाभावे हेतुमदभावस्य सुप्रसिद्धत्वात् ॥ ७ ॥ अथ बंधविधुरत्वं विधीयते—

अर्थ-जातैं ज्ञानीकै रागद्वेषमोहका असंभव है, ताहीतैं ज्ञानीकै बंध नाहीं है । जातैं राग द्वेष मोह हैं ते ही बंधके कारण हैं ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अध्यास्य शुद्धनयमुद्धतबोधचिह्नमैकाग्र्यमेव कलयंति सदैव ये ते।
रागादिमुक्तमनसः सततं भवंतः पश्यंति बंधविधुरं समयस्य सारं ॥८॥

सं० टी०—ते–योगिनः, समयस्य—पदार्थस्य सिद्धांतस्य वा सारं–आत्मानं पश्यंति–ईक्षंते, किंभूतं ? बंधविधुरं–बंधैः प्रकृतिस्थित्यादिकर्मबंधैर्विधुरं–रहितं, बंधशून्यमित्यर्थः किंभूताः ? रागादिमुक्तमनसः–रागद्वेषमोहैर्मुक्तानि—रहितानि, मनांसि चेतांसि येषां ते, भवंतः—जायमानाः संतः, सततं–निरंतरं, ते के ? ये पुरुषाः सदा—नित्यं, एव निश्चयेन, कलयंति–कलनां कुर्वंति, धारयंतीत्यर्थः, किं ? ऐकाग्र्यं—एकाग्रतां आत्मना सह एकता तां, किं कृत्वा ? अध्यास्य–आश्रित्य–अंगीकृत्य–ध्यात्वेत्यर्थः, कं ? शुद्धनयं शुद्धकर्ममलकलंकरहितं स्वरूपं नयति—प्राप्नोति शुद्धनयः–आत्मा, तं, अथवा शुद्धद्रव्यार्थिकनयमाश्रित्य, किंभूतं ? उद्धतेत्यादि–उद्धतः—उत्कटः—कर्मविनाशकत्वात् स चासौ बोधः—ज्ञानं च स एव चिह्नं–लक्षणं यस्य स तं ॥ ८ ॥ अथ बंधत्वमनुबध्नाति—

अर्थ—जे पुरुष शुद्धनयकूं अंगीकार करी निरंतर एकाग्रपणाका अभ्यास करै हैं कैसा है शुद्धनय ? उद्धतबोध कहिये काहूका दाब्या न दबै ऐसा उज्वलज्ञान सो है चिन्ह जाका सो इसका अवलंबन करनेवाले पुरुष रागादिककरि रहित है मन जिनिका ऐसे निरंतर होते संते, बंधकरि रहित जो समयसार–अपना शुद्ध आत्मस्वरूप, ताहि अवलोकन करै हैं ॥ भावार्थ–इहां शुद्ध नयकरि एकाग्र होना कह्या सो साक्षात् शुद्धनयका होना तो केवलज्ञान भये होय है। अर शुद्धनय है सो श्रुतज्ञानका अंश है सो इसके द्वारे शुद्धस्वरूपका श्रद्धान करना तथा ध्यानकरि एकाग्र होना है सो यह परोक्ष अनुभव है। एकदेश शुद्धकी अपेक्षा व्यवहारकरि प्रत्यक्ष भी कहिये ॥ ८ ॥ फेरि कहे हैं जे यातैं चिगै हैं ते कर्म बांधै हैं–

प्रच्युत्य शुद्धनयतः पुनरेव ये तु रागादियोगमुपयांति विमुक्तबोधाः।
ते कर्मबंधमिह बिभ्रति पूर्वबद्धद्रव्यास्रवैः कृतविचित्रविकल्पजालं । ९ ।

सं० टी०—इह–जगति, ते–प्राणिनः, कर्मबंधं बिभ्रति–दधते किंभूताः ? विमुक्तबोधाः–विमुक्तो बोधो ज्ञानं यैस्ते बोधाद्विमुक्ताः, इति वा 'कृति समासे क्वचित्पूर्वनिपातः' किंभूतं तं ? कृतेत्यादिः–विचित्राः शुभाशुभरूपास्ते च ते विकल्पाश्च तेषां जालं समूहः, कृतं–निष्पादितं, विचित्रविकल्पजालं येन तं, कैः ? पूर्वबद्धद्रव्यास्रवैः–अनादिनिबद्धपूर्वमिथ्यात्वादिद्रव्यास्रवैः, ते के ? ये तु इति विशेषः, ये पुरुषाः, रागादियोगं रागद्वेषादीनां योगं—संयोगं, उपयांति–प्राप्नुवंति, पुनरेव—पूर्वज्ञानावस्थानात् पश्चादेव, शुद्धनयतः शुद्धस्वरूपात्मनः, प्रच्युत्य च्युत्वा, ॥ ९ ॥ अथ बंधाबंधयोस्तात्पर्यं पंक्त्यते—

अर्थ–बहुरि जे पुरुष शुद्धनयतै छूटिकरि फेरि रागादिके योग कहिये संबंधकूं प्राप्त होय हैं, ते छोड्या है ज्ञान जिनिने ऐसे भये संते कर्मबंधकूं धारै हैं। कैसा कर्मबंधकूं धारै हैं ? पूर्वे बंधे जे द्रव्यास्रव तिनिकरि कीया है विचित्र अनेक प्रकार विकल्पनिका जाल जाने ॥ भावार्थ–फेरि शुद्धनयतै चिगै तौ रागादिकके संबंधतै द्रव्यास्रवके अनुसार अनेक भेद लिये कर्मनिकूं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बांधे है। नयतैं चिगना यह जो फेरि मिथ्यात्वका उदय आय जाय तब बंध होने लगिजाय। जातैं इहां मिथ्यात्वसंबंधी रागादिकतैं बंध होनेकी प्रधानता कही है अर उपयोगकी अपेक्षा गौण है। शुद्धोपयोगरूप रहनेका काल अल्प है। तातैं ताका छूटनेकी अपेक्षा इहां नाहीं॥ अन्य ज्ञेयतैं ज्ञान उपयुक्त होय तौऊ मिथ्यात्वविना रागका अंश है, सो ज्ञानीके अभिप्राय-पूर्वक नाहीं। तातैं अल्पबंध संसारका कारण नाहीं। अथवा उपयोगकी अपेक्षा लीजिये तब शुद्धस्वरूपतैं चिगे सम्यक्त्वतैं न छूटे। तब चारित्रमोहका रागतैं किछू बंध होय है, सो अज्ञान की पक्षमें नाहीं गिनिये,अर बंध है ही। ताकूं मेटनेकूं शुद्धनयतैं न छूटनेका अर शुद्धोपयोगमें लीन होनेका सम्यग्दृष्टि ज्ञानीकूं उपदेश है ऐसे जानना॥

इदमेवात्र तात्पर्यं हेयः शुद्धनयो न हि।
नास्ति बंधस्तदत्यागात्तत्यागाद् बंध एव हि॥ १०॥

सं० टी०—अत्र—बंधाबंधविचारणे—इदमेव—वक्ष्यमाणलक्षणमेव तात्पर्यं—रहस्यं, इदं किं? हीति यस्मात्, शुद्धनयः शुद्धात्मा—शुद्धद्रव्यार्थिको वा, न हेयः—न त्याज्यो हितार्थिभिः। बंधः—कर्मबंधः, नास्ति-न जायते, कुतः? तदत्यागात् तस्य—शुद्धनयस्य, अत्यागः-अत्यजनं, तस्मात्, हि-पुनः, बंध एव कर्मबंधो भवत्येव, कुतः? तत्त्यागात्-तस्य—शुद्धनयस्य त्यागः-त्यजनं तस्मात्॥ १०॥ अथ शुद्धनयस्या-त्यागमामनुते—

अर्थ-इहां पहले कथनविषै यह तात्पर्य है, जो शुद्धनय है सो त्यागने योग्य नाहीं है यह उपदेश है जातैं तिस शुद्धनयके अत्यागतैं तौ कर्मका बंध नाहीं होय है। बहुरि तिसके त्यागतैं कर्मका बंध होय ही है॥ १०॥ फेरि तिस शुद्धनयहीके ग्रहणकूं दृढ करते संते काव्य कहै है—

धीरोदारमहिम्न्यनादिनिधने बोधे निबध्नन् धृतिं
त्याज्यः शुद्धनयो न जातु कृतिभिः सर्वंकषः कर्मणां।
तत्रस्थाः स्वमरीचिचक्रमचिरात्संहृत्य निर्यद्बहिः
पूर्णज्ञानघनौघमेकमचलं पश्यंति शांतं महः॥ ११॥

सं० टी०—जातु-कदाचित्, न त्याज्यः-न हेयः, ध्यानतः क्षणान्न मोक्तव्यः, कः? शुद्धनयः-शुद्ध-परमात्मा, शुद्धद्रव्यार्थिकनयो वा, कैः? कृतिभिः-संसारदशाचक्रं परिपूर्णं कृतं विद्यते येषां तैः अथवा कृतं-सुकृतं विद्यते येषां तैः योगिभिः, किंभूतः सः? सर्वंकषः-सर्व-समस्तं, कषति—निहंतीति सर्वंकषः, 'सर्वकूलाभ्रकरीषेषु कषः' इत्यनेन सूत्रेण सिद्धः, केषां? कर्मणां—ज्ञानावरणादि प्रकृतीनां, किंकुर्वन्, निबध्नन् कुर्वन्, कां? धृतिं-संतोषं, क? बोधे—ज्ञाने, किंभूते? धीरोदारमहिम्नि-धीरः-अक्षोभ्यत्वात्, उदारः उत्कटः कर्मविनाशे बद्धकक्षत्वात् धीरश्चासावुदारश्च वा द्वंद्वः महिमा,महिमानौ वा यस्य तस्मिन् पुनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किंभूते ? अनादिनिधने–आद्यंतरहिते द्रव्यरूपेण नित्यत्वात्, तत्रस्थाः–तत्र–शुद्धनये, तिष्ठन्तीति तत्रस्थाः योगिनः, महः–धाम, पश्यंति–ईक्षंते, किंकृत्य ? अचिरात्–शीघ्रं, संहृत्य–हृत्वा, विनाश्येत्यर्थः, किं ? स्वेत्यादि–स्वस्य–आत्मनः स्वस्मिन् वा मरीचिचक्रं–मृगतृष्णासमूहं, किंभूतं महः ? बहिः बाह्यं, निर्यत् प्रकटीभवत् पूर्णं–परिपूर्णं निरावरणत्वात्, ज्ञानेत्यादि–ज्ञानेन घनो–निरंतरः ओघः–समूहः, यत्र तत्, एकं–अद्वितीयं–ज्ञानसदृक्षस्यापरस्याभावात् अचलं–अक्षोभ्यं, शांतं क्रोधादेरभावात् ॥ ११ ॥ अथ रागादीनामभावे किं स्यादित्यध्येति—

अर्थ–पुण्यवान् महंतपुरुषनिकरि शुद्धनय है सो कदाचित्भी छोडनेयोग्य नाही है ॥ कैसा है शुद्धनय ? ज्ञानविषे थिरताकूं अतिशयकरि बांधता संता है। कैसा ज्ञानविषैं थिरता बांधे है ? धीर कहिये चलाचलपणेतै रहित अर उदार कहिये सर्वपदार्थनिमें आप विस्तरता है महिमा जाकी। बहुरि कैसा है ज्ञान ? अनादिनिधन है-जाका आदि अन्त नाहीं है। बहुरि कैसा है शुद्धनय कर्मनिका सर्वंकष कहिये मूलतै नाश करनहारा है। ऐसे शुद्धनयके विषैं जे तिष्ठे हैं, ते पुरुष अपनी ज्ञानकी मरीचि कहिये व्यक्तिविशेष, तिनिकूं तत्काल समेटिकरि कर्मके पटलतै बाह्य निसरता अर संपूर्णज्ञानघनका समूहस्वरूप निश्चल जो शांतरूप कहिये ज्ञानमयी तेज प्रतापका पुञ्ज, ताही अवलोकन करे हैं॥ भावार्थ—शुद्धनय है सो आत्माकूं ज्ञानमय तेज प्रतापका पुंज ताहि एक चैतन्यमात्र समस्तज्ञानके विशेषनिकूं गौण करि, अर समस्त-परनिमित्ततै भये भावनिकूं गौण करि, शुद्ध नित्य अभेदरूप एककूं ग्रहण करे है॥ सो ऐसे शुद्धनयका विषयस्वरूप अपना आत्माकूं जे अनुभवै हैं-एकाग्र होय तिष्ठै हैं, ते समस्त कर्मका समूहतैं न्यारा संपूर्ण ज्ञान जो केवलज्ञानस्वरूप अमूर्तिक पुरुषाकार वीतराग ज्ञानमूर्तिस्वरूप अपना आत्मा, ताहि अवलोकन करे हैं॥ या शुद्धनयके विषै अंतर्मुहूर्त तिष्ठै शुक्लध्यानकी प्रवृत्ति होयकरि केवलज्ञान उपजै है, ऐसा याका माहात्म्य है॥ सो याकूं अवलंबन करि फेरि जेतै केवलज्ञान न उपजै तेतै यातै चिगना नाही, ऐसा श्रीगुरुनिका उपदेश है॥ ऐसैं आस्रवका अधिकार पूर्ण किया॥ अब रंगभूमिमैं आस्रवका स्वांग प्रवेश भया था, ताकूं ज्ञान यथार्थ जाणि स्वांग दूरि कराय आप प्रगट भया, ऐसे ज्ञानकी महिमाके अर्थरूप काव्य कहै हैं—

विशेष—पं० जयचंद्रजीने यहां मरीचिचक्रका अर्थ 'व्यक्तिविशेष' किया है जिसका अर्थ मतिज्ञान श्रुतज्ञान आदि पर्याय हैं क्योंकि जिससमय केवलज्ञान उत्पन्न होता है उससमय मतिज्ञान आदिज्ञानरूप पर्यायें संकुचित हो जाती हैं ज्ञानकी अकेली केवलज्ञानरूप पर्याय ही विद्यमान रहजाती है शुभचन्द्रजीने उसका अर्थ मृगतृष्णा लिखा है॥ ११॥

रागादीनां झगिति विगमात् सर्वतोऽप्यास्रवाणां
नित्योद्योतं किमपि परमं वस्तु संपश्यतोऽतः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्फारस्फारैः स्वरसविसरैः प्लावयत्सर्वभावा-
नालोकांतादचलमतुलं ज्ञानमुन्मग्नमेतत् ॥ १२ ॥

सं० टी०—एतत्–ज्ञानं–बोधः, उन्मग्नं–प्रकटितं, किमपि–अतिशायि, अनिर्वाच्यं वस्तु–वसति गुणपर्यायानिति वस्तु, कस्य अंतः–मध्ये संपश्यतः–अवलोकयतो मुनेः, किंभूतं ? नित्योद्योतं–नित्यं प्रकाशमानं यद्यपि लब्ध्यपर्याप्तकस्य निगोदस्य महानुभागज्ञानावरणावृतस्य नित्योद्योतत्वं न तथापि पर्यायाख्यस्य लब्ध्यक्षरापरनामधेयस्याक्षरानंतभागशक्तेः निरावरणत्वं—नित्योद्योतत्वं आत्मनोऽस्त्येव, पुनः–परमं–परा–उत्कृष्टा इन्द्राद्यतिशायिनी मा ज्ञानादिलक्ष्मीर्यस्य तत्, कुतोऽतरवलोकनं ? झगिति शीघ्रं, सर्वतोऽपि–सर्वरूपेणापि रागादीनां–रागद्वेषमोहलक्षणभावास्रवाणां प्रत्ययानां, विगमात्–अभावात्, किंभूतं ज्ञानं ? आलोकांतात्–श्रेणिघनमात्रत्रिलोकमभिव्याप्य, सर्वभावान्–समस्तपदार्थान्, प्लावयत्–सिंचयत्–परिच्छिंददित्यर्थः, कैः ? स्वरसविसरैः–– स्वस्य–आत्मनः, रसः, तस्य विसराः—संदोहाः, तैः, किंभूतैः ? स्फारस्फारैः–स्फारात्–आकाशात्, स्फारैः—विस्तीर्णैः––ज्ञानशक्त्यर्णवे व्योमादीनां बिंदुवदल्पत्वात्, पुनः अचलं—अक्षोभ्यं, अतुलं–न विद्यते तुला–मानं यस्य तत्, तुलामतिक्रांतमिति वा । एकस्मिन् पार्श्वे धर्माधर्माकाशकालानुभागयोगकषायाध्यवसायादीनां शक्तिस्तथापि ज्ञानशक्तेरनंतैकभागः ।

अर्थ-रागादिक आस्रवनिका तत्काल क्षणमात्रमें सर्वप्रकार दूरि होनेतै नित्य उद्योतरूप किछू परम वस्तुकूं अंतरंगविषैं अवलोकन करनेवाला पुरुषके यह ज्ञान है सो उन्मग्न कहिये उदयरूप प्रगट भया कैसा प्रगट भया ? अतिविस्ताररूप फैलते जे आपने निजरसके प्रवाह, तिनिकरि सर्वलोकपर्यंत अन्यभाव, तिनिकूं अन्तर्मग्न करता संता। बहुरि कैसा है ? अचल है–जैसेके तैसे सर्वपदार्थ जामैं सदा प्रतिभासैं हैं चलैं नाहीं है बहुरि कैसा है, अतुलहै,जाकी बराबरी और नाही है॥ भावार्थ-शुद्धनयकूं अवलंबन करि जो पुरुष अंतरंगविषैं चेतन्यमात्र परमवस्तूकूं एकाग्र अनुभवै है, ताके सर्व रागादिक आस्रवभाव दूरि होय, अर सर्वपदार्थनिकूं जाननेवाला निश्चल अतुल केवलज्ञान प्रगट होय है।। सो यह ज्ञान सर्वतैं महान् है ।। ऐसे आस्रवका स्वांग रंगभूमिमैं प्रवेश भया था, ताकूं ज्ञान यथार्थरूप जानि लिया, तब निसरि गया ।।

योग कषाय मिथ्यात्व असंयम आस्रव द्रव्य ते आगम गाये ।
राग विरोध विमोह विभाव अज्ञानमयी यह भाव जताये ॥
जे मुनिराज करैं इनि त्याग, सुरिद्धि समाज लये सिव थाये ।
काय नवाय नमूं चित लाय कहूँ जयमाल लहूँ मन भाये ॥

इति श्रीसमयसारपद्यस्याध्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां चतुर्थोऽकः ॥ ४ ॥
ऐसे इस अध्यात्मतरंगिणीनामा टीकाकी वचनिकाविषै चौथा अधिकार पूर्ण भया ॥४॥

अथ संवराधिकारः ॥ ५ ॥

दोहा— मोहरागरुष दूरि करि समिति गुप्ति व्रत पारि ।
संवरमय आतम कीयो नमूं ताहि मन धारि ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स जयतु जनधर्मसिन्धु ज्ञानामृतचन्द्र एव संपुष्यत् । शुभचन्द्रचन्द्रिकाप्तः सुकुन्दकुन्दोज्ज्वलः श्रीमान् ॥

ॐ नमः, अथ संवरं सूचयति—

आसंसारविरोधिसंवरजयैकांतावलिप्तास्रव –
न्यक्कारात्प्रतिलब्धनित्यविजयं संपादयत्संवरं ।
व्यावृत्तं पररूपतो नियमितं सम्यक्स्वरूपे स्फुरत्
ज्योतिश्चिन्मयमुज्ज्वलं निजरसप्राग्भारमुज्जृम्भते । १ ।

सं० टी०—उज्जृंभते–विलसते–प्रकाशत इत्यर्थः, किं ? चिन्मयं ज्ञानमयं ज्योतिः–तेजः, किंभूतं ? संवरं–कर्मणामागंतुकानां निरोधं, संपादयत्–कुर्वत्, किंभूतं संवरं ? प्रतीत्यादि–प्रतिलब्धः–संप्राप्तः, नित्यं–निरंतरं, विजयो येन तं, कुतः ? आसंसारेत्यादिः संसरणं–संसारः,–द्रव्यक्षेत्रकालभवभावरूपः, संसारमभिव्याप्य आसंसारं कर्म विरोधयति–विनाशयति इत्येवं शीलः आसंसारविरोधी स चासौ संवरश्च कर्मनिरोधस्तस्य जय एवैकः–अद्वितीयः, अंतः–स्वभावः, तेनावलिप्तः–संयुक्तः स चासौ आस्रवश्च तस्य न्यक्कारः–तिरस्कारः–धिक्कार इत्यर्थः, तस्मात्, पुनः किंभूतं संवरं ? पररूपतः–परः–द्रव्यादिः, रागादिर्वा तस्य रूपं स्वरूपं तत्, व्यावृत्तं–निवृत्तं, तथा चोक्तमाप्तपरीक्षायां—

तेषामागमिनां नूनं विपक्षः संवरो मतः ॥ १११ ॥ इति

पुनः नियमितं–कर्मनिरोधे नियमो जातो यस्य तं, किंभूतं ज्योतिः ? सम्यक्स्वरूपे–यथोक्तस्वरूपे आत्मस्वरूपे इत्यर्थः, स्फुरत्देदीप्यमानं पूर्वोक्तौ व्यावृत्तमित्यादिविशेषणौ द्वौ ज्योतिषो वा, पुनः उज्ज्वलं सदावदातं पुनः कीदृशं निजरसप्राग्भारं–स्वात्मानुभवरसेन प्राक्–पूर्वं भारः भरणं यस्य तत् ॥ १ ॥ अथ ज्ञानरागयोः स्वरूपं वेभिद्यते—

अर्थ—चैतन्यस्वरूपमय स्फुरायमान प्रकाशमान ज्योति है सो उदयरूप होय फैले है। कैसा है ? अनादिसंसारतै लगाय अपना विरोधी जो संवर, ताकौं जीतिकरि एकांतपणे मदकूं प्राप्त भया जो आस्रव ताका तिरस्कारतै पाया है नित्य विजय जानै ऐसा संवरकूं निपजावता संता है ॥ बहुरि परद्रव्य तथा परद्रव्यके निमित्ततै भये भाव, तिनितै भिन्न है ॥ बहुरि कैसा है अपना सम्यक् कहिये यथार्थस्वरूप, ताविषै निश्चित है ॥ बहुरि कैसा है ? उज्ज्वल है ? निराबाध निर्मल देदीप्यमान प्रकाशरूप है ॥ बहुरि कैसा है ? अपना रस जो ज्ञानरूप प्रवाह, ताका है प्राग्भार जाके-अपना रसका बोझकूं लीयें है, अन्य बोझ उतारि धरया है ॥ भावार्थ--अनादितै आस्रवका विरोधी संवर है । ताकौं आस्रव जीतिकरि मदकरि गर्वित तथा ताका तिरस्कार करी जीतिकूं प्राप्त भया जो संवर, ताकूं प्राप्त करता, अर समस्त पररूपतैं न्यारा होय, अपना रूपविषै निश्चल होय, यह चैतन्यप्रकाश है, सो अपना ज्ञानरसरूप भारकूं लिये निर्मल उदयरूप होय है ॥

चैद्रूप्यं जडरूपतां च दधतोः कृत्वा विभागं द्वयो-
रंतर्दारुणदारुणेन परितो ज्ञानस्य रागस्य च ।
भेदज्ञानमुदेति निर्मलमिदं मोदध्वमध्यासिताः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुद्धज्ञानघनौघमेकमधुना संतो द्वितीयच्युताः ॥

सं० टी०—उदेति—उदयं गच्छति चकास्तीत्यर्थः ? किं भेदविज्ञानं—क्रकचवद् द्विधाकारकं ज्ञानं, कस्य ज्ञानस्य रागस्य च, ज्ञानरागयोः परस्परमत्यंतविलक्षणत्वाद्भिन्नत्वं, किंभूतं ? निर्मलं—मिथ्यात्वादिकर्मकालुष्यराहित्यात, किंभूतस्य—चैद्रूप्यं—चिदेव ज्ञानमेव रूपं यस्य स तस्य भावश्चैद्रूप्यं चेतनत्वमित्यर्थः दधतः—धारयतः, च पुनः रागस्य किंभूतस्य ? जडरूपतां—अचेतनतां दधतः, किंकृत्वा द्वयोः—जीवक्रोधयोः, अविभागं—अभेदं, अकृत्वा—अविधाय, भेदं कृत्वेत्यर्थः, केन ? अंतरित्यादिः—दारयति कर्मशत्रूनिति दारुणं ज्ञानं, अंतः—अभ्यंतरे, दारुणं—द्विधाकारकं तच्च तद्दारुणं च तेन कारणभूतेन, संतः ! अहो सत्पुरुषाः ! मोदध्वं यूयं प्रमोदं कुरुध्वं, अधुना इदानीं भेदज्ञानोदये सति, किंभूताः संतः ? इदं एकं—अद्वितीयं भेदज्ञानं अध्याश्रिताः-आरूढाः प्राप्ताः संतः इत्यर्थः । पुनः किंभूताः ? द्वितीयच्युताः—ज्ञानरागयोर्मध्ये द्वितीयेन रागेण च्युता रहिताः, किंभूतमिदं ? शुद्धेत्यादिः—शुद्धं—निर्मलं तच्च तज्ज्ञानं बोधश्च तस्य घनं—निरंतरं अस्य, ओघः, समूहः, यत्र तत् ॥ २ ॥ अथ शुद्धात्मोपलंभात् संवरं विवृणोति—

अर्थ—यह निर्मल भेदज्ञान है सो उदयकूं प्राप्त होय है। सो याका निश्चय करनेवाले सत्पुरुषनिकूं संबोधन करि कहै हैं-जो, हे सत्पुरुष हो ! तुम याकूं पायकरि, अर अवर द्वितीय जो रागादिक भाव, तिनितै रहित भये संते, एक शुद्धज्ञानघनका समूहकूं आश्रयकरि, तिसमें लीन भये संते, बडा आनंद मानौ। जातै यह कहा करि, उदय होय है ; चैतन्यरूप ताकूं धरता संता तौ ज्ञान अर जडरूपताकूं धरता राग, तिनि दोऊनिके अज्ञानदशामैं एकपणासा दीखे है। तिनिका अंतरंगविषैं अनुभवके अभ्यासरूप बलकरि उत्कृष्ट विदारण करी सर्वप्रकार विभागकरी उदय होय है। भावार्थ—ज्ञान तौ चेतनास्वरूप है अर रागादि पुद्गलविकार जड हैं। सो अज्ञानतैं एक जडरूप भासै हैं ॥ सो भेदविज्ञान जब प्रगट होय है तब ज्ञानका अर रागादिकका भिन्नपणाका अंतरंग अनुभवके अभ्यासतें प्रगट होय है। तव ऐसे जाने है जो ज्ञानका स्वभाव तौ जाननेमात्र ही है अर ज्ञानमें रागादिककी कलुषता मलिनता आकुलतारूप संकल्प विकल्प भासैं हैं, सो ए सर्व पुद्गलके विकार हैं जड हैं। ऐसा ज्ञानका अर रागादिकका भेदका आस्वाद आवै है। सो यह भेद विज्ञान सर्व विभावभाव मेटनेकूं कारण होय है, अर आत्माकूं परमसंवरभावकूं प्राप्त करै है। तातैं सत्पुरुषनिकूं कहै हैं, जो याकूं पायकरि रागादिकतै च्युत होय शुद्ध ज्ञानघन आत्माका आश्रय ले आनंदकूं प्राप्त होऊ॥ अब कहै हैं जो ऐसैं यह भेदविज्ञान जिस काल ज्ञानके रागादिविकाररूप विपरीतपणाकी कणिकाकूं न प्राप्त करता अविचलित है, तिसकाल ज्ञान है सो शुद्धोपयोगस्वरूपपणाकरि ज्ञानहीरूप केवल भया संता किंचिन्मात्र भी रागद्वेष मोहभावकूं नाहीं प्राप्त होय है। तातै यह ठहरी, जो भेदविज्ञानतै शुद्धात्माकी प्राप्ति होय है। बहुरि शुद्धात्माकी प्राप्तीतै राग द्वेष मोह जे आस्रवभाव तिनिका अभाव है लक्षण जाका ऐसा संवर होय है॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशेष–संस्कृत टीकाकारको 'दधतोऽकृत्वाऽविभागं' यह पाठ मिला है इसलिये उन्होंने जडरूपको धारणकरनेवाले क्रोध आदिके और चेतनरूपको धारणकरनेवाले जीवके विभागके अभावको न करके अर्थात् विभाग करके 'यह अर्थ किया है तथा ग्रन्थकारको भी यहां यही अर्थ अभीष्ट है परन्तु साधुपाठ-दधतोः कृत्वा विभागं' यही है क्योंकि यहां अर्थमें खींचातानी नहि करनी पडती ' श्लोकको पढते ही अर्थ हृदयपर अंकित हो जाता है। तथा उपर्युक्त अर्थके बतलानेकेलिये ग्रन्थकार कभी श्लोकमें ऐसे पद भी नहिं डाल सकते ॥ २ ।

यदि कथमपि धारावाहिना बोधनेन ध्रुवमुपलभमानः शुद्धमात्मानमास्ते ।
तदयमुदयदात्मारामममात्मानमात्मापरपरिणतिरोधाच्छुद्धमेवाभ्युपेति ॥ ३ ॥

सं० टी०—यदि-यदा, अयं-प्रसिद्धः, आत्मा-चिद्रूपः, आस्ते-अवतिष्ठते, किंभूतः ? ध्रुवं-निश्चितं, कथमपि-महता कष्टेन शुद्धं द्रव्यभावनोकर्मकलंकविकलं आत्मानं-स्वस्वरूपं, उपलभमानः-आसादयन्, स्वध्यानविषयीकुर्वाण इत्यर्थः, केन ? बोधनेन बोध्यते-ज्ञायते अनेनेति बोधनं-ज्ञानं तेन, किंभूतेन ? धारावाहिना-अनवच्छिन्नरूपत्वेन स्वधुनीधारेव वहतीत्येवं शीलस्तेन, तत् तर्हि, तदा आत्मानं-चिद्रूपं शुद्धमेव-निष्कलंकमेव, अभ्युपेति-प्राप्नोति, कुतः ? परपरिणतिरोधात्-परेषु अचेतनादिपदार्थेषु परिणतिः ममत्वादिलक्षणपरिणामः, तस्य विरोधः तस्मात्, किंभूतं तं ? उदेत्यादिः-आत्मनः-आरामं-रमणीयं ज्ञानस्वरूपवनं वा उदयत्-उदयं गच्छत् आत्मारामं यत्रासौ तं, इत्येवं संवरप्रकारः ॥ ३ ॥ अथ कर्ममोक्षं कक्षीकरोति—

अर्थ–जो आत्मा कोई प्रकार वडे भाग्यतैं धारावाही ज्ञानकरि निश्चल शुद्ध आत्माकूं प्राप्त होता संता तिष्ठै है, तो यहू आत्मा, उदय होता है आत्मारूप क्रीडावन जाकै, ऐसा अपना आत्माकूं परपरिणति जे राग द्वेष मोह, तिनिका निरोधतैं शुद्धहीकूं पावै है। ऐसे शुद्ध आत्माकी प्राप्तीतैं संवर होय है॥ इहां धारावाही ज्ञान कह्या, ताका अर्थ–यहू जो एक प्रवाहरूप ज्ञान होय, सो धारावाही है॥ सो याकी दोय रीति हैं–एक तौ मिथ्याज्ञान वीचिमैं न आवै ऐसा सम्यग्ज्ञान सो धारावाही है॥ बहुरि दूजा उपयोगका ज्ञेयके उपयुक्त होनेकी अपेक्षा है, सो जहांताई एक ज्ञेयसूं उपयोग उपयुक्त होय रहै तहां ताई धारावाही कहिये सो याकी स्थिति अंतर्मुहूर्तही है। पीछै विच्छेद होय है। सो जहां जैसी विवक्षा होय, तहां तैसा जानना ।। श्रेणी चढै तब शुद्ध आत्मासूं उपयुक्त होय धारावाही है॥

निजमहिमरतानां भेदविज्ञानशक्त्या भवति नियतमेषां शुद्धतत्त्वोपलंभः।
अचलितमखिलान्यद्रव्यदूरे स्थितानां भवति सति च तस्मिन्नक्षयः कर्ममोक्षः

सं० टी०—नियतं-निश्चितं, शुद्धेत्यादिः-शुद्धतत्त्वं-परमात्मतत्त्वं,तस्योपलंभः-प्राप्तिः,भवति जायते. केषां ? येषां निजमहिमरतानां-निजः-स्वात्मा, तस्य महिमा—माहात्म्यं दर्शनज्ञानादिलक्षणं, तत्र रक्तानां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आसक्तानां, अचलं-निश्चलं यथा भवति तथा, स्थितानां-प्रविष्टानां, क ? अखिलेत्यादिः-अखिलानि समस्तानि, तानि च तानि अन्यद्रव्याणि च आत्मव्यतिरिक्तधर्मादिपंचद्रव्याणि तेभ्यः दूरात्-दविष्ठे, कया ? भेदेत्यादिः-भेदकारकविज्ञानस्य शक्तिः-सामर्थ्यं तया, चेति भिन्नप्रक्रमे, सति-विद्यमाने, तस्मिन् शुद्धतत्त्वोपलंभे, अक्षयः-क्षयातीतः, अनंतकालस्थायीत्यर्थः, कर्ममोक्षः-कर्मणां-प्रकृतिस्थित्यादिरूपतया विश्लेषणं-मोक्षः भवति जायते ॥ ४ ॥ अथ संवरं विवृणोति—

अर्थ-जे पुरुष भेदविज्ञानकी शक्तिकरी अपना स्वरूपकी महिमाविषैं लीन हैं, तिनिकै नियमतैं शुद्धतत्त्वकी प्राप्ति होय है ॥ बहुरि तिस शुद्धतत्त्वकी प्राप्ति होते संते जे निश्चल जैसे होय तैसे समस्त अन्यद्रव्यतैं दूरि तिष्ठै हैं, तिनिकै कर्मका मोक्ष कहिये अभाव होय है, सो अक्षय होय है-फेरि कर्मबंध नाही होय है ॥

संपद्यते संवर एव साक्षाच्छुद्धात्मतत्त्वस्य किलोपलंभात् ।
स भेदविज्ञानत एव तस्मात्तद्भेदविज्ञानमतीव भाव्यं ॥ ५ ॥

सं० टी०—तस्मात्-आत्मकर्मणोर्भेदविज्ञानात्, आस्रवभावहेतूनामध्यवसानानां मिथ्यात्वादीनामभावः, तदभावे च रागद्वेषमोहरूपास्रवभावस्याभावः, तदभावे च कर्माभावः, तदभावे च नोकर्माभावः, तदभावे च संसाराभावः इति कारणात् तत्-प्रसिद्धं-आत्मकर्मणोर्भेदविज्ञानं, अतीवभाव्यं-अत्यंतं, भावनीयं, तत् कुतः ? यतः-स-आत्मोपलंभः-भेदविज्ञानत एव नान्यतः, किलेत्यागमे श्रूयते । शुद्धात्मतत्त्वस्य-अमलपरमात्मस्वरूपस्य, उपलंभात्-प्राप्तेः, एष-प्रसिद्धः, साक्षात्-प्रत्यक्षं संवरः—आगंतुककर्मनिरोधः, संपद्यते जायते, ॥ ५ ॥ अथ-भेदविज्ञानमाज्ञापयति—

अर्थ-जातैं यह संवर है सो निश्चयतैं साक्षात् शुद्धात्मतत्त्वका उपलंभ कहिये पावनेतैं होय है ॥ बहुरि शुद्धात्मतत्त्वका उपलंभ है, सो आत्मा अर कर्मका भेदविज्ञानतैं होय है-कर्मकूं अर आत्माकूं न्यारे जानैं तब आत्माकूं अनुभवै । तातैं सो भेदविज्ञान अतिशयकरि भावनेयोग्य है ॥ फेरि कहै हैं, जो, भेदविज्ञान कहां तांई भावना ?

भावयेद्भेदविज्ञानमिदमच्छिन्नधारया ।
तावद्यावत्पराच्च्युत्वा ज्ञानं ज्ञाने प्रतिष्ठते ॥ ६ ॥

सं० टी०—यावत्पर्यंतं, ज्ञानं-परमात्मबोधः, ज्ञाने-स्वस्वरूपप्रतिभासके बोधे, प्रतिष्ठते-स्थितिं करोति, स्वस्वरूपे—स्वस्वरूपावस्थाने इत्यर्थः किंकृत्वा ? च्युत्वा-त्यक्त्वा, कान् ? परान् अचेतनादिपरपदार्थान्, तावत्कालपर्यंतं इदं भेदविज्ञानं-आत्मकर्मणोर्भेदकारकभावनाज्ञानं, अच्छिन्नधारया अनवच्छिन्नरूपेण, भावयेत्-ध्यायेत्, लब्धे स्वरूपे स्वरूपप्राप्तिनिमित्तकस्य भेदज्ञानस्यानुपयोगात्, निष्पन्ने पटे तत्साधनस्य तुरीवेमाकुविंदादेरनुपयोगित्ववत् ॥ ६ ॥ अथ भेदज्ञानाज्ञानयोः सिद्धिं प्रति हेतुकत्वाहेतुकत्वे निर्णयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—यह भेदविज्ञान है ताहि निरन्तर धाराप्रवाहरूप जामैं विच्छेद न पडे ऐसे तैतैं भावै जेते ज्ञान है सो परभावनितै छूटिकरि अपने स्वरूपज्ञानही विषैं प्रतिष्ठित होय ठहरी जाय ।

सं॰ टी॰—एष–शास्त्रादिना प्रसिद्धः, लोकः—श्रेणिघनप्रचयरूपस्त्रिलोकः, शाश्वतः–नित्यः इतीश्वरकर्तृत्वं निरस्तं, अविनाशित्वं च सूचितं, एकः–अद्वितीयः, इत्यनेन ब्रह्मणः प्रतिलोमानेकब्रह्मांडप्रतिपादनं प्रत्याख्यातं, विविक्तात्मनः–सर्वज्ञस्य, सकलव्यक्तः–समस्तो विशदः, इत्यनेन तस्य गहनत्वं अपास्तं, अयं चित्–ज्ञानं स्वयमेव–स्वभावादेव यं प्रसिद्धं लोकं–भुवनत्रयं, केवलं–परं—लोकयति–पश्यति कीदृक्षः ? एककः–शरीरदारदरकागाराहारादिनिरपेक्षः एक एव अयं–प्रत्यक्षः–चराचररूपो लोकः–लोकनिवासी जनः, त्रिलोको वा, इहलोक इत्यर्थः, अपरः–त्वत्तो भिन्नः, तव–ते, न भवेत्, तदपरः—तस्मादिह लोकादपरः–परलोकः तस्य–आत्मनः नास्ति तद्भीः–ताभ्यामिहपरलोकाभ्यां, भीः–भयं, कुतः–कस्मात् न कुतोऽपि तयोरात्मनो भिन्नत्वख्यापनात्, स ज्ञानी, सदा–नित्यं स्वयं स्वरूपेण, सहजं—स्वाभाविकं, ज्ञानं–बोधं, विंदति–जानाति, सततं निरंतरं, निश्शंकः–इहपरलोकभयशंकारहितः इति भयद्वयस्य ज्ञानिनो निरासः ॥ २३ ॥ अथ वेदनाभयं बध्नाति–

अर्थ–यह भिन्न आत्माका चैतन्यस्वरूप लोक है सो शाश्वत है, एक है, सकलजीवनिकै प्रगट है,जाकूं यह ज्ञानी आत्माही स्वयमेव एकाकी केवल अवलोकन करै है । तहां ज्ञानी ऐसैं विचारै है, जो यह चैतन्यलोक है सो तेरा है बहुरि तिसतैं अन्य लोक है सो परलोक है, तेरा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाही। ऐसा विचारता तिस ज्ञानीकै इसलोक अर परलोकका भय काहेतैं होय ? नाही होय। तातैं सो ज्ञानी है सो निःशंक भया संता निरंतर आपकूं स्वाभाविक ज्ञानस्वरूप अनुभवै है ॥ भावार्थ–जो इस भवतैं लोकनिका डर होय, जो यह लोक मेरा न जानियें कहा विगाड करेगा सो ऐसा तौ इंहलोकका भय है ॥ बहुरि परभवमें न जानिये, कहा होयगा ? ऐसा भय रहै सो परलोकका भय है ॥ सो ज्ञानी ऐसैं जानै है-जो मेरा लोक तौ चैतन्यस्वरूपमात्र एक नित्य है यह सर्वकै प्रगट है बहुरि इस लोक सिवाय है सो परलोक है सो मेरा लोक तौ काहूका विगाडया विगडै नाही। ऐसैं विचारता ज्ञानी आपकूं स्वाभाविक ज्ञानरूप अनुभवै ताकै इसलोक का भय काहेतैं होय ? कदाचित् न होय ।। २३ ॥ वेदनाका भयका काव्य है–

एषैकैव हि वेदना यदचलं ज्ञानं स्वयं वेद्यते
निर्भेदोदितवेद्यवेदकबलादेकं सदाऽनाकुलैः ।
नैवान्यागतवेदनैव हि भवेत्तद्भीः कुतो ज्ञानिनो
निश्शंकः सततं स्वयं स सहजं ज्ञानं सदा विंदति ॥२४॥

सं० टी०—यत्-प्रसिद्धं ज्ञानं स्वयं वेद्यते-ज्ञायते, कैः ? अनाकुलैः-आकुलतारहितैः-ज्ञानिभिः एषा-प्रसिद्धा, एका-अद्वितीया, वेदना-वेद्यते ज्ञायते आत्मा अनया इति वेदना—आत्मानुभवं एव नान्या, किंभूतं ? अचलं-निश्चलं, पुनः कीदृशं ? एकं-द्रव्यार्पणात् तत्कुतः ? निरित्यादिः-वेद्यते ज्ञायत इति वेद्यं, स्वरूपं वेदयतीति वेदकः-आत्मा, द्वंद्वः, निर्भेदेन यो वेद्यः स एव वेदकः, इत्येकत्वेन उदितौ उदयं प्राप्तौ वेद्यवेदकौ तयोर्बलं तस्मात्, हि-स्फुटं, अन्य आत्मनः सकाशात् एव-निश्चयेन, आगतवेदना-पुद्गलागतवेदना रोगः, न भवेत् आत्मनो भिन्नत्वादेव ज्ञानिनः-पुंसः, तद्भीः-वेदनाभयं कुतः ? न कुतोऽपि, तुर्यं चरणं पूर्ववत् ॥ २४ ॥ अथात्राणभयं निरस्यति–

अर्थ–ज्ञानी पुरुषनिकै याही एक वेदना है जो निराकुल होयकरि आप अपना एक ज्ञान-स्वरूपकूं अपना ज्ञानभावहीतैं वेदनेयोग्य अर आपही वेदनेवाला ऐसा अभेदस्वरूप वेद्यवेदक भावके बलतैं निरंतर निश्चल वेदिये है-अनुभवन कीजिये है ॥ बहुरि ज्ञानीकै अन्यतैं आई ऐसी वेदना ही नाही हैं तातैं तिसकै तिस वेदनाका भय काहेतैं होय ? नाही होय। यातैं ज्ञानी निःशंक भया संता अपना स्वाभाविक ज्ञानभावकूं सदा निरन्तर अनुभवै है ॥ भावार्थ-वेदना नाम सुखदुःखकूं भोगनेका है सो ज्ञानीकै एक अपना ज्ञानमात्र स्वरूपका भोगना ही है। वह अन्यकरि आई वेदनाकूं ही नाही जानै है। तातै अन्यागतवेदनाका भय नाही है तातैं सदा निर्भय भया ज्ञानका अनुभवन करै है ॥२४॥ अब अरक्षाका भयका काव्य कहै हैं-

यत्सन्नाशमुपैति तन्न नियतं व्यक्तेति वस्तुस्थिति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यो नटति स रंगमवगाह्य शृंगारादिनवरसोद्रेकत एव इत्युक्तिलेशः तु-पुनः, प्राग्बद्धं—प्राक्-सम्यक्त्वोत्पत्तेः पूर्वं बद्धं-कर्मरूपेणात्मसात्कृतं, क्षयं—विनाशं, उपनयन् प्रापयन् सन्, केन ? निर्जरोज्जृम्भणेन असंख्यातगुणनिर्जराया उज्जृंभणं-उत्सर्पणं-प्राकट्यं तेन, अष्टाभिः-वसुसंख्यैः, अंगैः-निश्शंकितादिसम्यक्त्वावयवैः संगतः युक्तः, किंभूतैः ? निजैः-निश्चयसम्यक्त्वसंबंधीयैः, इति-पूर्वोक्तप्रकारेण नवं-नवीनं, बन्धं कर्मबंधं, रुंधन्—निवारयन् । प्रत्यधिकारं नटतीत्यादिशब्दः नाटकत्वमुद्योतयति ॥ ३० ॥

अर्थ—सम्यग्दृष्टि जीव है सो आप स्वयमेव अपने निजरसमें मग्न भया संता आदि मध्य अंतकरि रहित सर्वव्यापक एकप्रवाहरूप धारावाहीज्ञानरूप होयकरि अर आकाशका मध्यरूप जो रंगभूमि अतिनिर्मल ताविषैं अवगाहन करि नृत्य करै है। कैसा सम्यग्दृष्टि ? नवीन बंध कूं तौ पूर्वोक्तप्रकार रोकता संता है, बहुरि पहिली बांध्या था ताकूं अपने अष्ट अंगनिकरि सहित भया संता निर्जराके प्रगट होनेकरि नाशकूं प्राप्त करता संता है॥ भावार्थ—सम्यग्दृष्टि के शंकादिककरि कीया नवीन बंध तौ होय नाही अर आठ अंगनिकरि सहित है, तातैं निर्जरा का उदय होनेकरि पूर्वबंधका नाश होय है। सो एकप्रवाहरूप ज्ञानरूप रसका आप पान करि, जैसे कोई मदकरि मग्न भया नृत्यके आखाडेमैं नृत्य करै है तैसे निर्मल आकाश रूप इस भूमिमैं नृत्य करै है॥ इहां कोई कहै—सम्यग्दृष्टिकै निर्जरा होना तौ कहते आये अर बंध होना न कह्या। सो गुणस्थाननिकी परिपाटीमैं सिद्धांतमें अविरतसम्यग्दृष्टितैं लगाय बंध कह्या है, अर घातिकर्मनिका कार्य आत्माका गुण घात करना है, सो दर्शन ज्ञान सुख वीर्य इनि गुणनिका घातभी विद्यमान है, सो चारित्रमोहका नवीन बंध भी करे ही है, अर मोहके उदयमें भी बंध न मानिये तौ मिथ्यादृष्टिकै मिथ्यात्व अनंतानुबंधीका उदय होते भी बंधका न होना क्यौं न मानिये ? ताका समाधान—जो, बंध होनेमें प्रधान मिथ्यात्व अनंतानुबंधीका उदयही है सम्यग्दृष्टीकै तिनिका उदयका अभाव है, सो चारित्रमोहके उदयतैं यद्यपि सुखगुणका घात है अर अल्प स्थिति अनुभाग लिये मिथ्यात्व अनंतानुबंधीविना तथा तिनिका लारकी अन्यप्रकृतिविना घातिकर्मकी प्रकृतिनिका तथा अघातिकर्मकी प्रकृतिनिका बंध भी होय है। तोऊ जैसा मिथ्यात्व अनंतानुबंधीसहित होय, तैसा होय नाही। अनंतसंसारका कारण तौ मिथ्यात्व अनंतानुबंधी है, तिनिका अभाव भये पीछे तिनिका बंध होय नाही। अर आत्मा ज्ञानी भया तब अन्य बंध की कौन गिनती करै ? वृक्षकी जड कटै पीछैं हरेमान रहनेका कहा अवधि ? तातैं इस अध्यात्मशास्त्रविषैं तौ सामान्यपणै ज्ञानी अज्ञानी होनेका प्रधान कथन है। ज्ञानी भये पीछे किछू कर्म रहे ते सहजही मिटते जांयगे। जैसे कोई पुरुष दरिद्री था, सो झूपड़ीमैं वसै था, ताकूं भाग्य उदयकरि बडा महलकी धनसहित प्राप्ति भई। तामैं बहुतदिनका कजोड़ा भर्या था, सो या पुरुषने आय प्रवेश किया तिसही दिनतैं यह तौ महलका धनी संपदावान् बणिगया। अब कजोडा झाडना है, सो अनुक्रमतैं अपना बलके अनुसार झाडै है। जब सब

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

झाडि जायगा उज्ज्वल होय जायगा, तब परमानंद भोगैहीगा, ऐसा जानना ।३०। ऐसैं रंगभूमी मैं निर्जराका प्रवेश भया था सो अपना स्वरूप प्रगट दिखाय निकसि गया ॥

सम्यक्वंत महंत सदा समभाव रहै दुख संकट आये ।
कर्म नवीन बंधै न तवै अर पूरब बंध झड़े बिन भाये ॥
पूरब अंग सुदर्शनरूप धरै निति ज्ञान बढै निज पाये ।
यों शिवमारग साधि निरंतर आनंदरूप निजातम थाये ॥ १ ॥

इति श्रीसमयसारपद्यस्याध्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां षष्ठोऽङ्कः ॥ ६ ॥

इस प्रकार परमाध्यात्मतरंगिणीकी वचनिकाविषैं छठा निर्जरा अधिकार पूर्ण भया ॥ ६ ॥

अथ बंधाधिकारः ॥ ७ ॥

वारयति निर्जरास्यं तामस्यं भव्यजीवनिचयस्तु ।
अमृतेंदुवाङ्मयमयूखैः श्रीकुंदसर्गैः परैः सारैः ॥

ननु संवरनिर्जरे निरंतरं ज्ञानिनो निरूपिते पुनः कस्य तु ते द्वे ? प्रतिषेधस्य विधिपूर्वकत्वात् इति विचिंत्य बंधतत्त्वं निबध्यते ।

दोहा—रागादिकतैं कर्मको बंध जानि मुनिराय ।
तजै तिनहि समभाव करि नमूं सदा तिनि पाय ॥

अब टीकाकारके वचन हैं, जो, अब बंध प्रवेश करै है ॥ जैसैं नृत्यके अखाडेमें स्वांग प्रवेश करै हैं, तैसें रंगभूमिमैं बंधतत्त्वका स्वांग प्रवेश करै है । तहां प्रथमही सर्व तत्त्वका यथार्थ जाननेवाला जो सम्यग्ज्ञान, सो बंधकूं दूरि करता संता प्रगट होय है ऐसे अर्थकूं ले मंगल रूप काव्य कहै हैं—

रागोद्गारमहारसेन सकलं कृत्वा प्रमत्तं जगत्
क्रीडंतं रसभारनिर्भरमहानाट्येन बंधं धुनत् ।
आनंदामृतनित्यभोजि सहजावस्थां स्फुटं नाटय-
द्धीरोदारमनाकुलं निरुपधि ज्ञानं समुन्मज्जति ॥ १ ॥

सं० टी०—समुन्मज्जति-समुच्छलति चकास्तीत्यर्थः, किं ? ज्ञानं-आत्मबोधः, किंभूतं ? निरुपधि निर्गत उपाधिः--ममत्वादिविकृतिर्यस्मात्तत्, पुनः कीदृशं ? अनाकुलं—उपाधिविजृंभितचिंताच्युतं, धीरं धैर्यगुणयुक्तं तच्च तदुदारमुत्कटं च, सहजावस्थां—स्वाभाविकदशां, स्फुटं व्यक्तं यथा भवति तथा नाटयत् प्रकाशयत् धातूनामनेकार्थत्ववचनात् द्योतकत्वमत्र । पुनः-आनंदेत्यादिः, आनन्दं-स्वात्मोत्थं सुखं तदेवामृतं सुधां नित्यं-अनवच्छिन्नतया, भुनक्तीत्येवं शीलं । पुनः-बंधं-कर्माश्लेषं, धुनत् स्फोटयत्, किंभूतं बन्धं ?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकं ज्ञानमनाद्यनंतमचलं सिद्धं किलैतत्स्वतो
यावत्तावदिदं सदैव हि भवेन्नात्र द्वितीयोदयः ।
तन्नाकस्मिकमत्र किंचन भवेत्तद्भीः कुतो ज्ञानिनो
निश्शंकः सततं स्वयं स सहजं ज्ञानं सदा विंदति ॥ २८ ॥

सं० टी०—किल इत्यागमोक्तौ यावत्पर्यंतं, तत्-प्रसिद्धं, एकं कर्मादिद्वितीयरहितं, ज्ञानं-बोधः, स्वतः स्वभावेन, सिद्धं निष्पन्नं कृतकृत्यं च, किं भूतं ? अनाद्यनंतं-उत्पत्तिविनाशरहितं, अचलं-अक्षोभ्यं, हि स्फुटं, तावत्पर्यंतं इदं-ज्ञानं, सदैव-अविच्छिन्नं भवेत्, अत्र-ज्ञाने, द्वितीयोदयः-सहसा द्वितीयस्य द्रव्यभवनायननाहिदर्शनादि पौद्गलिकस्योदयः, न भवेत्, तत् तस्मात् कारणात् अत्र-आत्मनि किंचन-किमपि, आकस्मिकं-अकस्मात्-सहसा भवं आकस्मिकं भयं न भवेत् ज्ञानिनः पुंसः, तद्भीः—तस्य-आकस्मिकस्य, भीः-भयं कुतः, न कुतोऽपि, सः-ज्ञानी, निश्शंकः-सप्तभयशंकारहितः सन्, सततं-नित्यं, सहजं स्वाभाविकं, ज्ञानं, सदा नित्यं, विंदति-जानाति । इति ज्ञानिनः, इहपरलोकवेदनाऽत्राणागुप्तिमरणाकस्मिकभयसप्तकाभावात् सदा निर्जरैव ॥ २८ ॥ अथ सम्यग्दृष्टेर्निर्जराप्रकारं प्रणीते—

अर्थ—ज्ञानी विचारै है जो ज्ञान है सो एक है, अनादि है, अनंत है, अचल है, सो यह आपहीतै सिद्ध है। सो जेते है तेतै सदा सो ही है, या विषै दूजेका उदय नाही है, तातै याविषै अकस्मात् नवा किछू उपजै ऐसा किछू भी नाही है । ऐसे विचारतै तिस अकस्मात् होनेका भय काहेतैं होय ? नाही होय है यातै सो ज्ञानी निःशंक भया संता निरंतर अपना स्वाभाविक ज्ञानस्वभावकूं सदा अनुभवै है। भावार्थ—जो कबहू अनुभवमें न आया ऐसा किछू अकस्मात् प्रगट हुआ भयानक पदार्थ, ताकरि प्राणीकै भय उपजै, सो आकस्मिकभय है। सो आत्माका ज्ञान है सो अविनाशी अनादि अनंत अचल एक है। सो याविषै दूजेका प्रवेश नाहीं, नवीन अकस्मात् कछू होय नाहीं, सो ऐसा ज्ञानी आपकूं जाने, तातैं अकस्मात् भय काहेतें होय। तातैं ज्ञानी अपना ज्ञानभावकूं निःशंक निरंतर अनुभवे है। ऐसे सप्त भय ज्ञानीकै नाहीं हैं। इहां प्रश्न—जो अविरतसम्यग्दृष्टि आदिकूं भी ज्ञानी कह्या है—भयप्रकृतिका उदय है, ताके निमित्ततैं भय भी देखिये है। सो ज्ञानी निर्भय कैसा है ? ताका समाधान—जो, भयप्रकृतिके उदयके निमित्ततैं भय उपजै है ताकी पीडा न सही जाय है जातैं अंतरायके प्रबल उदयतैं निर्बल है, तातै तिस भयका इलाज भी करे है ॥ परन्तु ऐसा भय नाही—जाकरि स्वरूपका ज्ञान श्रद्धानतै चिगि जाय। बहुरि भय उपजै है सो मोहकर्मकी भयनामा प्रकृतिका उदयका दोष है,ताका आप स्वामी होय,कर्ता न बने है ज्ञाता ही है ॥२८॥ आगे कहे हैं सम्यग्दृष्टिकै निःशंकित आदि चिह्न हैं ते कर्मकी निर्जरा करे हैं। शंकादिककरि कीया बंध नाही होय है ताकी सूचनिकाका काव्य है—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

टंकोत्कीर्णस्वरसनिचितज्ञानसर्वस्वभाजः
सम्यग्दृष्टेर्यदिह सकलं घ्नंति लक्ष्माणि कर्म ।
तत्तस्यास्मिन्पुनरपि मनाक्कर्मणो नास्ति बन्धः
पूर्वोपात्तं तदनुभवतो निश्चितं निर्जरैव ॥२९ ॥

सं० टी०—यत्–यस्मात्कारणात्, इह–जगति, घ्नन्ति–विनाशयंति, किं ? समस्तं–सकलं, कर्म–मिथ्यात्वादि, कानि ? लक्ष्माणि–चिह्नानि–संवेगनिर्वेदनिंदागर्होपशमभक्तिवात्सल्यानुकंपालक्षणानि–निश्शंकितादीनि वा, कस्य ? सम्यग्दृष्टेः–निश्चयसम्यक्त्वधारिणः, किंभूतस्य ? टंकोदित्यादिः–टंकोत्कीर्णश्चासौ स्वश्च–आत्मा, तस्य रसः–अनुभवः, तेन निचितं–युक्तं तच्च तज्ज्ञानं च तस्य सर्वस्वम्–साकल्यं भजति सेवते, इति टंकोत्कीर्णस्वरसनिचितज्ञानसर्वस्वभाक् तस्य तत्–तस्मात्कारणात् कर्मघातनादनंतरं तस्य ज्ञानिनः, पुनः–भूयः अस्मिन् पूर्वोक्तस्वरूपे मनागपि–एकांशेनापि, कर्मणः बंधः–संश्लेषः, नास्ति–न विद्यते तत् कर्म, पूर्वोपात्तं–पूर्वं–सम्यग्दृष्टेः प्राक् उपात्तं–बद्धं चानुभवतः सुखदुःखादिरूपेणानुभुंजतः, निश्चितं नियमेन निर्जरैव–खलु निर्जरा भवत्येव कर्मणां ॥ २९ ॥ अथ सम्यग्दृष्टेरंगानि लक्षयति—

अर्थ—जातैं सम्यग्दृष्टिके निःशंकित आदि चिन्ह हैं ते समस्तकर्मकूं हनैं हैं--निर्जरा करैं हैं तातैं फेरि भी इसका उदय होतैं नवीन कर्मका किंचिन्मात्रभी बंध नाही होय है। जिस कर्मका पहले बंध भया था, ताके उदयकूं भोगवता संताकै ताकी नियमकरि निर्जराही होय है॥ कैसा है सम्यग्दृष्टि ? टंकोत्कीर्णवत् एकस्वभावरूप जो अपना निजरस, तिसकरि परिपूर्ण भया जो ज्ञान, ताका सर्वस्वका भोगनहारा है–आस्वादक है॥ भावार्थ–सम्यग्दृष्टि पहले भयादि प्रकृति बांधी थी ताका उदयकूं भोगवै है, तोऊ ताके निशंकितादि गुण प्रवर्तें हैं, ते पूर्वकर्मकी निर्जरा करैं हैं। अर शंकादिककरि कीया बंध नाही होय है॥२९॥ अब निर्जरा अधिकारकूं पूर्ण कीया, सो निर्जराका स्वरूप यथार्थ जाननेवाला अर कर्मका नवीन बंध रोकि निर्जरा करने वाला जो सम्यग्दृष्टि, ताकी महिमा कहै हैं–

रुन्धन् बंधं नवमिति निजैः संगतोऽष्टाभिरंगैः
प्राग्बद्धं तु क्षयमुपनयन् निर्जरोज्जृम्भणेन ।
सम्यग्दृष्टिः स्वयमतिरसादादिमध्यांतमुक्तं
ज्ञानंभूत्वा नटति गगनाभोगरंगं विगाह्य ॥ ३० ॥

सं० टी०—सम्यग्दृष्टिः–आत्मश्रद्धानलक्षणसम्यक्त्वपरिणतो मुनिः, स्वयं–ज्ञानरूपेण, ज्ञानं भूत्वा ज्ञानमयो भूत्वा, नटति नृत्यं करोति,–ज्ञानेन सह तन्मयत्वं प्राप्नोतीति यावत्, किंकृत्वा ? गगनाभोगरंगं गगनम्–व्योम, तस्य आभोगः–परिपूर्णता स एव रंगः—नाट्यावताररंगभूमिः, तं विगाह्य–गाहयित्वा–ज्ञानेन सर्वं गगनमंडलमभिव्याप्य, हर्षतो नृत्याविरोधात्, कुतः ? अतिरसात्–स्वानुभवनोत्थरसोद्रेकेण, अन्योऽपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रीडंतं—स्वेच्छया सर्वत्र क्रीडया परिणतं, केन ? रसेत्यादिः—रसस्य—कर्मानुभागस्य भारः—अतिशयः स एव निर्भरं—अतिमात्रं, महानाट्यं महानटनं, तेन, किंकृत्वा ? सकलं—समस्तं, जगत्—लोकनिवासिजनवृंदं, प्रमत्तं मदाक्रांतं कृत्वा—विधाय, केन ? रागेत्यादिः—रागस्य उद्गारः—उद्गिरणं, स एव महारसः मैरेयादिरूपः तेन, अन्योऽपि यः परं मदिरया प्रमाद्य नाट्ये नाटयतीत्युक्तिलेशः ॥ १ ॥ अथ कथं मुच्यते जगतः कर्मात्मकत्वादिति वदंतं प्रत्याचष्टे—

अर्थ—ज्ञान है सो उदय होय हैं। कहा करता संता उदय होय है ? बंध है ताही उडावता संता उदय होय है। कैसा है बंध ? रागका उद्गार जो उगलना उदय होना सोही भया महारस ताकरि समस्त जगतकूं प्रमत्त-प्रमादी मतवाला करिकै अर रसके भारकरि भया जो वडा नृत्य, ताकरि नाचता है ऐसा बंधकूं उडावता है॥ बहुरि आप ज्ञान कैसा है ? आनंदरूप अमृतका नित्य भोजन करनेवाला है बहुरि अपनी जाननक्रियारूप स्वाभाविक अवस्था ताकूं प्रगटरूप नचावता संता उदय होय है। बहुरि धीर है, उदारतैं निश्चल है, वडा जाका विस्तार है। बहुरि अनाकुल है-जामैं किछू आकुलताका कारण नाहीं रहै है। बहुरि निरुपधि है-परिग्रहतैं रहित है-किछू परद्रव्यसंबंधी ग्रहणत्याग नाही है। ऐसा ज्ञान उदयकूं प्राप्त होय है भावार्थ—बंधतत्त्व रंगभूमिमैं प्रवेश करै है, ताकूं ज्ञान उडायकरि आप प्रगट हो नृत्य करैगा, ताकी महिमा या काव्यमें प्रगट करी है। ऐसा अनंत ज्ञान स्वरूप आत्मा सदा प्रगट रहौ॥ आगै बंधतत्त्वका स्वरूप विचारैं हैं॥ तहां प्रथम बंधका कारणकूं प्रगट कहै हैं—

न कर्मबहुलं जगन्न चलनात्मकं कर्म वा
न नैककरणानि वा न चिदचिद्वधो बंधकृत्।
यदैक्यमुपयोगभूः समुपयाति रागादिभिः
स एव किल केवलं भवति बंधहेतुर्नृणां॥ २ ॥

सं० टी०—ननु, जगत्—त्रिभुवनं, कर्मबहुलं—कर्मयोग्यपुद्गलैर्बहुलं-प्रचुरं तत्र बंधकृत्—बंधं करोतीति बंधकृत् बंधकारणं न भवेत् अन्यथा सिद्धानामपि तत्प्रसंगात् तत्र कर्मपुद्गलानां अवस्थानाविशेषात्। अथ कायवाङ्मनसां कर्म बंधकृन्न चलात्मकानां कर्मणां बंधहेतुत्वाभावात् अपरथा यथाख्यातसंयतानामपि कर्मबंधप्रसंगात्। ननु वा अथवा, तत्कारणं मा भवतु नैककरणानि अनेकस्पर्शनादींद्रियाणां बंधहेतुत्वं, तन्न अन्यथा केवलिनामपि तत्प्रशंगात् तस्य तत्सद्भावात्, ननु चिदचिद्वधः—चिदचितां सचित्ताचित्तानां वस्तूनां बधः—घातः बंधकृत्, तन्न तस्य तन्निमित्तत्वाघटनात् अन्यथा समितितत्पराणामपि तत्प्रसंगात्, ननु सर्वस्य बंधनिमित्तत्वनिषेधे जगतो निर्बंधत्वमेवेति चेन्न तत्सद्भावात् तथाहि—किल इत्यागमोक्तौ, एव—निश्चयेन, नृणां—प्राणिनां, केवलं परं, सः—रागयोगः, अनिर्दिष्टः, बंधहेतुः—बन्धस्य कारणं, भवति—अस्ति, स कः ? यः उपयोगभूः—उपयोगस्य—ज्ञानदर्शनलक्षणस्य भूः [मिः] स्थानं, आत्मेत्यर्थः, रागादिभिः—रागद्वेषमोहैः सह ऐक्यं—एकतां, उपयाति—प्राप्नोति, स एव बंधकारणं ॥ २ ॥ अथ कर्मबहुलादीनां कर्महेतुत्वं मीमांसते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–कर्मबंधका करनेवाला कर्मयोग्य पुद्गलनिकरि वहुत भरया जो जगत कहिये लोक सो कारण नाही है। बहुरि चलनेस्वरूप जे काय वचन मनकी क्रिया कर्मरूप योग, ते भी कारण नाही हैं। बहुरि अनेक रीतिके कारण, ते भी कारण नाही हैं॥ बहुरि चेतन अचेतनका वध कहिये घात सो भी कारण नाही है॥ तौ कहा है जो उपयोगभू कहिये आत्मा, सो रागादिकनिकरि सहित एकताका भावकूं प्राप्त होय है, सोही एक पुरुषनिकै बंधका कारण है॥ भावार्थ–इहां निश्चयनयकरि एक रागादिकहीकूं बंधका कारण कह्या है॥

विशेष–संस्कृत टीकाकारने 'नैककरणानि' का अर्थ स्पर्शनादिक इंद्रियां किया है और भाषाकारने 'अनेक रीतिके कारण' यह किया है॥ २॥

लोकः कर्मततोऽस्तु सोऽस्तु च परिस्पंदात्मकं कर्म तत्
तान्यस्मिन्करणानि संतु चिदचिद्व्यापादनं चास्तु तत्।
रागादीनुपयोगभूमिमनयन् ज्ञानं भवन्केवलं
बंधं नैव कुतोप्युपैत्ययमहो सम्यग्दृगात्मा ध्रुवं॥ ३॥

सं० टी०–सः–प्रसिद्धः, लोकः श्रेणीघनप्रदेशमात्रं त्रिभुवनं, कर्मततः—कर्मयोग्यपुद्गलैस्ततो व्याप्तः-अस्तु भवतु, तथाप्यात्मनः कर्मबंधो न, च–पुनः, तत्–प्रसिद्धं, कर्म–कायवाङ्मनोयोगः, परिस्पंदात्मकं-आत्मप्रदेशपरिस्पंदस्वरूपं, अस्तु भवतु तथाप्यात्मनो न बंधः, अस्मिन्–आत्मनि, तानि–प्रसिद्धानि, करणानि-इंद्रियाणि संतु भवंतु, च पुनः, तत्–प्रसिद्धं, चिदित्यादिः, चित्–सचित्तः, अचित्–प्रासुकः, चिच्चाचिच्च तयोर्व्यापादनं, पीडनं, विनाशनं, अस्तु, अहो इति आश्चर्ये तथापि अयं सम्यग्दृगात्मा–सम्यग्दर्शनपरिणतश्चिद्रूपः, कुतोपि जगत्कर्मकरणचिदचिद्घातादेः—अन्यतरादपि ध्रुवं–निश्चितं, बंधं–कर्मबंधं, नैव उपैति–न प्राप्नोति, किंभूतः सन्? केवलं–रागादिनिरपेक्षं ज्ञानं–बोधमयो, भवन् जायमानः, पुनः उपयोग-भूमिं–उपयोगस्य–ज्ञानदर्शनस्य भूमिः–आत्मा, उपयोगो लक्षणमिति सूत्रकारवचनात्, तं, रागादीन् राग-द्वेषमोहान् अनयन्–अप्रापयन्–रागमयमात्मानमकुर्वन् न कुतोऽपि बध्नाति अयमात्मेति तात्पर्यं॥ ३॥
अथ तथापि ज्ञानिनां निरर्गलत्वं विद्वेषयति—

अर्थ– तिस कारणतैं सो कर्मनिकरि भर्या पूर्वोक्त लोक है सो होहू वहुरि सो मन वचन कायके चलनस्वरूप कर्मरूप योग है सो होहू, वहुरि पूर्वोक्त करण होहू बहुरि सो पूर्वोक्त चैतन्य अचैतन्यका व्यापादन कहिये घात करना होहू यह सम्यग्दृष्टि है सो रागादिककूं उपयोगभूमिमैं नाही प्राप्त करता संता अर केवल एक ज्ञानरूप होता संता, तिनि पूर्वोक्त कोईही कारणतैं बंधकूं प्राप्त नाही होय है, यह निश्चल सम्यग्दृष्टि है, अहो देखो! यह सम्यग्दर्शनकी अद्भुत महिमा है॥ भावार्थ–इहां सम्यग्दृष्टिका अद्भुत माहात्म्य कह्या है। अर लोक, योग, करण, चैतन्य अचैतन्यका घात ए बंधके कारण न कहे हैं॥ तहां ऐसा मति जानू-जो, परजीवकी हिंसातैं बंध न कह्या, तातैं स्वच्छंद होय हिंसा करना इहां अबुद्धिपूर्वक कदाचित् परजी-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वका घात भी होय , तातैं बंध न होय है। अर जहां बुद्धिपूर्वक जीव मारनेके भाव होहिंगे तहां तो अपनें उपयोगमें रागादिकका सद्भाव आवैगा, तहां हिंसातैं बंध होयहीगा ॥ जहां जीवकूं जीवावनेका अभिप्राय होय, ताकूंभी निश्चयनयमें मिथ्यात्व कहै हैं, तौ मारनेका अभिप्राय मिथ्यात्व क्यों न होगा ? तातैं कथनकूं नयविभागकरि यथार्थ समझि श्रद्धान करना, सर्वथा एकांत तौ मिथ्यात्व है ॥ ३ ॥ अब इस अर्थकूं दृढ करनेकूं व्यवहारनयकी प्रवृत्ति करानेकूं काव्य कहै हैं—

तथापि न निरर्गलं चरितुमिष्यते ज्ञानिनां
तदायतनमेव सा किल निरर्गला व्यापृतिः।
अकामकृतकर्म तन्मतमकारणं ज्ञानिनां
द्वयं नहि विरुध्यते किमु करोति जानाति च ॥ ४ ॥

सं० टी०—तथापि—कर्मबहुलकर्मकरणादीनामबंधकत्वे, रागादीनां बंधहेतुकत्वे च सत्यपि, ज्ञानिनां—पुंसां, निरर्गलं—निरंकुशं, चरितुं—प्रवर्तयितुं, न इष्यते—न वांछयते, किलेति कस्मात्, सा—प्रसिद्धा, निरर्गला—निरंकुशा, व्यापृतिः—सर्वत्र कायादिव्यापारे प्रवृत्तिः, तदायतनं—तस्य—बंधस्य, आयतनं स्थानं, एव निश्चयेन , ज्ञानिनां—पुंसां, तत् प्रसिद्धं, अकामेत्यादिः—अकामेन—अवांछया, कृतं—निष्पादितं, कर्म—क्रिया, कायवाङ्मनसां कर्म च अकारणं—बंधाहेतुकं, मतं—कथितं पूर्वाचार्यैः, हीति यस्मात् करोति क्रिया जानातिलक्षणाक्रिया एतद्द्वयं च किमु—कथं न विरुध्यते—विरोधं प्राप्नोतीत्यर्थः ॥ ४ ॥ अथ कर्तृज्ञात्रोः पृथक्त्वं विधीयते—

अर्थ—तथापि कहिये लोक आदि कारणनितैं बंध कह्या नाही अर रागादिकहीतैं बंध कह्या तोऊ ज्ञानीकूं निरर्गल कहिये मर्यादारहित स्वच्छंद प्रवर्तना योग्य न कह्या है जातै निरर्गल प्रवर्तन है सो बंधकाही ठिकाना है, ज्ञानीनिकै विनावांछा कर्म कार्य होय है, सो बंधका कारण न कहा है जातैं जानै भी है अर कर्मकूं करै भी है यह दोऊ क्रिया कहा विरोधरूप नाही है ? करना अर जानना तो निश्चयतैं विरोधरूपही हैं ॥ भावार्थ—पहली काव्यमें लोक आदि बंधके कारण न कहे तहां ऐसैं मति जानिये—जो बाह्य व्यवहारप्रवृत्ति बंधके कारणनिमें सर्वथाही निषेधी है, जो ज्ञानीनिकै अबुद्धिपूर्वक वांछाविना प्रवृत्ति होय है तातैं बंध न कह्या है तातैं ज्ञानीनिकूं स्वच्छंद प्रवर्तना तौ न कह्या है वेमर्याद प्रवर्तना तौ बंधकाही ठिकाना है ॥ जाननेमें अर करनेमें तौ विरोध है, ज्ञाता रहैगा, तौ बंध न होगा, कर्ता होयगा तब तौ बंध होयहीगा ॥४॥ अब कहै हैं-जो जानै है सो करै नाही है अर जो करै है सो जानै नाही है,जो करै है सो कर्मका राग है अर राग है सो अज्ञान है अर अज्ञान है सो बंधका कारण है । ऐसैं काव्यमें कहै हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जानाति यः स न करोति करोति यस्तु जानात्ययं न खलु तत्किल कर्मरागः।
रागं त्वबोधमयमध्यवसायमाहुर्मिथ्यादृशः स नियतं स च बंधहेतुः ॥ ५ ॥

सं० टी०—खल्विति निश्चयार्थे, यः—चिद्रूपः, जानाति–स्वपरस्वरूपं वेत्ति, सः–चिद्रूपः न करोति कर्मादि न विधत्ते यस्तु कश्चित् ज्ञानादन्यः करोति–कर्म निर्मापयति, तु—विशेषे,अयं–कर्मकर्ता न जानाति न परिच्छिनत्ति, तस्याज्ञानरूपत्वात् किल इति निश्चितं, तत्–करोतिक्रियावच्छिन्नं—कर्म रागः, राग एव करोतीत्यर्थः, तु–पुनः, रागं अध्यवसायं आहुः रागस्य कषायानुभागाध्यवसायेति संज्ञां प्रतिपादयंति जिनाः, इति स्वरूपविरचितत्वं संज्ञाया निरस्तं, कीदृक्षं रागं ? अबोधमयं—अज्ञानस्वरूपं, हन्मि–हन्ये जीवामि–जीव्येऽहमनेनेत्यादीनामज्ञानरूपत्वात्, सः रागः, नियतं–निश्चितं, कस्य भवति ? मिथ्यादृशः–मिथ्यादृष्टेः, नत्वन्यस्य सम्यग्दृष्टेः, च–पुनः, सः–रागः, बंधहेतुः–कर्मबंधकारणं ॥ ५ ॥ अथाहं मरणादीनां कारक इत्यभिप्रेतस्य मिथ्यादृष्टित्वं दरीदृश्यते पद्यद्वयेन—

अर्थ–जो जानै है, सो करे नाही है। बहुरि जो करे है, सो जाने नाही है। बहुरि जो करे है, सो निश्चयतैं यह कर्मराग है बहुरि जो राग है, ताकूं मुनि हैं ते अज्ञानमय अध्यवसाय कहै हैं। सो यह मिथ्यादृष्टिकै होय है, सो नियमतैं बंधका कारण है॥

सर्वं सदैव नियतं भवति स्वकीयकर्मोदयान्मरणजीवितदुःखसौख्यं।
अज्ञानमेतदिह यत्तु परः परस्य कुर्यात्पुमान्मरणजीवितदुःखसौख्यं॥ ६ ॥

सं० टी०—इह–जगति, एतत्–वक्ष्यमाणं–अज्ञानं ज्ञानभावव्यतिरिक्तं, एतत्किं ? यत्तु परः– अन्यः पुमान्, परस्य ततोऽन्यस्य कस्य चिदिष्टानिष्टस्य पुंसः, मरणेत्यादिः–मरणं–प्राणवियोजनं मरणं च जीवितं च दुःखं च सौख्यं च तेषां समाहारो मरणजीवितदुःखसौख्यं कुर्यात्–यो मन्यते हिनस्मि, जीवयामि, दुःखिनं करोमि, सुखिनं करोमि इति क्रियां निर्मापयेत्, एतत्—अज्ञानं, कुतः ? नियतं—निश्चितं सर्वं-समस्तं, मरणजीवितदुःखसौख्यं सदैव–संसारदशायां, भवति–जायते स्वेत्यादिः स्वकीयस्यात्मोपार्जितस्य कर्मण उदयात् आयुःक्षयेण जीवानां मरणं, सत्यायुषि जीवितव्यं, आयुर्हरणाभावात् कथं तत्परेण कृतं। शुभाशुभकर्मोदयात् सुखदुःखिता जीवा भवंति तत्कर्मदानाभावात् कथं ते तादृशाः कृताः परेणेति भावः ६

अर्थ–इस लोकमें जीवनिके मरण जीवित दुःख सुख हैं ते सर्वही सदा काल नियमतैं अपने अपने कर्मके उदयतैं होय हैं॥ बहुरि जो परपुरुष हैं सो परके मरण जीवित दुःख सुख करे हैं यह मानना है सो अज्ञान है॥ ६ ॥ फेरि इसही अर्थकूं दृढ करते संते अगिले कथनकी सूचनिकारूप काव्य कहै हैं॥

अज्ञानमेतदधिगम्य परात्परस्य पश्यंति ये मरणजीवितदुःखसौख्यं।
कर्माण्यहंकृतिरसेन चिकीर्षवस्ते मिथ्यादृशो नियतमात्महनो भवंति ॥७॥

सं० टी०–ते–पुरुषाः, नियतं–निश्चितं, मिथ्यादृशः–मिथ्यादृष्टयः, भवंति–जायंते, किंभूताः ? आत्महनः आत्मानं घ्नंतीति आत्महनः–स्वरूपघातकाः स्वस्वरूपाद्विपर्यस्तत्वात् पुनः कर्माणि–शुभाशुभानि, चिकी-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्वः—स्वसात्कर्तुमिच्छवः, केन ? अहंकृतिरसेन–मयायं हतो जीवितश्चेत्यादिरूपेणाहंकाररसेन, ते के ? ये–नराः, परात्–भिन्नात्, परस्य–ततोन्यस्य, पश्यंति–ईक्षंते, किं ? मरणजीवितदुःखसौख्यं किं कृत्वा ? एतत्–पूर्वोक्तं, मयायं हत इत्यादिरूपमज्ञानं, अधिगम्य–प्राप्य ॥७॥ अथाध्यवसायस्य बंधहेतुत्वं पाप्ठयते–

अर्थ–यह पूर्वोक्त मानना अज्ञान है, ताही प्राप्त होयकरि जे पुरुष परतैं परकै मरण जीवित दुःख सुख होना देखे है, मानै हैं, ते पुरुष मैं इनि कर्मनिकूं करुं हूं ऐसा अहंकाररूप रसकरि कर्मनिकूं करनेके इच्छक हैं, कर्म करनेकी मारने जीवावनेकी सुखी दुःखी करनेकी वांछा करे हैं, ते नियमकरि मिथ्यादृष्टि हैं। आपहीकरि अपना घात जिनिकै पाइये है ऐसे हैं॥ भावार्थ–जे परकूं मारने जीवावनेका तथा सुख दुःख करनेका अभिप्राय करे हैं, ते मिथ्यादृष्टि हैं। अर अपना स्वरूपतैं च्युत भये रागी द्वेषी मोही होय आपहीकरि आपका घात करे है, तातैं हिंसक हैं॥ ७॥

मिथ्यादृष्टेः स एवास्य बंधहेतुर्विपर्ययात्।
य एवाध्यवसायोयमज्ञानात्मास्य दृश्यते॥ ८॥

सं० टी०–अस्य मिथ्यादृष्टेः, य एव प्रसिद्धः अध्यवसायः अहं परान् हन्मीत्यादिरूपः परिणामः स एव अध्यवसाय एव, बंधहेतुः –कर्मबंधकारणं, कुतः ? विपर्ययात् ज्ञानाद्विपर्ययस्वभावत्वात् अस्य मिथ्यादृशोऽध्यवसायः बंधहेतुः कथं ? यतः–अयं अध्यवसायः अज्ञानात्मा–अज्ञानमेव आत्मा स्वरूपं यस्य सः दृश्यते–अवलोक्यते॥ ८॥ अथाध्यवसायमाहात्म्यमारभते–

अर्थ–मिथ्यादृष्टीका जो यह अध्यवसाय है जो अज्ञानरूप प्रत्यक्ष दीखै है, सोही यह अभिप्राय मिथ्या विपर्ययस्वरूप है तातैं बंधका कारण है। भावार्थ–झूठा अभिप्राय सो मिथ्यात्व है सो ही बंधका कारण है ऐसैं जानना॥

अनेनाध्यवसानेन निष्फलेन विमोहितः।
तत्किंचनापि नैवास्ति नात्मात्मानं करोति यत्॥ ९॥

सं० टी०–एव–निश्चयेन, तत–वस्तु, किंचनापि–किमपि, महदल्पं वा नास्ति–न विद्यते, यत् आत्मा–जीवः,आत्मानं स्वकीयं अध्यवसायेनैव नकरोति न विधत्ते,किंभूतः ? अनेन हन्मीत्यादिरूपेण,पूर्वोक्तेन अध्यवसानेन कषायाध्यवसायेन, विमोहितः—मोहं प्राप्तः, किंभूतेन ? निष्फलेन—बंधमोक्षलक्षणफलरहितेन, जीवस्य सरागवीतरागयोः स्वपरिणामयोः सद्भावे बंधमोक्षसद्भावात् तदभावे तयोरभावात् अतस्तयोरेव स्वार्थक्रियाकारित्वं, अनध्यवसायस्याकिंचित्करत्वात्॥ ९॥ अथ तथाप्यध्यवसायं बीभत्सते–

अर्थ–आत्मा है सो इस निष्फल निरर्थक अध्यवसायकरि मोह्या हुआ आपकूं, अनेकरूप करै है। सो ऐसा पदार्थ कोई जगतमें नाहीं है-जिसरूप आपकूं नाही करै,सवहीरूप करै है। भावार्थ–यह आत्मा मिथ्या अभिप्रायकरि भूल्या हुवा चतुर्गतिसंसारमें जेती अवस्था हैं, जेते पदार्थ हैं, तिनिसर्वस्वरूप आपकूं भया मानै है। अपना शुद्धस्वरूपकूं नाही पहिचाने है॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विश्वाद्विभक्तोऽपि हि यत्प्रभावादात्मानमात्मा विदधाति विश्वं ।
मोहैककंदोऽध्यवसाय एष नास्तीह येषां यतयस्त एव ॥ १० ॥

सं० टी०—इह–जगति, त एव–प्रसिद्धाः, यतयः–यतंते कर्मादीनीति यतयः–मुनयः, येषां यतीनां, एषः इदानीमुक्तः, अध्यवसायो नास्ति, किंभूतः मोहैककंदः–मोहस्य रागद्वेषस्य एकः—अद्वितीयः, कंदः–मूलकारणं यः सः, मोहनीयकर्मोत्पादकत्वात्, हीतिस्फुटं, यत्प्रभावात्–यस्य–अध्यवसायस्य, प्रभावः माहात्म्यं तस्मात् विश्वं–चेतनाचेतनं लोकालोकं शुभाशुभ–चराचरं आत्मानं–स्वकीयं, करोति—विधत्ते यथा हिंसाध्यवसायात् हिंसकः तथा विपच्यमाननारकतिर्यग्मनुष्यदेवपुण्यपापाध्यवसायान्नरकं तिर्यंचं मनुष्यं देवं पुण्यं पापं चात्मानं करोति,किंभूतः ? विश्वात् चेतनाचेतनादिपदार्थात् विभक्तोऽपि भिन्नोऽपि तदध्यवसायवशात्तन्मयो भवति । विश्वशब्दस्य त्रिलोकार्थवाचकत्वाभावात् चेतनादिपदार्थवाचकत्वाच्च न सर्वादिगणत्वं अथाध्यवसायस्य व्यावहारिकत्वं व्यवहरति—

अर्थ—यह आत्मा समस्तद्रव्यनितैं भिन्न है, तौऊ जिस अध्यवसायके प्रभावतैं आपकूं समस्तस्वरूप करै है, सो यह अध्यवसाय कैसा है ? मोह है एक कंद जाका । सो यह अध्यवसाय जिनिकै नाही है, ते यति हैं मुनि हैं ।

सर्वत्राध्यवसानमेवमखिलं त्याज्यं यदुक्तं जिनै-
स्तन्मन्ये व्यवहार एव निखिलोप्यन्याश्रयस्त्याजितः ।
सम्यङ् निश्चयमेकमेव तदमी निष्कंपमाक्रम्य किं
शुद्धज्ञानघने महिम्नि न निजे बध्नंति संतो धृतिं ॥११॥

सं० टी०–जिनैः–केवलज्ञानिभिः उक्तं–प्रतिपादितं,किं सर्वत्र–निखिलपरवस्तुनि यत् अखिलं–समस्तमेव, अध्यवसानं व्यवसायः, त्याज्यं–त्यजनीयं, तत्–व्यवसायहापनं, मन्ये–अहं जाने, निखिलोऽपि, समस्तोपि व्यवहार एव व्यवहारनय एव त्याजितः, हेतुगर्भितविशेषणमाह–अन्याश्रयः–पराश्रितः निश्चयनयेन पराश्रितमध्यवसायं बंधहेतुत्वेन मुमुक्षोः प्रतिषेधयता व्यवहारनय एव प्रतिषिद्धः, तस्यापि पराश्रितत्वाविशेषात् तत्–तर्हि किंकर्तव्यं ? अमी–एते, संतः–सत्पुरुषाः, निजे आत्मीये, महिम्नि–माहात्म्ये, धृतिं—संतोषं, स्थिरतां वा, किं–किमु न बध्नंति ? अपि तु कुर्वंतीत्यर्थः । किंभूते ? शुद्धज्ञानघने–कर्ममलकलंकरहित बोधनिरंतरे, किं कृत्वा ? आक्रम्य—संप्राप्य, किं ? एकं अन्यनिरपेक्षं, एव–निश्चयेन, सम्यग्निश्चयं—शुद्धनिश्चयनयं किंभूतं ? निष्कंपं–अचलं, स्वरूपे स्थिरत्वात् ॥ ११ ॥ अथ रागादीनां किंकारणं ? इति साक्षेपं प्रश्नोत्तरं पद्यद्वयेन निर्मिमीते—

अर्थ–सर्वही वस्तुनिविषैं जो समस्त अध्यवसान है उनकूं जिन भगवान् त्यागने योग्य कह्या है । सो आचार्य कहैं हैं,हम ऐसैं मानैं हैं जो परके आश्रय प्रवर्तता जो व्यवहार सो सर्वही छुडाया है तातै हम उपदेश करे हैं-जो सत्पुरुष हैं, ते सम्यक्प्रकार एक निश्चयहीकूं निष्कम्प जैसे होय तैसे निश्चल अंगीकार करिके अर शुद्धज्ञानघनस्वरूप अपना महिमा आत्मस्वरूप, ता विषैं थिरता क्यों नाही धारैं हैं ? भावार्थ–जिनेश्वर देव अन्यपदार्थनिविषैं आत्मबुद्धिरूप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अध्यवसाय छुडाया है, सो यह पराश्रित सर्वही व्यवहार छुडाया है ऐसैं जानू, तातैं शुद्धज्ञान-स्वरूप अपना आत्मा, ताविषैं थिरता राखियो, ऐसा शुद्धनिश्चयका ग्रहणका उपदेश है। आचार्य आश्चर्य भी किया है-जो भगवान् अध्यवसानकूं छुडाया, तौ अब सत्पुरुष याकूं छोडि अपने स्वरूपविषैं क्यों नाही तिष्ठैं हैं? यह हमारे अचिरज है।

रागादयो बंधनिदानमुक्तास्ते शुद्धचिन्मात्रमहोऽतिरिक्ताः।
आत्मा परो वा किमु तन्निमित्तमिति प्रणुन्ना पुनरेवमाहुः ॥१२॥

सं० टी —इति-साक्षेपं, प्रणुन्नः शुद्धनयावलंबिनः पृष्टाः संतः, पुनः-भूयः, एवं-अग्रे वक्ष्यमाणं, परं उत्तरं, आहुः—कथयंति, इति किं ? ते-प्रसिद्धाः, रागादयः—रागद्वेषमोहाः बंधनिदानं—कर्मबंधकारणं, उक्ताः-प्रतिपादिताः' किंभूतास्ते ? शुद्धेत्यादिः-शुद्धचिदेव मात्रा प्रमाणं यस्य तत् तच्च तन्महः परंज्योतिः तेन तस्माद्वा, अतिरिक्ताः-भिन्नाः, तन्निमित्तं-रागादीनां निमित्तं-उत्पादकारणं, किमु-अहो, आत्मा-चेतनः, रागादीनामुत्पादकः, वा परः पुद्गलः, तद्धेतुः इत्युक्ते आहुः—

अर्थ-इहां शिष्य फेरि पूछै है, जो रागादिक हैं, ते तौ बंधके कारण कहे, बहुरि ते शुद्ध-चैतन्यमात्र यह जो आत्मा तातैं अतिरिक्त कहिये भिन्न कहे-न्यारे कहे, तहां तिनिके होनेमें आत्मा निमित्त है, कि पर कोई निमित्त है? ऐसे प्रेरे हुये आचार्य फेरि आगाने याका उत्तर दृष्टांत पूर्वक कहैं हैं—

न जातु रागादिनिमित्तभावमात्मात्मनो याति यथार्ककांतः।
तस्मिन्निमित्तं परसंग एव वस्तुस्वभावोयमुदेति तावत् ॥ १३ ॥

सं० टी०—जातु-कदाचित्, आत्मा-चिद्रूपः, आत्मनः-स्वस्य, रागेत्यादिः-रागादीनां-रागद्वेषमोहानां, निमित्तभावं उपादानकारणत्वं न याति-न प्राप्नोति तर्हि तन्निमित्तं किं ? तस्मिन्, आत्मनि परसंगः परेषां-पुद्गलादीनां, संगः-संयोगः, एव निश्चयेन, तन्निमित्तं-तेषां-रागादीनां निमित्तं-कारणं इममेवार्थमुपमीयते-अर्ककांतः-स्फटिकोपलः-यथा-इव, तथाहि-यथा स्फटिकोपलः परिणामस्वभावत्वे सत्यपि स्वस्य शुद्धस्वभावत्वेन रागादिनिमित्तत्वाभावात् स्वयं न परिणमते परद्रव्येणैव रागादिनिमित्तभूतेन स्वस्वरूपात्प्रच्याव्य रागादिभिः परिणम्यते तथा केवलः आत्मा परिणामस्वभावत्वे सत्यपि रागादिनिमित्तत्वाभावात् स्वयं न परिणमते परद्रव्येणैव तन्निमित्तभूतेन स्वस्वरूपात्प्रच्याव्य तैः परिणम्यते इति तावत्-प्रथमं, अयं, पूर्वोक्त एव, वस्तुस्वभावः-समस्तं वस्तुस्वरूपं, उदेति-उदयं गच्छति ॥ १३ ॥ अथ ज्ञानिनस्तदकर्तृत्व-मुद्भावति—

अर्थ-आत्मा है सो आपके रागादिकका निमित्तभावकूं कदाचित् न प्राप्त होय है, तिस आत्माविषैं रागादिकका निमित्त परद्रव्यका संगही है, इहां सूर्यकांतमणिका दृष्टांत है जैसे सूर्य-कांतमणि आपहीं तौ अग्निरूप नाही परिणमै है, तिसविषैं सूर्यका बिंब अग्निरूप होनेकूं निमित्त है, तैसे जानना। यह वस्तूका स्वभाव उदयकूं प्राप्त है काहुका किया नाही है ॥ १३ ॥ आगैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कहे हैं, जो ऐसा वस्तूका स्वभावकूं जानता संता ज्ञानी रागादिककूं आपके नाही करै है ऐसा सूचनिकाका श्लोक है—

इति वस्तुस्वभावं स्वं ज्ञानी जानाति तेन सः।
रागादीन्नात्मनः कुर्यान्नातो भवति कारकः॥ १४ ॥

सं. टी.—इति-पूर्वोक्तप्रकारेण, ज्ञानी-पुमान्, स्वं-आत्मीयं, वस्तुस्वभावं-रागादिव्यतिरिक्तं स्ववस्तु-स्वरूपं, जानाति-वेत्ति येन कारणेन वेत्ति तेनैव कारणेन, सः-ज्ञानी, रागादीन्-आत्मनः-स्वस्य, न कुर्यात् स्ववसात् न करोति ? यतः, अतः कारकः कर्मणां कर्ता न भवति ॥ १४ ॥ अथाज्ञानं स्फूर्जति—

अर्थ—जैसे अपने वस्तुभावकूं ज्ञानी है सो जो जाने है, तिस कारणकरि सो ज्ञानी रागादिककूं आपकै नाही करे है, तातै रागादिकका कारक नाही है ॥१४॥

इति वस्तुस्वभावं स्वं नाज्ञानी वेत्ति तेन सः।
रागादीन्नात्मनः कुर्यादतो भवति कारकः॥ १५ ॥

सं. टी.—इदं पद्यं पूर्वतो विपर्यस्तं व्याख्येयं सुगमं च ॥ १५ ॥ अथ परद्रव्यमुद्धर्तुकामं समभिष्टौति—

अर्थ—अज्ञानी है सो ऐसा अपना वस्तुभावकूं नाही जाने है, तिस कारणकरि सो अज्ञानी रागादिकभावनिकूं आपके करे है, यातै तिनिका कारक होय है ॥ १५ ॥

इत्यालोच्य विवेच्य तत्किल परद्रव्यं समग्रं बला-
त्तन्मूलां बहुभावसंततिमिमामुद्धर्तुकामः समं।
आत्मानं समुपैति निर्भरवहत्पूर्णैकसंविद्युतं
येनोन्मूलितबंध एष भगवानात्मात्मनि स्फूर्जति॥ १६ ॥

सं टी—एषः-सः-आत्मा-चिद्रूपः कर्ता, आत्मनि-स्वस्वरूपे अधिकरणभूते, स्फूर्जति-गर्जति-प्रकटी-भवति वा, किंभूतः ? उन्मूलितबंधः-उन्मूलितः—निराकृतो बंधो येन सः, पुनः भगवान्-ज्ञानवान्, पुनः कीदृक्षः ? बलात्-ध्यानादिलक्षणात् हठात्, इमां प्रसिद्धां वह्नित्यादि-बहूनां भावानां-विभावपरिणा-मानां संततिः परंपरा तां, रागद्वेषमोहपरंपरामित्यर्थः, समं-युगपत्, उद्धर्तुकामः उद्धर्तुं निराकर्तुं, कामः वांछा, यस्य सः, कुतः ? स्वस्मात् इत्यनुक्तमप्यपादानं ज्ञेयं, किंभूतां ? तन्मूलां तदेव परद्रव्यमेव तस्यैव वा मूलं कारणं या तां, स कः ? येन ज्ञानरूपेण करणभूतेन, आत्मानं कर्मतापन्नं समुपैति प्राप्नोति, किंभूतं तं ? निर्भरेत्यादिः निर्भरेण अतिशयेन, वहंती समस्तवस्तुग्रहणाय प्रवर्तमाना सा चासौ पूर्णा अखंडा सा चासावेका संवित् ज्ञानं तया युतं संयुतं, किंकृत्वा ? किलेति निश्चितं, तत् प्रसिद्धं, समग्रं निखिलं, परद्रव्यं कस्येत्याकांक्षायां स्वस्येति संबंधोऽनुक्तोऽप्यूह्यं, विवेच्य पृथक्कृत्य, किंकृत्वा ? इति पूर्वोक्तप्रकारेण आलोच्य सम्यग्विचार्य किमर्थं ? स्वस्मै इत्यप्यत्र ज्ञेयं ॥ १६ ॥ अथ रागादीनां दारकत्वं दिशति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—जो ऐसे परद्रव्यके अर अपने भावके निमित्तनैमित्तिकपणा विचारिकरि, तिस परद्रव्यसमस्तकूं अपना बल-पराक्रम उद्यमकरि, त्याग करिके,अर सो परद्रव्य है मूल जाका ऐसी बहुत भावनिकी संतति-परिपाटीकूं दूरि युगपत् उडावनेकूं चाहता संता अतिशयकरि वहता प्रवाहरूप धारावाही पूर्ण एक स्वसंवेदन, तिसकरि युक्त जो अपना आत्मा, ताहि प्राप्त होय है। जिसकारणकरि उन्मूलित कीये हैं-मूलतैं उपाडे हैं कर्मके बंधन् जाने ऐसा भगवान् यह आत्मा आपहीविषैं स्फुरायमान प्रगट होय है ॥ भावार्थ—परद्रव्यके अर अपने भावके निमित्त-नैमित्तिकभाव जानि, समस्त परद्रव्यकूं त्यागैं, तब समस्तरागादि भावनिकी संतति कटिजाय तब आत्मा अपनाही अनुभव करता संता कर्मके बंधनकूं काटि आपहीविषैं प्रकाशरूप प्रगटै है। तातैं अपना हित चाहै है ॥ अब बंध अधिकार पूर्ण कीया, ताके अंतमंगलरूप ज्ञानकी महिमा का अर्थरूप कलशकाव्य कहै हैं—

रागादीनामुदयमदयं दारयत्कारणानां
कार्यं बंधं विविधमधुना सद्य एव प्रणुद्य।
ज्ञानज्योतिः क्षपिततिमिरं साधु सन्नद्धमेतत्
तद्वद्यद्वत्प्रसरमपरः कोऽपि नास्या वृणोति ॥ १७ ॥

सं० टी०—तद्वत्—तथा एतत् ज्ञानज्योतिः—बोधतेजः, अपरं—न विद्यते परं अन्यत् यस्य तत्, प्रसरं प्रस्तारं विस्तारं यातीत्याध्याहार्यं यद्वत्—यथा,अस्य—ज्ञानज्योतिषः, विस्तरं कोऽपि अपरः—कर्मादिः, नावृणोति नाच्छादयति, कीदृशं तत्? क्षपिततिमिरं—क्षपितं निराकृतं तिमिरं—अज्ञानं, येन तत् अपरमपि ज्योतिः नाशितांधकारं पुनः साधुसन्नद्धं साधुभिः—योगीश्वरैः, पक्षे साधुपुरुषैः सन्नद्धं—आरूढं, स्तुतं च साधुभिः स्तूयमानत्वाज्ज्योतिषः, पुनः रागादीनां रागद्वेषमोहानां, उदयं—प्राकट्यं अदयं—निर्दयं यथा भवति तथा, भवति तथा सद्य एव—तत्कालमेव, दारयत्—विदारणं कुर्वत्, अन्यदपि ज्योतिः प्रातर्जानां रागादीनां दारकमित्युक्लिेशः, किं कृत्वा? अधुना—इदानीं, विविधं—प्रकृतिस्थित्यनुभागादिभेदेनानेकविधं बन्धं, प्रणुद्य—निराकृत्य, किंभूतं? कारणानां—उपादानरूपपुद्गलानां कार्यं—फलं कर्मरूपं ॥ १७ ॥

अर्थ—यह ज्ञानज्योति है सो क्षेप्या है-दूरि किया है अज्ञानरूप अंधकार जाने सो तैसे सम्यकप्रकार सज्या जैसे याका प्रसर कहिये फैलना अपर कोई आवरे नाही सो यह ऐसा पहलै कहा करिकै सज्या सो कहै हैं। पहले तो बंधके कारण जे रागादिकभाव, तिनिका उदय कूं जैसे निर्दयी काहूकूं विदारै तैसे तिनिकूं विदारता संता प्रगटचा,पीछै जब कारण दूरी भये, तब तिनिका कार्य जो कर्मका ज्ञानावरण आदि अनेक प्रकार बंध, ताकूं अब तत्कालही दूरि करके अर सज्या है ॥ भावार्थ—ज्ञान प्रगट होय है जब रागादिक न रहै, तिनिका कार्य बंध न रहै, तब फेरि याकूं आवरणेवाला कोई न रहै, सदाकाल प्रकाशरूप रहै ॥ ऐसे रंगभूमिमैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बंधका स्वांग प्रवेश कीया था, सो ज्ञानज्योति प्रगट भया, तब बंध स्वांग दूरिकरि निकसिगया

जो नर कोय परै रजमाहि सचिक्कण अंग लगै वह गाढ़ै।
त्यौं मतिहीन जु राग विरोध लिये विचरै तब बंधन बाढ़ै॥
पाय सभै उपदेश यथारथ रागविरोध तजै निज चारै।
नाहि बंधै नव कर्मसमूह जु आप गहै परभाव निकारै॥ १॥

विशेष–भ० शुभचंद्रजीने 'कारणानां कार्यं' इस वाक्यको 'बंधं' का विशेषण किया है एवं 'उपादानरूप पुद्गलोंके फलरूप बंधको' यह अर्थ किया है किंतु पं० जयचन्दजीने 'कारणानां' को रागादीनां का ही विशेषण कर कारणरूप जो राग आदि यह अर्थ किया है तथा 'साधुसन्नद्धं'-इस पदका अर्थ इस संस्कृत टीकामें साधुओंसे स्तुत यह अर्थ किया है किंतु पं० जयचन्दजीने अच्छी तरह सजाहुआ यह अर्थ किया है॥ १७॥

इति श्रीसमयसारस्थपद्यस्याध्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां सप्तमोऽङ्कः॥ ७॥

इस प्रकार परमाध्यात्मतरंगिणीकी वचनिकाविषैं सातवां बंधाधिकार पूर्ण भया॥७॥

मोक्षाधिकारः॥ ८॥

नानाबंधध्वंसनकृतकेलिः कुन्दकुन्दविधुवर्यः। विधिविविधामृतचन्द्रेद्धो भाति गुरुर्ज्ञानभूषाढ्यः।

अथ मोक्षतत्त्वं क्रमप्राप्तमाक्रामति–

द्विधाकृत्य प्रज्ञाक्रकचक [द]लनाद्बंधपुरुषौ नयन्मोक्षं साक्षात्पुरुषमुपलंभैकनियतं
इदानीमुन्मज्जत्सहजपरमानंदसरसं परं पूर्णं ज्ञानं कृतसकलकृत्यं विजयते॥१॥

सं० टी०–इदानीं–अधुना, मोक्षतत्त्वकथनावसरे, ज्ञानं विजयते–सर्वोत्कर्षेण वर्तते, किंभूतं? कृतेत्यादिः कृतं–निष्पादितं सकलं कृत्यं–संसारावस्थाकर्तव्यं येन तत्, पुनः पूर्णं—संपूर्णं, प्रकर्षप्राप्तत्वात्, परं—उत्कृष्टं, सर्वप्रकाशकत्वात्, सहजेत्यादिः सहजः—अकृत्रिमः, परमानंदः–परमसुखं, तेन सरसं–रसाढ्यं, उन्मज्जत्–उदयं गच्छत्, पुरुषं–आत्मानं, साक्षात्–अक्रमेण, मोक्षं मुक्तिसंपदं, नयत्–प्रापयत्, किंभूतं तं? उपेत्यादिः—उपलंभः–स्वस्वरूपप्राप्तिः तत्र एकेन स्वभावेन नियतं—स्थितं तत्र लीनमित्यर्थः, किंकृत्वा? द्विधाकृत्य–पृथक्कृत्वा, कौ? बंधपुरुषौ–बंधः कर्मश्लेषः, पुरुषः–आत्मा, द्वंद्वः, तौ परस्परं मिलितौ पृथग्विधायेत्यर्थः कुतः? प्रज्ञेत्यादिः—प्रज्ञा—भेदविज्ञानं सैव क्रकचः—करपत्रं, तेन दलनं तस्मात्॥ १॥ अथ प्रज्ञाछेत्रीमभिष्टौति–

अर्थ–अब बंधपदार्थके अनंतर पूर्णज्ञान है सो प्रज्ञारूप करोंतकरि दलन कहिये विदारणतैं बंध अर पुरुषकूं द्विधा कहिये न्यारे न्यारे दोय करि अर पुरुषकू साक्षात् मोक्षकूं प्राप्त करता संता जयवंत प्रवर्तै है॥ कैसा है पुरुष? उपलंभ कहिये अपना स्वरूपका साक्षात् अनुभवन, ताहीकरि निश्चित है। बहुरि ज्ञान कैसा है? उदय होता जो अपना स्वाभाविक परम आनंद ताकरि सरस है रस भर्या है, बहुरि पर कहिये उत्कृष्ट है, बहुरि किये हैं समस्त करने योग्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कार्य जाने-अब कछु करना न रह्या है ।। भावार्थ—ज्ञान है सो बंध पुरुषकूं जुदे करि पुरुषकूं मोक्ष प्राप्त करता संता अपना संपूर्णरूप प्रगट करि जयवंत प्रवर्तै है, याका सर्वोत्कृष्टपणा कहना यह ही मंगलवचन है ।।

प्रज्ञाछेत्री शितेयं कथमपि निपुणैः पातिता सावधानैः
सूक्ष्मेऽन्तःसंधिबंधे निपतति रभसादात्मकर्मोभयस्य ।
आत्मानं मग्नमंतःस्थिरविशदलसद्धाम्नि चैतन्यपूरे
बंधं चाज्ञानभावे नियमितमभितः कुर्वती भिन्नभिन्नौ ।। २ ।।

सं० टी०—इयं-प्रसिद्धा,प्रज्ञाछेत्री-बुद्धिछेत्री, शिता-अतितीक्ष्णा, रभसात्-वेगेन, निपतति-भिन्नकरणार्थं पतनं करोति, क्व ? सूक्ष्मे-अत्यत प्रत्यासन्नत्वाच्चैतन्यचेतकभावेनैकीभूतत्वेन सूक्ष्मे, अन्तः संधिबंधे—अंतः-अभ्यंतरे, कर्मात्मनाः संधिबन्धे सन्धानश्लेषे, कस्य ? आत्मकर्मोभयस्य—चिद्रूपकर्मयुगमस्य, कीदृक्षा सा ? कथमपि महताग्रहेण पातिता तयोर्मध्ये भिन्नकरणकृते मुक्ता सती, कैः ? निपुणैः-धीमद्भिः, सावधानैः—एकाग्रचित्तैः, अभितः—सामस्त्येन, लक्षणभेदात् भिन्नभिन्नौ परस्परं तौ द्वौ भिन्नौ भिन्नौ, कुर्वती—निर्मापयती, कं ? आत्मानं—चिद्रूपं, च पुनः, बन्धं—कर्मबन्धं कीदृक्षं-चिद्रूपं-चैतन्यपूरे समस्तशेषद्रव्यासाधारणत्वाच्चैतन्यं स्वलक्षणं,तस्य पूरः-समूहः,तत्रमग्नं-तन्मयमापन्नं,अंतरित्यादिः अंतः-अभ्यंतरे चिद्रूपे स्थिरं-अन्यत्र गमनाभावात् तत्रैव स्थितिमत् तच्च तद्विशदं च निर्मलं, लसत् देदीप्यमानं धाम—महो यस्य तस्मिन्, कीदृक्षं बन्धं ? अज्ञानभावे-अज्ञानस्वरूपे रागादौ स्वलक्षणे, नियमितं-निश्चयीभूतं,—तन्मयत्वमापन्नमित्यर्थः । अन्यापि छेत्री द्वयोर्धात्वोः स्वलक्षणभिन्नयोः अंतः पातिता सती भिन्नत्वं चकरीति तथा प्रज्ञाछेत्रीति विज्ञेयम् ।। २ ।। अथ तयोर्भेदकं प्रलपति—

अर्थ—आत्मा अर बंधकूं भिन्न करनेकूं यह प्रज्ञा है सो तीक्ष्ण छैनी है । सो जे प्रवीण पुरुष हैं ते सावधान प्रमादरहित भये संते आत्मा अर कर्म इनि दोऊंनिका सूक्ष्म जो अंतः कहिये सांहिला संधीका बंधन, ताविषैं याकूं कोई प्रकार यत्नकरि ऐसे पटकै हैं सो यह बुद्धिरूपी छैनी तहां पडी हुई शीघ्रही समस्तपणैं भिन्न भिन्न करती पडै है । सो आत्माकूं तौ अंतरंगविषैं स्थिर अर विशदलसत् कहिये स्पष्ट प्रकाशरूप दैदीप्यमान है धाम कहिये तेज जाका ऐसा जो चैतन्यका पूर प्रवाह, ताविषैं मग्न करती संती पडै है । बहुरि बंधकूं अज्ञानभावविषैं निश्चल नियमतैं करती संती पडे है ।। भावार्थ—इहां आत्मा अर बंधका भिन्न भिन्न करना नामा कार्य है । ताका कर्त्ता आत्मा है । अर करणविना कर्त्ता काहेकरि कार्य करै ? तातैं करण चाहिये । अर निश्चयनयकरि कर्त्तातैं भिन्न करण होय नाहीं । तातैं आत्मातैं अभिन्न यह बुद्धि ही, इस कार्यविषैं करण है । सो आत्माकै अनादि बंध ज्ञानावरणादि कर्म हैं तिनिका कार्य भाव कर्म तौ रागादिक हैं । अर नोकर्म शरीरादिक हैं । सो बुद्धिकरि आत्माकूं शरीरतैं तथा ज्ञानावरणादिक द्रव्यकर्मतैं तथा रागादिक भावकर्मतैं भिन्न एक चैतन्यभावमात्र अनुभव करि ज्ञान

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हीमें लींन राखना, यहही भिन्न करना याहीतैं सर्व कर्मका नाश होय, सिद्धपदकूं प्राप्त होय है, ऐसे जानना ॥

भित्त्वा सर्वमपि स्वलक्षणबलाद्भेत्तुं हि यच्छक्यते
चिन्मुद्रांकितनिर्विभागमहिमा शुद्धश्चिदेवास्म्यहं ।
भिद्यंते यदि कारकाणि यदि वा धर्मा गुणा वा यदि
भिद्यंतां न भिदास्ति काचन विभौ भावे विशुद्धे चिति ॥३॥

सं० टी० —हि स्फुटं, अहं–अहकं, शुद्धः–द्रव्यभावनोकर्ममलमुक्तः, चिदेव–चेतनास्वरूपमेव, अस्मि भवामि, किंभूतः ? चिदित्यादिः–चिदेव मुद्रा–चिह्नं, तथा अंकितः–चिह्नितः, निर्विभागः–भेत्तुमशक्यो दुर्लंघ्यत्वात्, महिमा–माहात्म्यं यस्य सः, किंकृत्वा ? यत् पुद्गलादिकं कर्म, भेत्तुं–द्विधाकर्तुं, शक्यते–शक्यानुष्ठानं भूयते स्वलक्षणानां भेत्तुमशक्यत्वात् शक्यानुष्ठानाभावः, परलक्षणानां भेत्तुं शक्यत्वात् शक्यानुष्ठानं तत् सर्वमपि–समस्तमपि कर्मबंधं भित्त्वा–द्विधा विधाय, कुतः ? स्वेत्यादिः–स्वस्य–आत्मनः, पुद्गलस्य च लक्षणं असाधारणस्वरूपं चैतन्यमचैतन्यं च तस्य बलात्–सामर्थ्यात्, यदि कारकाणि कर्तृकर्मादीनि–चेतयमानः एव चेतये, चेतयमानेनैव चेतये, चेतयमानाय चेतये, चेतयमानादेव चेतये, चेतयमानएव चेतये, चेतयमानमेव चेतये इति कारकाणि भिद्यंते तर्हि भिद्यंतां–भेदं प्राप्नुवंतु वा–अथवा, यदि धर्माः-स्वभावाः–चैतन्याचैतन्यादयः, भेदं प्राप्नुवन्ति तर्हि भिद्यंतां, यदि वा गुणाः–मतिश्रुतादयः अनंतज्ञानादयो वा भिद्यंते तर्हि भेदं प्राप्नुवंतु पुनः चिति–चिद्रूपे, भावे–पदार्थे, काचन कापि, भिदा–भेदः, नास्ति-कारकधर्मगुणभेदो न, किंभूते चिति ? विभौ–वि-विशेषेण भवति ज्ञानादिस्वभावेनेति विभुः तस्मिन् विभौ, 'भुवो डुर्विसंप्रेषु च, इति डुप्रत्ययः, विशुद्धे–कर्ममलातीते, ॥ ३ ॥ अथ चेतनाया एकानेकरूपं विवक्षति —

अर्थ–ज्ञानी कहै है जो–भेदनेकूं न्यारे करनेकूं समर्थ हूजिये, तिस सर्वकूं निजलक्षणके बलतैं भेदकरि अर मैं चैतन्यचिह्नकरि चिह्नित विभागरहित है महिमा जाकी ऐसा शुद्ध चैतन्यही हौं ॥ बहुरि जो कर्त्ता कर्म करण सम्प्रदान अपादान अधिकरण ये षट्कारक अर सत्त्व असत्त्व नित्यत्व अनित्यत्व एकत्व अनेकत्व आदिक धर्म अर ज्ञान दर्शन आदिक गुण ए भेदरूप है, तौ भेदरूप होऊ। विशुद्ध समस्त विभावनितैं रहित एक अर विभु कहिये सर्व गुणपर्यायनिमैं व्यापक ऐसा चैतन्यभावविषैं तौ किछू भेद है नाहीं ॥ भावार्थ–जो इस चैतन्यभावतैं अन्य अपने स्वलक्षणकरि भेदे गये ते तौ भेदरूप कीये अर कारकभेद अर धर्म भेद हैं, तौ होऊ। शुद्ध चैतन्यमात्रविषैं तौ किछू भेद है नाही। शुद्धनयकरि आत्माकूं ऐसा अभेदरूप ग्रहण करना ॥३॥

अद्वैतापि हि चेतना जगति चेद् दृग्ज्ञप्तिरूपं त्यजेत्
तत्सामान्यविशेषरूपविरहात्सास्तित्वमेव त्यजेत् ।
तत्त्यागे जडता चितोऽपि भवति व्याप्यो विना व्यापका-
दात्मा चांतमुपैति तेन नियतं दृग्ज्ञप्तिरूपास्तु चित् ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—हीति—ननु, जगति—भुवने, चेतना—प्रतिभासरूपा अद्वैता—एकरूपा, सर्वेषां प्रतिभासांतः प्रविष्टत्वेन एकरूपत्वसाधनात् तथाहि यत्प्रतिभासते—यत्प्रतिभासांतः प्रविष्टं यथा प्रतिभासस्वरूपं प्रतिभासंते चामी विवादापन्नाः पदार्थाः । सर्वं वै खल्विदं ब्रह्मेत्यादि वाक्यानामेकत्वसाधनाच्चैकैव चेतना इति चेत्तदा दृग्ज्ञप्तिरूपं सा दर्शनज्ञानस्वभावं त्यजेत् अथ तत्स्वभावं त्यजतु का नो हानिः ? इति वदन्तमद्वैतिनं निराकरोति—सा—चेतना तत्—प्रसिद्धं अस्तित्वं—सत्तां, एव त्यजेत्, कुतः ? सामान्येत्यादिः—सामान्यं दर्शनं, विशेषो—ज्ञानं, तयो रूपं तस्य विरहः तस्मात्—सामान्यविशेषात्मकत्वात् सर्वस्य वस्तुनः 'सामान्यविशेषात्मा तदर्थो विषयः' इति वचनात् दृग्ज्ञानयोः सामान्यविशेषात्मकत्वात् तदभावे तद्भावात् अपि दूषणद्वयं । तत्त्यागे—तस्य अस्तित्वस्य, त्यागे—अभावे, अथवा दर्शनज्ञानस्याभावे चितः—चिद्रूपस्यापि जडता—अचेतनत्वं, चेति दूषणांतरे व्यापकात् अस्तित्वरूपात् दर्शनरूपाद्वा, विना ऋते, व्याप्यः—आत्मा, अंतं—विनाशं, उपैति—प्राप्नोति, व्यापकाभावे व्याप्यस्याप्यभावात् प्रकाशाभावे प्रदीपवत् तेन जडत्वात्माभावदूषणसद्भावेन चित्—चेतना, नियतं—निश्चितं, दृग्ज्ञप्तिरूपा—दर्शनज्ञानस्वरूपा, अस्तु भवतु ॥ ४ ॥ अथ चेतनाचेतनयोः परत्वापरत्वं प्रपूर्यते—

अर्थ—जगतविषैं निश्चयकरि चेतना अद्वैत है तौऊ जो दर्शनज्ञानरूपकूं छोडै तौ सामान्यविशेषरूपके अभावतैं सो चेतना अपना अस्तिपनाहीकूं छोडै । बहुरि जब चेतना अपना अस्तित्वकूं छोडै, तब चेतनकै जडता होय है । बहुरि व्याप्य जो आत्मा, सो व्यापक जो चेतना तिसविना अंतकूं प्राप्त होय, आत्माका नाश होय । तातैं नियमतैं चेतना है सो दर्शनज्ञानस्वरूपही होऊ ॥ भावार्थ—वस्तुका स्वरूप सामान्यविशेषरूप है, सो चेतनाभी वस्तु है, सो दर्शनज्ञानविशेपकूं छोडै, तौ वस्तुपणाका नाश होय, तब चेतनाका अभाव होतैं, कै तौ चेतनकै जडपणा आवै, कै चेतना आत्माकी सर्व अवस्थामैं पावै तातैं व्यापक है अर आत्मा चेतना ही है तातैं चेतनाके व्याप्य है सो व्यापकके अभावतैं व्याप्य जो चेतन आत्मा ताका अभाव होय है । तातैं चेतना दर्शनज्ञानस्वरूपा ही माननी ॥ इहां तात्पर्य ऐसा-जो सांख्यमती आदि केई सामान्यचेतनाहीकूं मानि एकांत कहै हैं, तिनिका निषेध करनेकूं वस्तुका स्वरूप सामान्य विशेपरूप है, सो चेतनाकूं सामान्यविशेपरूप अंगीकार करनी ऐसा जनाया है ॥४॥ आगे कहै हैं, चेतनाका तो चिन्मय एक भाव है अर अन्य परभाव है, सो चिन्मयभाव तौ उपादेय है अर परभाव हेय है, सो यह सूचनिका अगिले कथनकी है, ताका श्लोक है—

एकश्चितश्चिन्मय एव भावो भावाः परे ये किल ते परेषां ।
ग्राह्यस्ततश्चिन्मय एव भावो भावाः परे सर्वत एव हेयाः ॥५॥

सं० टी०—चितः चिद्रूपस्य,एकः—चिन्मयः—तद्दर्शनज्ञानमय एव भावः—स्वभावः,ये—प्रसिद्धाः,परे—दृग्ज्ञप्तेः परे, भावाः—रागादयः किलेति निश्चितं परेषां कर्मणां ते भावाः ततः आत्मीयस्वभावत्वात् चिन्मय एव दृग्ज्ञप्तिनिर्वृत्त एव स्वभावः, ग्राह्यः—आदेयः परभावाः—रागद्वेषादयः, सर्वत एव—सामस्त्येनैव, हेयाः—त्याज्याः ॥ ५ ॥ अथ रहस्यं सिद्धांतं साधयितुमुपक्रामति—

अर्थ—चैतन्यका तौ एक चिन्मयी ही भाव है, अर अन्य भाव हैं ते प्रगटपणै परके भाव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हैं। तातैं एक चिन्मयभाव है सोही ग्रहण करनेयोग्य है, बहुरि जे परभाव सर्वही त्यागनेयोग्य हैं

सिद्धांतोयमुदात्तचित्तचरितैर्मोक्षार्थिभिः सेव्यतां
शुद्धं चिन्मयमेकमेव परमं ज्योतिः सदैवास्म्यहं ।
एते ये तु समुल्लसंति विविधा भावाः पृथग्लक्षणा-
स्तेऽहं नास्मि यतोऽत्र ते मम परद्रव्यं समग्रा अपि ॥६॥

सं० टी०—अयं सिद्धांतः सिद्धः-निष्पन्नः, अंतः-धर्मः स्वभावो वा यस्य सः तात्पर्यं वा सेव्यतां आश्रियतां, कैः ? मोक्षार्थिभिः—मुमुक्षुभिर्योगिभिः, किंभूतैः ? उदात्तचित्तचरितैः-उदात्तं-उत्तमं, यत् चित्तं-ज्ञानं तदेव चरितं-आचरणं येषां तैः, अयं कः सदैव—नित्यमेव अहं परमं ज्योतिः-परंधाम, अस्मि भवामि, किंभूतं तत् ? शुद्धं -कर्ममलरहितत्वात् चिन्मयं ज्ञप्तिरूपत्वात्, एकमेव परभावरहितत्वात् तु पुनः, एते-प्रसिद्धाः, विविधाः-नानाप्रकाराः, असंख्यातलोकमात्रत्वात्, भावाः-रागद्वेषादयः परिणामाः, समुल्लसंति-प्रादुर्भवंति ते-भावाः, अहं चिद्रूपः, नास्मि-न भवामि, कुतः ? यतः-यस्मात्कारणात् पृथग्लक्षणाः-आत्मनः विपरीतलक्षणाः अज्ञानस्वभावत्वात् अत्र इह स्वस्वरूपविचारणे ते-भावाः, समग्रा अपि-समस्ता अपि कषायाध्यवसायाः मम-चिद्रूपस्य, परद्रव्यं पुद्गलकर्मोत्पादितत्वात् अतः सर्वथा चिद्भाव एव गृहीतव्यः, शेषाः सर्वे भावाः प्रहातव्या इति सिद्धांतः ॥ ६ ॥ अथ सापराधिनो बंधं द्योतते—

अर्थ—उज्ज्वल है उत्कट है चित्तका चरित्र जिनिका ऐसे मोक्षके अर्थि पुरुष हैं, ते यह सिद्धांत सेवन करो-जो, मैं तौ शुद्ध चैतन्यमय एक परमज्योति ही सदा ही हौं, अर ए जे अनेक प्रकारके भिन्नलक्षणरूप भाव हैं, ते मैं नाही हौं। जातैं ते समग्र कहिये सारेही मेरे परद्रव्य हैं। भावार्थ सुगम है।६। आगे कहै हैं, जो परद्रव्यकूं ग्रहण करै है,सो अपराधवान है, बंधमें पडै है। अर जो निजद्रव्यमें संतुष्ट है सो निरपराधी है, बंधै नाही है। ऐसी सूचनिका का अगिले कथनका श्लोक है—

परद्रव्यग्रहं कुर्वन् बध्यते चापराधवान् ।
बध्येतानपराधो न स्वद्रव्ये संवृतो यतिः ॥ ७ ॥

सं० टी०—अपराधवान्-सापराधः पुमान्, एव-निश्चयेन, बध्येत-कर्मबंधनं प्राप्नुयात्, सापराधत्वं लक्षयति-परद्रव्यग्रहं-परद्रव्याणां ममेति बुद्धया ग्रहं-ग्रहणं, कुर्वन् चिंतयन्, अन्योपि परद्रव्यग्रहणं कुर्वन् बंधं प्राप्नोति पुनर्नान्य इत्युक्तिलेशः अनपराधः-परद्रव्यग्रहणलक्षणापराधरहितः, यतिः-स्वयत्नचारित्वात् योगी न बध्येत न बंधनं याति। स्वद्रव्ये चिद्रूपे संवृत्तः संवरणं कुर्वन् स्थितः तदपराधरहितः न याति बंधनं ॥ ७ ॥ अथ सापराधापराधयोः बंधाबंधौ बिभर्ति—

अर्थ—जो परद्रव्यकूं ग्रहण करता संता है, सो तो अपराधवान् है, सो बंधमैं पडै है। बहुरि अपने ही द्रव्यविषैं संवररूप है संतुष्ट है परद्रव्यकूं नाही ग्रहण करै है सो यतीश्वर अपराध रहित है, सो बंधै नाही॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनवरतमनंतैर्बध्यते सापराधः स्पृशति निरपराधो बंधनं नैव जातु।
नियतमयमशुद्धं स्वं भजन् सापराधो भवति निरपराधः साधु शुद्धात्मसेवी ८

सं० टी०—सापराधः-परद्रव्यपरिहारेण शुद्धस्यात्मनः-सिद्धिः साधनं वा राधः अपगतो राधो यस्य चेतयितुर्भावस्य वा सोऽपराधस्तेन सह वर्तत इति सापराधो यतिः, अनवरतं निरंतरं-प्रतिसमयं, अनंतैः अनंतसंख्यावच्छिन्नैर्बंधनैः, बध्यते बंधनं याति, ननु कर्मणां ज्ञानावरणादीनां कषायाध्यवसायानां चासंख्यातलोकत्वघटनादनंतत्ववचनं विरुध्यते ? इति चेत्सत्यं कर्मणामध्यवसायानामसंख्यातत्वे सत्यपि कर्मपरमाणूनामनंतत्वघटनात्, निरपराधः-उपयोगोन्मुखः-परद्रव्यग्रहणापराधरहितः, जातु-कदाचित्, बंधनं कर्मबंधनं, नैव स्पृशति-न प्राप्नोति। अयं-यतिः, नियतं-निश्चितं, अशुद्धं रागद्वेषकलुषीकृतं, स्वं-आत्मानं भजन् सन् सापराधो भवति-स्वस्वरूपपराङ्मुखत्वात्-साधु-समीचीनं यथा भवति तथा, शुद्धात्मसेवी शुद्धमात्मानं सेवत इति शुद्धात्मसेवी—मुनिः, निरपराधः—परद्रव्यग्रहणापराधरहितः, स्वद्रव्यसेवित्वादाराधक एव ॥ अथ प्रतिक्रमणाप्रतिक्रमणे विवेचयति—

अर्थ—जो आत्मा सापराध है, सो तौ निरंतर अनंतपुद्गलपरमाणुरूप कर्मनिकरि बंधै है बहुरि जो निरपराध है, सो बंधनकूं कदाचित् नाही स्पर्शे है। बहुरि यह सापराध आत्मा है, सो तौ अपने आत्माकूं नियमकरि अशुद्धही सेवता सापराध ही होय॥ बहुरि जो निरपराध है, सो भलेप्रकार शुद्ध आत्माका सेवनेवाला होय है॥ आगे व्यवहारनयका आलंबी तर्क करै है जो, इस शुद्ध आत्माका सेवनका प्रयास कहिये खेद, ताकरि कहा है ? जातैं प्रतिक्रमण आदि प्रायश्चित्त हैं, ताकरि ही आत्मा निरपराध होय है। जातैं सापराधके तौ अप्रतिक्रमणादि हैं, सो अपराधके दूरि करने वाले नाही हैं, तातैं तिनकूं विषकुंभ कहै हैं॥ बहुरि निरपराधके प्रतिक्रमणादिक हैं, ते तिस अपराधके दूरि करनेवाले हैं, तातैं तिनिकूं अमृतकुंभ कहै हैं।। सोही व्यवहारका कहनेवाला आचारसूत्रविषैं कह्या है॥ उक्तं च गाथा—अप्पडिक्कमणमप्पडिसरणं अप्पडिहारो अधारणा चेव॥ अणियत्ती य अणिंदा गरहासोही य विसकुंभो १ पडिकमणं पडिसरणं परिहारो धारणा णियत्ती य॥ णिंदा गरहा सोही अट्ठविहो अमियकुंभो दु॥ २।। अर्थ--अप्रतिक्रमण, अप्रतिशरण, अपरिहार, अधारणा, अनिवृत्ति, अनिंदा, अगर्हा, अशुद्धि ऐसे आठ प्रकार करिकै लगे दोषका प्रायश्चित्त करना, सो तो विषकुंभ है जहरका भरया घडा है बहुरि प्रतिक्रमण, प्रतिशरण, परिहार, धारणा, निवृत्ति, निंदा, गर्हा, शुद्धि ऐसे आठ प्रकार लगे दोषका प्रायश्चित्त करना सो अमृतकुम्भ है॥ ऐसे व्यवहारनयके पक्षीने तर्क किया, ताका समाधान आचार्य निश्चयनयकूं प्रधान करी कहै हैं—

यत्र प्रतिक्रमणमेव विषं प्रणीतं तत्राप्रतिक्रमणमेव सुधा कुतः स्यात्।
तत्किं प्रमाद्यति जनः प्रपतन्नधोधः किंनोर्ध्वमूर्ध्वमधिरोहति निष्प्रमादः।९।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०–यत्र शुद्धात्मस्वरूपे, प्रतिक्रमणमेव–द्रव्यरूपः प्रतिक्रमणादिरेव अज्ञानजनसाधारणोऽप्रतिक्रमणादिस्तावदास्तामित्येवशब्दार्थः, विषं–हलाहलं प्रणीतं–स्वकार्यकरणासमर्थत्वात् तद्विपरीतशुभबंधनकार्यकारित्वाच्च, तत्र–आत्मस्वरूपे अप्रतिक्रमणमेव पूर्वोक्तप्रतिक्रमणाप्रतिक्रमणद्वयरहिततृतीयशुद्धात्मोपयोगरूपप्रतिक्रमणं सुधाकुटः–अमृतकुंभः, स्यात् स्वकार्यकारित्वात् , तत् तस्माद्धेतोः, जनः–लोकः, प्रमाद्यति किं कथं प्रमादं करोति, अधोधः–प्रतिक्रमणेतरद्वयाधोभूमौ प्रपतन् सन्, निष्प्रमादः–प्रमादरहितः सन् ऊर्ध्वमूर्ध्वं–उपर्युपरि, अप्रतिक्रमणरूपं तार्तीयकं किं–कथं, नाधिरोहति न चटति इति स्वरूपव्यतिरिक्तस्य न किमपि प्रतिक्रमणादिनेति सूचितं ॥ ९ ॥ अथ प्रमादमापाद्यति–

अर्थ–अहो भाई, जहां प्रतिक्रमणहीकूं विष कह्या, तहां काहेतैं अप्रतिक्रमण अमृत होय तातैं यह जन नीचै नीचै पडता संता प्रमादरूप क्यों होय है? निष्प्रमादी भया संता ऊंचा ऊंचा क्यों नाहीं चढै है॥ भावार्थ–आचार्य कहै हैं, जो अज्ञानअवस्थामैं जो अप्रतिक्रमणादिक था, ताकी तौ कथाही कहा? इहां तौ निश्चयनयकूं प्रधान करि अर द्रव्यप्रतिक्रमणादिक शुभप्रवृत्तिरूप थे, तिनिकी पक्ष छुडावनेकूं तिनिकूं तौ विषकुम्भ कहै हैं॥ जातैं ए कर्मबंधके ही कारण हैं, बहुरि अप्रतिक्रमणप्रतिक्रमणतैं रहित तीसरी भूमि शुद्ध आत्मस्वरूप है सो प्रतिक्रमणादितैं रहित है। तातैं तहांके अप्रतिक्रमणादिककूं अमृतकुम्भ कहा है॥ तीसरी भूमिविषै चढावनेकूं उपदेश किया है सो प्रतिक्रमणादिककूं विषकुम्भ कहै सुणिकरि जो प्रमादी होय ताकूं कहै हैं यह जान नीचा नीचा क्यों पडै है? तीसरी भूमिमैं ऊंचा ऊंचा क्यौं नाहीं चढै है? जहां प्रतिक्रमणकूं विषकुम्भ कह्या, तहां तौ तिसका निषेधरूप अप्रतिक्रमणही अमृतकुम्भ होगया। सो यह अप्रतिक्रमणादिक अज्ञानीकै होय सो न जानना तीसरी भूमिका शुद्ध आत्ममयी जानना॥९॥ आगै इस अर्थकूं दृढ करते संते काव्य कहै हैं–

विशेष–पं० जयचन्द्रजीने सुधा कुतः स्यात् यह पाठ मानकर जहांपर प्रतिक्रमण भी हलाहल विष है वहां अप्रतिक्रमण अमृत कैसे हो सकता है यह अर्थ किया है और भट्टारक शुभचन्द्रजीने सुधाकुटः स्यात् यह पाठ रखकर 'प्रतिक्रमण तो विषस्वरूप है एवं अप्रतिक्रमण द्रव्यप्रतिक्रमण तथा प्रमादी अज्ञानीके अप्रतिक्रमणसे भिन्न शुद्धात्मोपयोगरूप प्रतिक्रमण अमृत कुम्भ है, यह अर्थ किया है परंतु भावांशमें कहीं कोई भेद नहीं क्योंकि पं० जयचन्द्रजी ने जो भाव लिखा है वही एव पदकी सामर्थ्यसे संस्कृत टीकाकारने भी स्पष्ट किया है॥ ९॥

अतो हताः प्रमादिनो गताः सुखासीनतां प्रलीनं चापलमुन्मीलितमालंबनं
आत्मन्येव चालानितं चित्तमासंपूर्णविज्ञानघनोपलब्धेः ॥१०॥ चूर्णिः ॥

नोट—इस श्लोक की संस्कृतटीका उपलब्ध नहीं हुई।

अर्थ—इस कथनतैं सुखकरि बैठनेपणाकूं प्राप्त भये ऐसे प्रमादीजीवनिकूं तौ ताडै हैं। जे निश्चयनयका आश्रय ले प्रमादी होय प्रवर्तैं, तिनिकूं ताडिकरि उद्यम विषै लगावै हैं बहुरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चपलपणाका प्रलय किया है। जे स्वच्छन्द वर्तै तिनिका स्वच्छंदपणा मेट्या है। बहुरि आलम्बनकूं उपाड्या है। जे व्यवहारकी पक्षकरि परद्रव्यका तथा द्रव्यप्रतिक्रमणादिका आलम्बनले संतुष्ट होय हैं, तिनिका आलम्बन छुडाया है। बहुरि चित्तकूं आत्मा ही विषैं आलानित किया है, थांम्या है। व्यवहारके आलंबनमें अनेक प्रवृत्तिमें चित्त भ्रमे था, सो शुद्ध आत्मा हीं विषै लगाया है। जहांतांई संपूर्णविज्ञानघन आत्माकी प्राप्ति न होय, तहांतांई चैतन्यमात्र आत्माविषै चित्त लग्या रहै ऐसैं थाम्या है, ऐसैं जानना ॥१०॥*

प्रमादकलितः कथं भवति शुद्धभावोऽलसः कषायभरगौरवादलसता प्रमादो यतः
अतः स्वरसनिर्भरे नियमितः स्वभावे भवन्मुनिः परमशुद्धतां व्रजति मुच्यते
चाचिरात् ॥ ११ ॥

सं० टी०—प्रमादकलितः—सार्धसप्तत्रिंशत्सहस्रभेदप्रमादयुक्तो—मुनिः, अलसः—आलस्यवान् सन्, शुद्धभावः—शुद्धो भावः स्वभावो यस्य सः,—परमात्मा कथं भवति ? न कथमपि। कुतः ? कषायेत्यादि—कषायाणां क्रोधादीनां, भरः—समूहः, तस्य गौरवः माहात्म्यं, तस्मात्—कषायेंद्रियविकथादिपरावृत्तिजत्वात् प्रमादानां। यतः कारणात् अलसता—आलस्यमेव प्रमादः, तयोरेकार्थत्वात्, अतः कारणात् परममननात् मुनिः—योगी परमशुद्धतां—अत्यंतविशुद्धिं, व्रजति—प्राप्नोति। च—पुनः, अचिरात्—शीघ्रं, मुच्यते संसारबन्धनात् मुक्तो भवति, किंभूतः ? नियमितः—नियंत्रितः सन्, क्व ? स्वेत्यादिः—स्वस्य—आत्मनः, रसः तस्य निर्भरः—अतिशयः तस्मिन्, पुनः स्वभावे—आत्मस्वरूपे भवन्—स्थितः सन् ॥ ११ ॥ अथ सर्वापराधं च्योतति—

अर्थ—जातैं कषायका भर कहिये भार, ताका गौरव कहिये भारयापणा, तातैं अलसता कहिये अलसपणा ताकूं प्रमादकरि युक्त अलसभाव होय, सो शुद्धभाव कैसैं होय ? तातैं आत्मिकरसकरि भरया स्वभावविषैं निश्चल होता संता मुनि है सो परमशुद्धताकूं प्राप्त होय है। बहुरि शीघ्रहीं थोरे ही कालमें कर्मबंधतैं छूटै है ॥ भावार्थ—प्रमाद तौ कषायका गौरवतैं होय है, सो प्रमादीकै शुद्धभाव होय नाही। जो मुनि उद्यमकरि स्वभावमें प्रवर्तै है सो शुद्ध होयकरि मोक्षकूं प्राप्त होय है ॥ ११ ॥ आगैं मुक्त होनेका अनुक्रमके अर्थरूप काव्य कहै हैं अर मोक्षका अधिकार पूर्ण करै हैं—

त्यक्त्वाशुद्धिविधायि तत्किल परद्रव्यं समग्रं स्वयं
स्वद्रव्ये रतिमेति यः स नियतं सर्वापराधच्युतः।
बन्धध्वंसमुपेत्य नित्यमुदितः स्वज्योतिरच्छोच्छल-

*—यह श्लोक नं० ९ पर है जो कि समयसार गाथाओंकी टीकाके अनुसार ठीक है परंतु यहां प्रकृतमें नं ९ पर ठीक न हो १० पर ठीक बैठता है इसलिये हमने नम्बर बदल दिया है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्चैतन्यामृतपूरपूर्णमहिमा शुद्धो भवन्मुच्यते ॥ १२ ॥

सं० टी०—किल इत्यागमोक्तौ, यः–योगी, स्वयं स्वरूपेण कृत्वा, स्वद्रव्ये–स्वात्मद्रव्ये, रतिं–रमणं, एति–गच्छति, किंकृत्वा ? तत्–प्रसिद्धं, समग्रं–निखिलं, परद्रव्यं–कर्मादिद्रव्यं त्यक्त्वा–हित्वा, किंभूतं ? अशुद्धिविधायि–रागाद्यशुद्धिकारकं, सः–मुनिः, मुच्यते कर्मबंधनात् । कीदृक्षः सन् ? नियतं–निश्चितं, सर्वेत्यादिः–पूर्वोक्तैः–समस्तापराधैः, च्युतः–रहितः सन्, किंकृत्वा ? बंधध्वंसमुपेत्य, स्वेत्यादिः–स्वस्य आत्मनः ज्योतिः—प्रकाशः तेन अच्छं–निर्मलं, उच्छलत्–उदयं गच्छत् तच्च तच्चैतन्यं च तदेवामृतपूरः सुधा–समूहः, तेन पूर्णः–संपूर्णः, महिमा–माहात्म्यं यस्य सः ॥ १२ ॥ अथ मोक्षं महते—

अर्थ–जो पुरुष, निश्चयकरि अशुद्धताका करनेवाला जो परद्रव्य, ताकूं सर्वकूं छोडिकरि अर आप अपने निजद्रव्यविषैं रतीकूं प्राप्त होय है–लीन होय है, सो पुरुष नियमतैं सर्व अपराधतैं रहित भया संता, बन्धका नाशकूं प्राप्त होयकरि नित्य उदयरूप भया संता, अपना स्वरूपका प्रकाशरूप ज्योतिकरि निर्मल उछलता जो चैतन्यरूप अमृतका प्रवाह, ताकरि पूर्ण है महिमा जाकी ऐसा शुद्ध होता संता कर्मनितैं छूटै है ॥ भावार्थ–पहले समस्त परद्रव्यका त्याग करि अपना निजद्रव्य आत्मस्वरूपविषैं लीन होय है, सो सर्व रागादिक अपराधतैं रहित होय आगामी बंधका नाश करै है अर नित्य उदयरूप केवलज्ञानकुं पाय शुद्ध होय सर्व कर्मका नाश करि मोक्षकूं प्राप्त होय है, यह मोक्ष होनेका अनुक्रम है ॥ ऐसैं मोक्षका अधिकार पूर्ण भया, ताके अंत मंगलरूप ज्ञानकी महिमाका कलशरूप काव्य कहै हैं––

बंधच्छेदात्कलयदतुलं मोक्षमक्षय्यमेत-
न्नित्योद्योतस्फुटितसहजावस्थमेकांतशुद्धं ।
एकाकारस्वरसभरतोऽत्यंतगंभीरधीरं
पूर्णं ज्ञानं ज्वलितमचलं स्वस्य लीनं महिम्नि ॥ १३ ॥

सं० टी०—एतत् पूर्णं–संपूर्णं ज्ञानं, ज्वलितम्–दीपितं, प्रकाशं प्राप्तमित्यर्थः, कीदृक्षं ? स्वस्य–आत्मनः, महिम्नि–माहात्म्ये, लीनं–एकतामापन्नं, किंभूते ? अचले–निष्कंपे, पुनः कीदृक्षं ? अत्यंतेत्यादिः–अत्यंतं गभीरं अतुलस्पर्शं तच्च तद्धीरं च, कुतः ? एकेत्यादिः—एकाकारेण, सर्वत्र ज्ञानाकारेण, स्वस्य–आत्मनः, रसः, तस्य भरः–अतिशयः, तस्मात्, पुनः मोक्षं कर्ममोचनमोक्षं, पुनः नित्येत्यादिः–नित्योद्योतेन–निरावरणज्ञानप्रकाशेन, स्फुटिता–प्रकाशिता, सहजा–स्वाभाविकी, अवस्था–दशा, लक्षणया स्वरूपं यत्र तं, पुनः एकांतशुद्धं एकांतेन—एकधर्मेण–कर्ममुक्तिलक्षणेन शुद्धं–निर्मलं समस्तपदाधिक्यादत्यंतविशुद्धं ॥ १३ ॥

अर्थ––यह ज्ञान है सो पूर्ण भया संता देदीप्यमान प्रगट भया । कहा करता संता प्रगट भया ? कर्मका बंध था ताके छेदतें अविनाशी अतुल जो मोक्ष, ताकूं प्राप्त होता संता । बहुरि कैसा प्रगट भया ? नित्य है उद्योत प्रकाश जाका ऐसी प्रफुल्लित भई है स्वाभाविक अवस्था

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जाकी। बहुरि कैसा प्रगट भया ? एकांतशुद्ध कहिये ताकै कर्मका मैल न रह्या अत्यंत शुद्ध भया प्रगट भया। बहुरि कैसा प्रगट भया ? एक जो अपना ज्ञानमात्र आकार, ताका निजरसका भारतैं अत्यंत गंभीर है धीर है जाकी थाह नाही अर जामैं किछू आकुलता नाही। बहुरि प्रगट होयकरि कहा कीया ? अचल जो कोई प्रकार चलै नाही ऐसी आपकी महिमा, ता विषैं लीन भया। भावार्थ—यह ज्ञान प्रगट भया सो कर्मका नाशकरि मोक्षरूप होता अपनी स्वाभाविक अवस्थारूप अत्यंत शुद्ध समस्त ज्ञेयाकारकूं गौण करि ज्ञानका प्रकाश "जाका थाह नाहीं जामैं आकुलता नाही" ऐसा प्रगट देदीप्यमान होयकरि अपनी महिमाविषैं लीन भया। ऐसैं रंगभूमिविषैं मोक्षतत्त्वका स्वांग आया था, सो ज्ञान प्रगट भया, मोक्षका स्वांग निसरि गया।

ज्यों नर कोय परचो दृढबंधन बंधस्वरूप लखै दुखकारी।
चिंत करै निति कम कटै यह तौऊ छिदै नही नैक न टारी॥
छेदनकूं गहि आयुध धाय चलाय निशंक करै दुय धारी।
यों बुध बुद्धि धसाय दुधा करि कर्म रुआतम आप गहारी॥

इति श्रीसमयसारस्थपद्यस्याध्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां अष्टमोऽकः॥ ८॥

इसप्रकार परमाध्यात्मतरंगिणीकी वचनिकाविषैं आठवां मोक्षाधिकार पूर्ण भया॥८॥

अथ सर्वविशुद्धज्ञानाधिकारः॥९॥

सकलाशर्मविमुक्तं युक्तं सुज्ञानसंपदा सारं। भजते मुक्ति वचसाऽमृतचन्द्रोऽमृतमयो जंतुः (?)॥

दोहा—सर्वविशुद्ध सुज्ञानमय, सदा आतमाराम॥
परकूं करै न भोगवै, जानै जपि तसु नाम॥

इहां मोक्षतत्त्वका स्वांग निकसनेके अनंतर सर्वविशुद्धज्ञान प्रवेश करै है॥ रंगभूमिविषै जो जीवका, कर्ता, कर्म, पुण्य, पाप, आस्रव, संवर, निर्जरा, मोक्ष ये आठ स्वांग आये तिनिका नृत्य भया। अपना अपना स्वरूप दिखाय निकसि गये। अब सर्व स्वांग दूरि भये एकाकार सर्वविशुद्धज्ञान प्रवेश करै है। तहां प्रथम मंगलरूप ज्ञानपुंज आत्माकी महिमाका काव्य कहै हैं—

अथ सर्वविशुद्धं ज्ञानमुदेति—

नीत्वा सम्यक् प्रलयमखिलान्कर्तृभोक्त्रादिभावान्
दूरीभूतः प्रतिपदमयं बंधमोक्षप्रक्लृप्तेः।
शुद्धः शुद्धः स्वरसविसरापूर्णपुण्याचलार्चि—
ष्टंकोत्कीर्णप्रकटमहिमा स्फूर्जति ज्ञानपुंजः॥ १॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—अयं ज्ञानपुञ्जः-बोधस्यानन्तसंख्यावच्छिन्नाविभागशुद्धः सन् प्रतिच्छेदसमूहः,प्रतिपदं–एकेंद्रियादिस्थानं प्रथमद्वितीयादिगुणस्थानं गुणस्थानं प्रति, स्फूर्जति–गर्जति–द्योतत इत्यर्थः। किंकृत्वा ? नीत्वा प्राप्य, कं ? सम्यक्प्रलयं–निश्शेषविनाशं, कान् ? निखिलान्–समस्तान् कर्त्रेत्यादिः–कर्ता कर्मकारकः भोक्ता कर्मफलभोक्ता, कर्ता च भोक्ता च कर्तृभोक्तारौ तावेवादिर्येषामुत्पाद्योत्पादकादीनां ते तथोक्ताः, ते च ते भावाश्च परिणामाः तान्, किंभूतः ? दूरीभूतः, कुतः ? बंधेत्यादि–कर्मबंधमोचनयोः प्रक्लृप्तेः—कल्पनातस्याः, पुनः शुद्धः–निर्मलः, पुनः कीदृक्षः ? स्वेत्यादिः–स्वस्य–आत्मनः, रसः अनुभवः तस्य विसरं समूहः स एवापूर्णः–संपूर्णः पुण्याचलः–प्रशस्ताचलः–उदयाचलस्तत्रार्चि–तेजः, यस्य सः, टंकेन उत्कीर्णः प्रकटः, महिमा माहात्म्यं यस्य सः,स्वरसेत्यादिरेकपदं वा स्वरसविसरापूर्णपुण्याचलार्चिश्चासौ टंकोत्कीर्णप्रकटमहिमा च ॥ १ ॥ अथात्मनः कर्तृत्वभोक्तृत्वं कीर्तयति—

अर्थ–ज्ञानका पुञ्ज आत्मा है, सो स्फुरायमान प्रगट होय है ॥ कहाकरी प्रगट होय है ? समस्तही कर्ता अर भोक्ता इत्यादिक भाव हैं तिनि सर्वहीकूं भलै प्रकार प्रलय कहिये नाशकूं प्राप्त करि प्रगट होय है ॥ वहुरि कैसा है ? प्रतिपद कहिये वारंवार नाशकूं प्राप्त करि प्रगट होय है। कर्मके क्षयोपशमके निमित्ततैं अनेक अवस्था होय हैं, तिनिप्रति बंधमोक्षकी जो कल्पना प्रवृत्ति तातैं दूरीभूत है-दूरवर्त्ती है ॥ वहुरि शुद्ध है शुद्ध है। दोय वार कहनेतैं रागादिक मल अर आवरण दोऊतैं रहित है। वहुरि कैसा है ? अपना निजरस जो ज्ञानरस, ताका विसर कहिये फैलना, ताकरि आपूर्ण कहिये भरचा ऐसा पवित्र अर अचल है अर्चि कहिये दीप्ति प्रकाश जाका। वहुरि कैसा है ? टंकोत्कीर्ण है प्रगट महिमा जाकी। भावार्थ–शुद्धनयका विषय ज्ञानस्वरूप आत्मा है सो कर्ताभोक्तापणाका भावखूं रहित है। बहुरि बंधमोक्षकी रचनाकरि रहित है, अर परद्रव्यतैं अर सर्व परद्रव्यके भावनितैं रहित है, तातैं शुद्ध है। अर अपने निजरसका प्रवाहकरि पूर्ण दैदीप्यमान ज्योतीरूप टंकोत्कीर्ण जाकी महिमा है। सो ऐसा ज्ञानपुंज आत्मा प्रगट होय है।१॥ अब सर्व विशुद्धज्ञानकूं प्रगट करै हैं। तहां प्रथम ही जो कर्ता भोक्ताभाव हैं तिनकूं न्यारा दिखावै हैं, ताकी सूचनिकाका श्लोक है—

कर्तृत्वं न स्वभावोऽस्य चितो वेदयितृत्ववत्।
अज्ञानादेव कर्तायं तदभावादकारकः॥ २ ॥

सं० टी०—अस्य चितः-चिद्रूपस्य, कर्तृत्वं–कर्मकारकत्वं, न स्वभावः—न स्वरूपं, किमिव ? वेदयितृत्ववत्–यथा वेदयितृत्वं—भोक्तृत्वं, आत्मनो न संभवति तथा कर्तृत्वमपि। अयं–आत्मा, कर्ता कर्मणां कारकः इति प्रतीतिर्दृश्यते तत्कथं ? आत्मा कारकः-कर्मणां कर्ता भवेत्, कुतः ? तदभावात् तस्य ज्ञानस्य, अभावः–विनाशस्तस्मात् अज्ञानतो मया कृतमिति मनुते तदभावादकर्तृत्वमेव ॥ २ ॥ अथाकर्तृकत्वं चिन्तयति—

अर्थ–इस चित्स्वरूप आत्माका कर्तापणा स्वभाव नाही है जैसे वेदयितृत्व कहिये भोक्तापणा स्वभाव नाही है, तैसे। सो यह आत्मा कर्ता मानिये है, सो अज्ञानतैं मानिये है। अर जब अज्ञानका अभाव होय है, तब अकारक कहिये कर्त्ता नाही है॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अकर्त्ता जीवोयं स्थित इति विशुद्धः स्वरसतः
स्फुरच्चिज्ज्योतिर्भिश्छुरितभुवनाभोगभवनः।
तथाप्यस्यासौ स्याद्यदिह किल बंधः प्रकृतिभिः
स खल्वज्ञानस्य स्फुरति महिमा कोऽपि गहनः॥३॥

सं० टी०—अमुना प्रकारेण स्वपरिणामैरुत्पद्यमानस्य जीवस्य तेन सह कारणभावाभावः सवद्रव्याणां द्रव्यांतरेणोत्पाद्योत्पादकभावाभावात् इति प्रकारेण, अयं जीवः-चिद्रूपः, अकर्ता-कर्मणामकारकः सन् स्थितः सुस्थः, किंभूतः ? स्वरसतः स्वभावतः कर्मोपाधिनिरपेक्षतः विशुद्धः निर्मलः, स्फुरदित्यादिः-स्फुरंति प्रकाशमानानि तानि च तानि चिज्ज्योतींषि च ज्ञानतेजांसि च तैः, छुरितेत्यादिः—छुरितं—प्रकाशितं, भुवनमेव-विष्टपमेव, भोगभवनं-परिपूर्णगृहं येन सः, तथापि आत्मनः समस्तविज्ञानमयत्वेनाकर्तृकत्वे सत्यपि, किल इति निश्चितं, इह-जगति, ज्ञानावरणादिकर्मभिः, स्यात्-भवेत् खलु—इति निश्चितं, यत् यस्माद्धेतोः अस्य—आत्मनः, असौ बंधः-संश्लेषः, प्रकृतिभिः सः—कोऽपि-अनिर्दिष्टः, गहनः अज्ञातांतः स्वरूपः, अज्ञानस्य ज्ञानाभावस्य, महिमा-माहात्म्यं, स्फुरति विजृंभते, अतिशयालंकारोयं ॥ ३ ॥ अथ भूयः कर्तृत्वभोक्तृत्वमामनति—

अर्थ-ऐसैं जीव है सो अपने निजरसतैं विशुद्ध है। यातैं परद्रव्यका तथा परभावनिका अकर्ता ठहर्या। कैसा है जीव ? स्फुरायमान होता-फैलता जो चैतन्यज्योति, तिनिकरि व्याप्त भया है भुवन कहिये लोकका आभोग कहिये मध्य जाकरि, ऐसा है भवन कहिये होना जाका। ऐसा है तौऊ याकै इस लोकविषैं प्रगट कर्मप्रकृतिनिकरि बंध होय है, सो यह निश्चयकरि अज्ञानका कोई ऐसा ही महिमा है, सो बडा गहन है-ताका थाह न पाइये॥ भावार्थ-शुद्धनयकरि जीव परद्रव्यका कर्ता नाही अर सर्व ज्ञेयनिविषैं जाका ज्ञान व्यापनेवाला है तौऊ याकै कर्मका बंध होय है सो यह कोई अज्ञानका बडा महिमा है॥ ३॥

भोक्तृत्वं न स्वभावोऽस्य स्मृतः कर्तृत्ववच्चितः।
अज्ञानादेव भोक्तायं तदभावादवेदकः। ४।

सं० टी०—अस्य चितः चिद्रूपस्य, भोक्तृत्वं-कर्मफलभोक्तृत्वं, न स्वभावः, न स्वरूपं स्मृतः-कथितः, अज्ञानादेव-परात्मनोरेकत्वाध्यासकरणलक्षणादनवबोधादेव, अयं—चेतयिता, भोक्ता-कर्मफलानुभोजकः, तदभावात्—प्रतिनियतस्वलक्षणनिर्ज्ञानात्, अवेदकः—कर्मफलानभोजकः॥ ४॥ अथ ज्ञान्यज्ञानाभिस्वरूपं सूत्रयति—

अर्थ-इस आत्माका कर्तास्वभाव जैसें नाही है, तैसेही भोक्तापणा भी स्वभाव नाही है, यह अज्ञानहीतैं भोक्ता होय है॥ बहुरि जब अज्ञानका अभाव होय है तब अवेदक है, भोक्ता नाही है॥४॥

अज्ञानी प्रकृतिस्वभावनिरतो नित्यं भवेद्वेदको

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानी तु प्रकृतिस्वभावविरतो नो जातुचिद्वेदकः ।
इत्येवं नियमं निरूप्य निपुणैरज्ञानिता त्यज्यतां
शुद्धैकात्ममये महस्यचलितैरासेव्यतां ज्ञानिता ॥ ५ ॥

सं० टी—अज्ञानी-पुमान्, प्रेत्यादिः-प्रकृतेः कर्मणः, स्वभावः-स्वरूपं, तत्र निरतः-निःशेषं रक्तः सन् शुद्धात्मज्ञानाभावात् स्वपरयोरेकत्वज्ञानेन तयोरेकत्वदर्शनेन तयोरेकत्वपरिणत्या च प्रकृतिस्वभावे स्थितत्वात् प्रकृतिस्वभावमपि अहंतयानुभवन्, नित्यं वेदकः-कर्मफलभोक्ता भवेत्, तु-पुनः, ज्ञानी पुमान् प्रेत्यादिः-प्रकृतेः स्वभावात् विरतः-विरक्तः सन् शुद्धात्मज्ञानसद्भावात्स्वपरयोर्विभागज्ञानेन तयोर्विभागदर्शनेन तयोर्विभागपरिणत्या च प्रकृतिस्वभावादपसृतत्वात् शुद्धात्मस्वभावमेकमेवाहंतयानुभवन्, जातुचित् कदाचिदपि न वेदकः उदितकर्मफलभोक्ता न, निपुणैः भेदज्ञैः पुरुषैः, अज्ञानिता-अज्ञानस्वभावाः, त्यज्यतां-मुच्यतां, किंकृत्वा ? इति-अमुना प्रकारेण, एवं-पूर्वोक्तं ज्ञान्यज्ञानिनोर्बंधाबंधलक्षणं नियमं निरूप्य-ज्ञात्वा, पुनः आसेव्यतां ध्यायतां, का ? ज्ञानिता-ज्ञानित्वं, कैः ? अचलितैः-अचलत्वं प्राप्तैः, क ? महसि-तेजसि, किंभूते ? शुद्धैकात्ममये-शुद्धः निष्कलंकः स चासौ एकात्मा च तेन निर्वृत्तस्तस्मिन् ॥ ५ ॥ अथ ज्ञानिनो ज्ञातृत्वमध्यापयति—

अर्थ—अज्ञानी जन हैं सो तौ प्रकृतिस्वभावविषैं रागी हैं-लीन हैं, ताहीकूं अपना स्वभाव जानैं हैं, तातैं सदाकाल ताका वेदक हैं-भोक्ता हैं ॥ बहुरि ज्ञानी है सो प्रकृतिस्वभावविषैं विरागी है--विरक्त है, ताकूं परका स्वभाव जानैं है तातैं कदाचित भी वेदक नाही है भोक्ता नाहीं है सो आचार्य उपदेश करैं हैं-जो, जे निपुण प्रवीण पुरुष हैं, ते ज्ञानीपणाका अर अज्ञानीपणाका ऐसा नियम निरूपणकरि विचारिकरि अज्ञानीपणाकूं तौ छोडौ अर शुद्ध आत्मामय जो एक मह-तेज प्रताप, ताविषै निश्चल होयकरि ज्ञानीपणाकूं सेवन करौ ॥ ५ ॥

ज्ञानी करोति न न वेदयते च कर्म जानाति केवलमयं किल तत्स्वभावं ।
जानन्परं करणवेदनयोरभावाच्छुद्धस्वभावनियतः स हि मुक्त एव ॥६॥

सं० टी० —ज्ञानी-पुमान् शुभाशुभं कर्म न करोति-न विधत्ते, न वेदयते-कर्मफलं न भुंजति, किलेति निश्चितं, अयं-ज्ञानी, केवलं-कर्तृत्वभोक्तृत्वराहित्येन परं, तत्स्वभावं तस्य कर्मणः स्वभावं स्वरूपं मधुरकटुकादि जानाति-तत्स्वभावपरिच्छेदको भवति हि-पुनः सः-आत्मा, मुक्त एव-कर्मफलरहित एव, परं-केवलं, जानन् विश्वं परिच्छिंदन् सन्, शुद्धेत्यादिः, शुद्धश्चासौ स्वभावः स्वरूपं च, तत्र नियतः-निश्चलत्वमापन्नः, कुतः ? करणवेदनयोः करणं-कर्मकर्तृत्वं च, वेदनं-कर्मफलभोक्तृत्वं च तयोरभावात् कर्तृत्वभोक्तृत्वस्वभावराहित्यात् ॥ ६ ॥ अथात्मनः कर्तृत्वं दूषयति—

अर्थ—ज्ञानी है सो कर्मकूं स्वतंत्र होय करै नाही है । तैसेही वेदै नाही है । केवल तिस कर्मस्वभावकूं जानैही है ॥ ऐसे केवल जानता संता करनेका अर वेदनेका अभावतैं शुद्धस्वभावके विषै निश्चयकरि मुक्त ही है—कर्मनितैं छुटया ही कहिये ॥ भावार्थ—ज्ञानी कर्मका स्वाधीनपणै कर्ता भोक्ता नाही, केवल ज्ञाता ही है । तातैं शुद्धस्वभावरूप भया संता मुक्तही है । जो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्म उदय आवै भी है तौ ज्ञानीका कहा करै ? जेतै निवलाई रहैं तेतै कर्म जोर चलावो सव-लाई क्रमतैं वधाय कर्मका निर्मूल नाश करैहीगा ॥ ६ ॥

ये तु कर्तारमात्मानं पश्यंति तमसावृताः।
सामान्यजनवत्तेषां न मोक्षोऽपि मुमुक्षतां ॥ ७ ॥

सं० टी० —ये तु–जिनसिद्धांताभासाः, तमसावृताः अज्ञानव्याप्ताः, विचाररहितत्यात्, आत्मानं, कर्तारं कर्मकारकं, पश्यंति ईक्षंते, तेषां–जैनाभासानां, मुमुक्षतामपि. मोक्षमिच्छतामपि न मोक्षः–कर्ममोचनलक्षणो मोक्षो न स्यात् आत्मनः कर्तृत्वाभ्युपगमात् तदभ्युपगमे च सदैव बद्धत्वप्रसंगः क इव सामान्यजनवत् सामान्यजनानां–वैशेषिकादीनां यथा 'कर्ता शिवस्त्रिजगतां' तथा च प्रयोगः–सर्वं उर्वीपर्वततरुतन्वादिकं धीमद्धेतुकं कार्यत्वात् अचेतनोपादानत्वात् सन्निवेशविशिष्टत्वात् वा वस्त्रादिवदिति यस्तु धीमान् स ईश्वरः। तस्य विचार्यमाणस्य मुक्तत्वायोगात् स हि—अशरीरः सशरीरो वा करोति ? न तावदाद्यः अशरीरस्य कर्तृत्वव्याघातात् मुक्तात्मवत्। सशरीरमात्रकर्तृत्वे उपक्षीणशक्तिकत्वात् तदकारणे साधनस्य व्यभिचारात्, सकर्मकत्वे संसारिजनवदकर्तृकत्वाच्च तद्वदमुक्तत्वं ॥ ७ ॥ अथ तथैव कर्तृत्वं व्याहन्ति–

अर्थ–जे पुरुष अज्ञान अंधकारकरि आच्छादे हुये आत्माकूं कर्ता मानै हैं, ते मोक्षकूं चाहते हैं, तौऊ तिनिकै सामान्यजन–लौकिकजनकीज्यौं मोक्ष नाहीं होय है ॥ ७ ॥

विशेष–वैशेषिक आदि ईश्वरको जगतका कर्ता मानते हैं। ईश्वर कर्ता है इस वातकी सिद्धिके लिये वे यह अनुमान भी वतलाते हैं–कि जिसप्रकार वस्त्र कार्य है उसके उपादान कारण तंतु अचेतन हैं और उसकी विलक्षण रचना है इसलिये उसका कर्ता निश्चित है उसी प्रकार पृथ्वी पर्वत वृक्ष और शरीर आदि पदार्थ भी कार्य हैं इनके भी उपादान कारण अचेतन हैं और ये विलक्षण रचनाके धारक हैं इसलिये इनका भी कोई शक्तिमान विद्वान कर्ता होना चाहिये और जो वह कर्ता है वही ईश्वर है। परन्तु जिस समय इस कर्ताके सिद्ध करनेवाले अनुमानपर विचार किया जाता है उससमय वह ईश्वर, मुक्त–समस्त कर्मवासनाओंसे रहित अनुभवमें नहिं आता क्योंकि यहांपर दो विकल्प आकर खडे होते हैं–वह पृथ्वी आदिको वनाने वाला शरीर सहित है किं वा शरीर रहित ? यदि शरीर रहित माना जायगा तो झूठ है क्योंकि जिसप्रकार सिद्धात्मा शरीररहित है इसलिये वे कर्ता भी नहीं, उसीप्रकार यदि ईश्वर शरीर रहित होगा तो कभी कर्ता नहिं हो सकता। यदि उसे कर्ता माननेके लिये उसको शरीर सहित मानोगे तो यहांपर भी दो विकल्प उठते हैं कि वह केवल शरीरको ही वनाता है वा अन्यपदार्थोंको भी ? यदि केवल शरीरका ही वनाने वाला है तो उसकी समस्त शक्ति तो उसीमें क्षीण हो जायगी फिर वह वनावेगा क्या ? और ऐसा करनेसे कार्यत्व आदि हेतु भी दुष्ट हो जायेगा–क्योंकि तुम्हारी व्याप्ति तो यह है कि जितने कार्य हैं उनका कोई न कोई कर्ता अवश्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है सो कार्य तो पृथ्वी आदि भी हैं उनका कोई कर्ता निश्चित न हुआ। कहोगे कि वह शरीर आदि सबका कर्ता है तो जिसप्रकार ईश्वरसे इतर शरीरधारी संसारी सब कार्योंके कर्ता नहिं हो सकते उसीप्रकार उनके समान ईश्वर भी कर्ता न ठहरेगा तथा संसारी जीवोंके समान वह भी मुक्त न हो सकेगा इसलिये किसीभी आत्माको कर्ता न मानना यही पक्ष समीचीन है।७।

नास्ति सर्वोऽपि संबंधः परद्रव्यात्मतत्त्वयोः ।
कर्तृकर्मत्वसंबंधाभावे तत्कर्तृता कुतः ॥ ८ ॥

सं० टी०—परेत्यादिः-पुद्गलद्रव्यजीवद्रव्ययोः सर्वोऽपि-तादात्म्यादिलक्षणः संबंधः, नास्ति, कर्त्रित्यादिः तयोर्मध्ये आत्मनः कर्तृत्वं, कर्मणां कर्मत्वं, एतल्लक्षणसंबंधाभावे सति, तत्कर्तृता-तेषां कर्मणामात्मनः कर्तृत्वं कुतः ? न कुतोऽपि स्यात् ॥ ७ ॥ अथ परद्रव्यात्मतत्त्वयोः संबंधं निवारयति—

अर्थ—परद्रव्यका अर आत्मतत्त्वका सर्वही संबंध नाही है, ऐसे कर्त्ताकर्मपणाका संबंधका अभावकूं होतै परद्रव्यका कर्तापणा काहेतैं होय ? भावार्थ—परद्रव्यका अर आत्माका किछूभी संबंध नाही, तब कर्त्ताकर्मसंबंध काहेकूं होय ? ऐसे होतै कर्तापणा काहेकूं होय ? आगे व्यवहारनयके वचनकरि कहिये है, जो, परद्रव्य मेरा है सो जे व्यवहारहीकूं निश्चय मानै हैं, ते अज्ञानतै माने हैं, याकूं दृष्टांतपूर्वक कहै हैं—

एकस्य वस्तुन इहान्यतरेण सार्धं संबंध एव सकलोऽपि यतो निषिद्धः ।
तत्कर्तृकर्मघटनास्ति न वस्तुभेदे पश्यंत्वकर्तृ मुनयश्च जनाः स्वतत्त्वं ॥९॥

सं. टी.—इह-जगति, यतः कारणात्, एकस्य वस्तुनः-चेतनस्य, अचेतनस्य वा अन्यतरेण सार्धं-सह, सकलोपि-समस्तोऽपि, संबंधः—तादात्म्यलक्षणः, गुणगुणिभावलक्षणः, लक्ष्यलक्षणभावः, वाच्यवाचकभावलक्षणः, विशेष्यविशेषणभावलक्षणः इत्यादिः संबंधो भिन्नवस्तुनोः निषिद्ध एव-प्रतिषिद्ध एव, तत् तस्मात्कारणात् वस्तुभेदे-वस्तुनोः-जीवपुद्गलयोः भेदे-पृथक्त्वे सति, कर्तृकर्मघटना-कर्तृकर्मणोः-जीवपुद्गलयोः, कर्तृत्वं कर्मत्वमिति घटना-संभावना, नास्ति च-पुनः मुनयो जनाः-मुनीश्वरलक्षणा लोकाः, अकर्तृ-कर्तृत्वव्यपदेशरहितं, स्वतत्त्वं-स्वात्मस्वरूपं पश्यंतु-अवलोकयंतु ॥ ६ ॥ अथाज्ञानिस्वभावं नेनेक्ति—

अर्थ—जा कारणतैं एकवस्तुकै अन्यवस्तुकरि सहित इस लोकमैं संबंध हैं, सो समस्तही निषेध्या है तातैं जहां वस्तुभेद है तहां कर्ताकर्मकी प्रवृत्तिही नाही है ॥ तातैं लौकिकजन भी अर मुनिजन भी वस्तुका तत्त्व कहिये यथार्थस्वरूप ऐसाही देखो जो कोई काहूका कर्ता नाही परद्रव्य परका कर्ताही श्रद्धानमैं ल्यावो ।१०। आगैं कहै हैं,जो पुरुष ऐसा वस्तुस्वभावका नियम नाही जानै है, ते अज्ञानी भये कर्मकूं करै हैं, ते भावकर्मके कर्ता होय हैं, ऐसैं अपने भावकर्मका कर्ता अज्ञानतें चेतन ही है, ताकी सूचनिकाका काव्य है—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ये तु स्वभावनियमं कलयंति नेममज्ञानमग्नमहसो बत ते वराकाः ।
कुर्वंति कर्म तत एव हि भावकर्मकर्ता स्वयं भवति चेतन एव नान्यः ।१०।

सं. टी.—तु-पुनः, ये-सांख्यादयो वादिनः इमं प्रसिद्धं, स्वभावनियमं-स्वभावः-चेतनत्वं अचेतनत्वं तस्य नियमं न कलयंति न मन्यंते सांख्यादीनां प्रकृत्यादितत्त्वानामेतत्वघटनात्, कीदृक्षास्ते ? अज्ञानेत्यादिः अज्ञाने मग्नं-अज्ञानाच्छादितं, महः ज्ञानज्योतिः येषां ते बतेति खेदयति ते-वादिनः, वराकाः-स्वतत्त्वव्याघातात् स्वस्वरूपं स्थापयितुमसमर्थाः संतः केवलं कर्मज्ञानावरणादिप्रकृतिं उपार्जयंति हीति स्फुटं तत एव अज्ञानादेव भावकर्म करोति न द्रव्यकर्म करोति यतः तत एव स्वयं अज्ञानादिः भावकर्मकर्ता भावकर्मणां रागद्वेषादीनां कर्ता-कारकः भवति, अन्यः अज्ञानादिस्वभावाद्भिन्नः चेतन एव-चेतयति स्वस्वरूपमिति चेतन एव भावकर्मकर्ता न भवति ।। १० ।। अथ कर्मणः कार्यत्वं कीर्तयति—

अर्थ—जे पुरुष वस्तुका स्वभावका पूर्वोक्त नियमकूं नाही जानै हैं तिनिकूं आचार्य खेद करि कहै हैं—अहो अज्ञानविषैं मग्न भया है मह कहिये पुरुषार्थ-पराक्रमरूप तेज जिनिका, ते वराक कहिये रांका भये संते कर्मकूं करै हैं, ज्ञान तैं छूटि गये हैं, तातैं दूसरी तीसरीभावकर्मका आप चेतनही कर्ता होय है अन्य नाही है । भावार्थ—जो अज्ञानी मिथ्यादृष्टि है सो वस्तूका स्वरूपका नियम तौ जानै नाही अर परद्रव्यका कर्ता बनै, तब आप अज्ञानरूप परिणमै, तब अपना भावकर्मका कर्ता अज्ञानीही है, अन्य नाही है ।।

कार्यत्वादकृतं न कर्म न च तज्जीवप्रकृत्योर्द्वयो-
रज्ञायाः प्रकृतेः स्वकार्यफलभुग्भावानुषंगाकृतिः ।
नैकस्याः प्रकृतेरचित्त्वलसनाज्जीवोऽस्य कर्ता ततो
जीवस्यैव च कर्म तच्चिदनुगं ज्ञाता न यत्पुद्गलः ॥११॥

सं० टी०—कर्म भावकर्म पक्षः, अकृतं न भवितुमर्हति इति साध्यो धर्मः, कार्यत्वात् हेतुः तत्रान्वयव्याप्तिः यद्यत्कार्यं तत्तदकृतं न भवति यथा-घटादिः कार्यं च भावकर्म तस्मादकृतं न । व्यतिरेकव्याप्तिश्च यदकृतं तन्न कार्यं यथा व्योमादिः न च तथेदं तस्मान्न तथेति । कस्य कार्यमिति प्रश्ने तच्च कर्म जीवप्रकृत्योः जीवश्च प्रकृतिश्च तयोः,द्वयोः,कार्यं न,कुतः ? अज्ञायाः अचेतनायाः प्रकृतेः,स्वेत्यादिः-स्वस्य स्वभावकर्मणः कार्यं सुखदुःखादि तस्य फलं-इष्टानिष्टावाप्तिपरिहारपूर्वकसुखदुःखानुभवनं भुनक्तीति स्वकार्यफलभुग् तस्य भावस्तस्यानुषंगाकृतिः संपर्कप्रसंगः स्यात् । ननु द्वयोर्मा भवतु कार्यं एकस्याः प्रकृतेः द्रव्यकर्मणः सांख्यपरिकल्पितायाः सत्त्वरजस्तमसां समावस्थायाः प्रकृतेर्वा कार्यं ? इति चेन्न, अचित्त्वलसनात्ः,प्रकृतेः अचेतनत्वस्वभावात् तत्कार्यत्वे च तस्याचेतनत्वानुषंगात् ततो द्वयोरेकस्याः कार्यकरणायोगात्,अस्य भावकर्मणः जीवति दशभिः प्राणैरिति जीवः संसार्यात्मा कर्ता—कारकः, च-पुनः, तत्-कर्म, तत-प्रसिद्धं, भावकर्म जीवस्यैव नान्यस्य किंभूतं ? चिदनुगं-चेतनासहितं तथा चोक्तं श्रीमदाप्तपरीक्षायां—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावकर्माणि चैतन्यविवर्तात्मानि भांति नुः । क्रोधादीनि स्ववेद्यानि कथंचिच्चिदभेदतः ॥
यत् यस्मात् कारणात् पुद्गलः ज्ञायको न अचेतनत्वात् ॥ ११ ॥ अथ प्रकृतिवादिनं सांख्यं प्रतिक्षिपति–

अर्थ–कर्म है सो कार्य हैं, तातैं विना किया होय नाही । बहुरि सो कर्म जीवका अर प्रकृतिका दोऊका किया नाही । जातें प्रकृति तौ जड है, ताकै अपने अपने कार्यका फलका भोगनेका प्रसंग आवै है बहुरि एक प्रकृतिकीही कृत कहिये कार्य नाही हैं जातें प्रकृति तौ अचेतन है अर भावकर्म चेतन है । तातै इस भावकर्मका कर्त्ता जीव ही है यह जीवहीका कर्म है । जातें चेतनके अनुग कहिये चेतनतैं अन्वयरूप है–चेतनके परिणाम हैं । अर पुद्गल है सो ज्ञाता नाही है तातैं पुद्गलके नाही है ॥ भावार्थ–चेतनकर्म चेतनहीकै होय, पुद्गल जड है, ताकै चेतनकर्म कैसे होय ॥११॥ आगैं जे केई भावकर्मका भी कर्ता कर्महीकूं माने हैं, तिनिकूं समझावनेकूं स्याद्वादकरि वस्तुकी मर्यादा कहै हैं । ताकी सूचनिकाका काव्य है–

कर्मैव प्रवितर्क्य कर्तृ हतकैः क्षिप्त्वात्मनः कर्तृतां
कर्तात्मैष कथंचिदित्यचलिता कैश्चिच्छ्रुतिः कोपिता ।
तेषामुद्धतमोहमुद्रितधियां बोधस्य संशुद्धये
स्याद्वादप्रतिबंधलब्धविजया वस्तुस्थितिः स्तूयते ॥१२॥

सं० टी––कैश्चित्––सांख्यमतानुसारिभिः इति पूर्वोक्ता श्रुतिः–जिनोक्तं सूत्रं कोपिता–विराधिता किंभूता श्रुतिः ? अचलिता प्रमाणादिभिश्चलयितुमशक्या, किंभूतैस्तैः ? हतकैः–आत्मनोऽकर्तृत्वप्रतिपादकैः आत्मा–चेतयिता, कर्ता तु प्रकृतिः, किंकृत्वा ? कर्मैव–प्रकृतिरेव कर्तृ–सुखदःखादिकारकं, प्रवितर्क्य––प्रविचित्य, कर्मैवात्मानमज्ञानिनं करोति ज्ञानावरणाख्यकर्मोदयमंतरेण तदनुपपत्तेः, कर्मैव ज्ञानिनं करोति तत्कर्मक्षयोपशममंतरेण तदनुपपत्तेः, तथैव निद्रासुखदुःखमिथ्यादृश्चसंयतोद्र्ध्वाधस्तिर्यग्लोकशुभाशुभप्रशस्ताप्रशस्तादिकं तत्तत्संबन्धि कर्मोदयमंतरेण तदनुपपत्तेः तथा च जैनी श्रुतिः–पुंवेदाख्यं कर्म स्त्रियमभिलषति स्त्रीवेदाख्यं कर्म नरं च तथा यत्परं हंति येन च परेण हन्यते तत्परघातकर्मेति वाक्येन जीवस्याब्रह्मपरघातादिनिषेधात् कर्मण एव तत्समर्थनात् आत्मनः–जीवस्य कर्तृतां–भावकर्मकारित्वं क्षिप्त्वा–निराकृत्य, प्रकृतेरेव कर्तृत्वे तस्य सर्वेषां जीवानामकर्तृत्वे भोक्तृत्वादीनामपि कर्तृत्वाभावात् अकिंचित्करत्वमेव पुरुषत्वव्याघातात् इति किं ? एष आत्मा कथंचित् कर्ता केनचित् कारणेन कारकः अन्यथा मुक्तात्मनां कर्तृत्वप्रसंगात् । तेषां प्रकृतेः कर्तृत्ववादिनां, बोधस्य ज्ञानस्य, संशुद्धये–निर्मलीकरणाय, वस्तुस्थितिः वस्तुनः व्यवस्था स्तूयते–प्रशस्यते किंभूता सती ? स्यादित्यादि स्याद्वादेन–कथंचिद्वादेन प्रकृत्यादीनां नित्यत्वादेः, प्रतिबन्धः–प्रतिषेधः तत्कथं ? प्रधानं व्यक्तादपैति नित्यत्वनिराकरणात् अपेतमप्यस्ति विनाशप्रतिषेधात् इत्येकांतनिषेधः तेन लब्धो विजयो यया सा, अथवा स्याद्वाद एव प्रतिबन्धः–कारणं वस्तुस्थितेः, तेन लब्धो विजयो यया सा, कीदृशानां तेषां ? उद्धतेत्यादिः–उद्धतः–उत्कटः चासौ मोहश्च मोहनीयं कर्म तेन मुद्रिता आच्छादिता, धीः–धारणावती बुद्धिर्येषां तेषां ॥ १२ ॥ अथ निश्चयेनाकर्तृत्वमात्मनो वक्ति–

अर्थ–केई आत्माके घातक सर्वथा एकान्तवादी तिनिनैं कर्महीकूं कर्त्ता विचारि अर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्माके कर्तापणा दूरि करि अर यह आत्मा कथंचित् कर्त्ता है ऐसैं कहनेवाली निर्बाध श्रुति कहिये जिनेश्वरकीं वाणी है, ताकूं कोप उपजाया ऐसे सर्वथा एकांतवादी हैं ते कैसे हैं? उद्धत उत्कट तीव्र उदय भया जो मोह मिथ्यात्व ताकरि मुद्रित भई हैं बुद्धि जिनकी, तिनिका बोध कहिये ज्ञान, ताकी सम्यक्प्रकार शुद्धिके अर्थि वस्तुकी मर्यादा कहिये है ॥ कैसी कहिये है? स्याद्वादके प्रतिबंध कहिये प्रबन्ध, ताकरि पाइये है विजय कहिये निर्बाधसिद्धि जानैं ॥ भावार्थ-केई वादी सर्वथा एकांतकरि कर्मका कर्ता कर्महीकूं कहै हैं। अर आत्माकूं अकर्त्ताही कहै हैं ते आत्माका स्वरूपके घातक हैं। अर जिनवाणी है सो स्याद्वादकरि वस्तुकूं निर्बाध साधै है, सो वाणी आत्माकूं कथंचित् कर्त्ता कहै है, सो तिनि सर्वथा एकांतिनिपर वाणीका कोप है तिनकी बुद्धि मिथ्यात्वकरि मुंदि रही है। तिनिके मिथ्यात्वके दूरि करनेकूं आचार्य कहै हैं स्याद्वादकरि जैसी वस्तुसिद्धि होय है, तैसे कहिये हैं।

विशेष-इस श्लोकका उल्लेख सांख्यमतके खंडनकेलिये किया है क्योंकि सांख्यमतमें यह बात मानी है कि कर्म-प्रकृति कर्ता है पुरुष नही वह चेतनस्वरूप है। संस्कृतटीकामें स्पष्टरूपसे इस श्लोककी व्याख्या की गई है ॥ १२ ॥

मा कर्तारममी स्पृशंतु पुरुषं सांख्या इवाप्यार्हताः
कर्तारं कलयंतु तं किल सदा भेदावबोधादधः।
ऊर्ध्वं तूद्धतबोधधामनियतं प्रत्यक्षमेनं स्वयं
पश्यंतु च्युतकर्तृभावमचलं ज्ञातारमेकं परं ॥१३॥

सं० टी०-अमी आर्हताः-अर्हतः-भगवत इमे, अर्हन्देवो येषां ते आर्हताः, पुरुषं-आत्मानं, कर्तारं-भावकर्मकर्तारं, मा स्पृशंतु मांगीकुर्वंतु, के इव? सांख्या इव यथा सांख्या आत्मनोऽकर्तृत्वं प्रतिपादयंति तथा साक्षात् ज्ञानरूपेण जैना अपि, किल इत्यागमोक्तौ, भेदावबोधाद्-भेदज्ञानाद् अधःअभेदज्ञावस्थायां तं-आत्मानं, तदा संसारावस्थापर्यंतं, कर्तारं-भावकर्मकारकं, कलयंतु जानंतु, तु-पुनः, ऊर्ध्वं-अज्ञानादुपरि-भेदविज्ञानावस्थायां, एनं-आत्मानं, स्वयं-स्वभावतः प्रत्यक्षं अध्यक्षं यथा भवति यथा च्युतकर्तृभावं-त्यक्तकर्तृस्वभावं पश्यंतु-अवलोकयंतु मुनयः किंभूतं? उद्धतेत्यादिः-उद्धतं च तद्बोधधाम-ज्ञानज्योतिः तत्र नियतं नियंत्रितं, अचलं निष्कंपं, ज्ञातारं-ज्ञायकं एकं कर्मद्वैतरहितत्वादद्वैतं परं जगच्छ्रेष्ठं, ॥ १३ ॥ अथ क्षणक्षयस्वलक्षणवादिनं सौगतं निराचष्टे-

अर्थ-आर्हत कहिये अर्हतके मतके जैनी जन हैं ते आत्माकूं सर्वथा अकर्त्ता सांख्यमतीनिकीज्यों मति मानुं। तिस आत्माका भेदविज्ञान भये पहलैं कर्ता मानुं अर भेदज्ञान भये ताके उपरि उद्धत ज्ञानमंदिरविषै निश्चित नियमरूप कर्त्तापणाकरि रहित निश्चल एक ज्ञाता ही आपै आप प्रत्यक्ष देखो॥ भावार्थ-सांख्यमती पुरुषकूं सर्वथा एकांतकरि अकर्ता शुद्ध उदासीन चैतन्यमात्र मानै हैं सो ऐसैं माननेतैं पुरुषकै संसारका अभाव आवै है प्रकृतिकै संसार मानै तौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकृति तौ जड हैं, ताकै सुखदुःख आदिका संवेदन नाही। ताकै काहेका संसार? इत्यादि दोष आवै हैं। यातैं सर्वथा एकांत वस्तूका स्वरूप नाहीं। तातैं ते सांख्यमती मिथ्यादृष्टि हैं, तातैं तैसैं जैनी भी मानैं हैं तौ मिथ्यादृष्टि होय हैं।। तातैं, आचार्य उपदेश करैं हैं–जो, सांख्यमतीनिकीज्यों जैनी आत्माकूं सर्वथा अकर्ता मति मानूं। जहांताईं आपा-परका भेदविज्ञान न होय, तहांताईं तौ रागादिक अपने चेतनरूप भावकर्मनिका कर्ता मानूं। अर भेदविज्ञान भये पीछे शुद्धविज्ञानघन समस्तकर्तापणाके अभावकरि रहित एक ज्ञाताही मानूं ऐसैं एकही आत्माके विषै कर्ता अकर्ता दोऊ भाव विवक्षाके वशतैं सिद्ध होय हैं। यह स्याद्वाद-मत जैनीनिका है अर वस्तुस्वभाव ऐसाही है। कल्पना नाही है। ऐसैं मानैं पुरुषकै संसार मोक्ष आदिकी सिद्धि है। सर्वथा एकांत माननेविषै सर्व निश्चयव्यवहारका लोप होय है ऐसैं जानना।१३। आगै बौद्धमती क्षणिकवादी हैं, ते ऐसैं मानैं हैं, जो कर्ता तौ अन्य है अर भोक्ता अन्य है। तिनिके सर्वथा एकांत माननेमें दूषण दिखावै हैं। अर स्याद्वादकरि जैसैं वस्तुस्वरूप कर्ताभोक्तापणा है तैसैं दिखावै हैं। तहां प्रथम ही ताकी सूचनिकाका काव्य है–

क्षणिकमिदमिहैकः कल्पयित्वात्मतत्त्वं निजमनसि विधत्ते कर्तृभोक्त्रोर्विभेदं।
अपहरति विमोहं तस्य नित्यामृतौघैः स्वयमयमभिषिंचंश्चिच्चमत्कार एव।१४।

सं० टी०—इह भरतक्षेत्रे, भावमिथ्यात्वापेक्षया सर्वत्र वा एकः सौगतवादी कर्तृभोक्त्रोर्विभेदं-कर्ता च भोक्ता च तयोर्विभेदं-भिन्नत्वं 'सौगतानां कर्ताऽन्यः, भोक्ता अन्यः' निजमनसि—स्वचेतसि, विधत्ते करोति, किंकृत्वा? कल्पयित्वा प्रकल्प्य, किं? इदं प्रसिद्धं, आत्मतत्त्वं-जीवतत्त्वं, क्षणिकं—क्षणस्थायि 'सर्वं क्षणिकं सत्त्वात् प्रदीपवत्' इत्यनुमाने सर्वथा नित्यादिपक्षे अर्थक्रियाभावं प्रकल्प्य दूषयति-अयं प्रसिद्धः, प्रत्यभिज्ञानादिलक्षणः, चिच्चमत्कार एव चितः-ज्ञानस्य, चमत्कारः, तस्य-सौगतस्य विमोहं-क्षणिकत्वं बुद्धिव्यामोहं अपहरति-निराकरोति, स्वयं-स्वभावात् एव, नित्यामृतौघैः-आत्मादौ यन्नित्यत्वं तदेवामृतं तस्य ओघैः समूहैः, अभिषिंचन्-अभिषेकं कुर्वन् सर्वं नित्यस्वरूपं प्रतिदर्शयन् सन् इत्यर्थः सर्वं कथंचिन्नित्यं प्रत्यभिज्ञायमानत्वात्, न चैतदसिद्धं य एव बालः स एव युवा स एव च बृद्धः इत्यबाधितायाः प्रतीतेः सद्भावात् तथा व्यवहाराच्च क्षणिकत्वेऽर्थक्रियाविरोधाच्च क्षणिकं यदि स्वसत्तायामपरक्षणोत्पादलक्षणामर्थक्रियां करोति तदा सकलस्य जगतः क्षणिकत्वं रुणद्धि कार्यकालं प्राप्नुवतः क्षणिकत्वविरोधात् स्वयं अविद्यमानं सत् करोति यदा तदा कालांतरे पूर्वं पश्चाच्च तत्कुर्यादसत्त्वाविशेषात् इत्यर्थक्रियाविरोधः ॥ १४ ॥ अथ क्षणिकैकांतान् छिनत्ति पद्यत्रयेण—

अर्थ–एक कहिये बौद्धमती क्षणिकवादी है सो आत्मतत्त्वकूं क्षणिक कल्पिकरि अर अपना मनविषै कर्ता अर भोक्ताविषै भेद मानै है। करै और है, भोगवै और है ऐसैं मानै है। ताका विमोह कहिये अज्ञानकूं यह चैतन्यचमत्कार सोही आप दूर करै है, कहा करता संता? नित्य-रूप अमृतका ओघनिकरि सिंचता संता। भावार्थ–क्षणिकवादी कर्ताभोक्ताविषै भेद मानै हैं, प्रहिलैं क्षण था सो दूजै क्षण नाहीं, तैसैं मानै है। सो आचार्य कहैं हैं–जो हम ताकूं कहा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समझावैं ? यह चैतन्यही ताका अज्ञान दूर करेगा जो अनुभवगोचर नित्यरूप है। पहिले क्षण आप है सोही दूजे क्षणमें कहै हैं। मै पहले था, सोही हौं, ऐसा स्मरणपूर्वक प्रत्यभिज्ञान ताकी नित्यता दिखावै हैं। इहां बौद्धमती कहै, जो पहिले क्षण था, सोही मैं दूजे क्षण हौ यह मानना तौ अनादि अविद्यातैं भ्रम है, यह मिटै तब तत्त्व सिद्ध हो समस्त क्लेश मिटै। ताकूं कहियें, जो, हे बौद्ध! तैं प्रत्यभिज्ञानकूं भ्रम बताया, तौ जो अनुभवगोचर है सो भ्रम ठहरया तौ तेरा मानना क्षणिक है। सो भी अनुभवगोचर है। सो यह भी भ्रमही ठहरया जातैं अनुभव अपेक्षा दोऊही समान हैं तातैं सर्वथा एकांत मानना तौ दोऊ ही भ्रम हैं–वस्तुस्वरूप नाही। हम कथंचित् नित्यानित्यात्मक वस्तुस्वरूप कहै हैं, सो सत्यार्थ है ॥१४॥ आगै ऐसेही क्षणिक माननेवालेकूं युक्तिकरि निषेधैं हैं–

वृत्त्यंशभेदतोऽत्यंतं वृत्तिमन्नाशकल्पनात्।
अन्यः करोति भुङ्क्तेऽन्य इत्येकांतश्चकास्तु मा ॥१५॥

सं० टी०इति–ईदृक्षः एकांतः–सौगतोपकल्पितक्षणिकैकांतः, मा चकास्तु–मा प्रतिभासतां, इति किं? अन्यः–भिन्नः क्षणः, करोति—कार्यं निष्पादयति, अन्यः—तदनंतरभावी अन्यः भिन्नः क्षणः पूर्वक्षणकृतं कार्यं भुंक्ते–भुनक्ति, कुतः? वृत्त्यमित्यादिः वृत्तेः–वर्तनायाः, अंशाः–ज्ञानादिपर्यायाः, तेषां भेदात्, द्रव्याभावे सति पूर्वोत्तरपर्यायाणामत्यंतभिन्नत्वात्, कुतो भेदः? अत्यांतं अंतर्द्रव्यादिस्वरूपेणापि, वृत्तीत्यादिः वृत्तिः–वर्तना अस्ति येषां ते वृत्तिमंतः—पर्यायाः, तेषां नाशः —अत्यंतमुच्छेदः, तस्य कलनात् इत्येकांते यो हिंसाभिसंधाता स न हिनस्ति सोऽहिंसकः सन् बध्नाति पापकर्मणा यस्तु बध्यते स न मुच्यते अन्यो ध्याता अन्यो ध्यानचिंतक अन्यो मुक्तः इति पूर्वोत्तरपर्यायाणामत्यंतभेदात् ॥ १५ ॥

अर्थ—वृत्त्यंश कहिये क्षण क्षण प्रति अवस्थाभेद है तिनकूं वृत्त्यंश कहिये तिनिके अत्यंत कहिये सर्वथा भेद न्यारे न्यारे वस्तु माननेतैं वृत्तिमत् कहिये जामैं अवस्था पाइये ऐसा आश्रयरूप वृत्तिमान् वस्तु, ताका नाशकी कल्पनातैं ऐसैं मानै है जो करै और है अर भोगवै और है सो आचार्य कहै हैं जो ऐसा एकांत मति प्रकाशो। जहां अवस्थावान पदार्थ का नाश भया, तहां अवस्था कौनके आश्रय होय? ऐसा दोऊका नाश आवै है, तब शून्यका प्रसंग होय है ॥

आत्मानं परिशुद्धमीप्सुभिरतिव्याप्तिं प्रपद्यांधकैः
कालोपाधिबलादशुद्धिमधिकां तत्रापि मत्वा परैः।
चैतन्यं क्षणिकं प्रकल्प्य पृथुकैः शुद्धर्जुसूत्रेरितै-
रात्मा व्युज्झित एष हारवदहो निस्सूत्रमुक्तेक्षिभिः ॥१६॥

सं० टी०—अहो–आश्चर्ये, परैः–स्याद्वादानवद्यविद्याविचारचोरकैः, अंधकैः–बौद्धैः, आत्मा–आत्माख्यं द्रव्यं, व्युज्झितः–त्यक्तः, ज्ञानपर्यायसंतरेणात्मनोऽभावात्। किंकृत्वा? अतिव्याप्ति–अतिव्याप्तिनामदूषणं,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रपद्य—अंगीकृत्य, तथाहि—यदेव वस्तु स्याद्वादिनामात्मादि तदेव अनेकपर्यायाक्रांतं—गुणपर्यायाक्रांतं 'गुणपर्ययवद् द्रव्यं' इतिसूत्रकारवचनात्।

नयोपनयैकांतानां त्रिकालानां समुच्चयः। अविभ्राट्भावसंबंधो द्रव्यमेकनेकधा ॥१०७॥

इति स्वामिसमंतभद्राचार्यवर्यवचनाच्च। ननु त एव पर्याया अवस्तुभूताः, वस्तुभूता वा? प्राक्पक्षे अवस्तुभूतैः पर्यायैर्जीवस्य वस्तुत्वाघटनात् कृत्रिमस्फुटत्वतोवस्तुभूततानवघटनात्। अथ वस्तुभूताश्चेत् तेऽपि पर्यायाक्रांताः अन्यथा वस्तुत्वाघटनात्, पुनरुत्तरपर्यायाणां वस्तुत्वापत्तावनवस्था, एकस्मिन्ननेकवस्तुत्वापत्तिश्च ततोनैकद्रव्यव्यवस्था। अतिव्याप्तिसद्भावात् इति चेन्न प्रदीपक्षणस्यैकस्य तैलाकर्षणवर्तिकामुखदाहाद्यनेककार्यं कुर्वतः कार्यस्यासत्यत्वे कार्यकारित्वाद्वस्तुव्यवस्थानायोगात् तत्सत्यत्वे प्रतिकार्यं क्षणिकवस्तुत्वापत्तिरिति कथमेकक्षणिकवस्तुत्वस्थितिरिति। कीदृशैः? आत्मानं—स्वं चैतन्यं, परिशुद्धं संसारदशातो ध्यानादिभिर्निर्मलं, ईप्सुभिः—वांछकैः क्षणिकत्वे कस्याशुद्धित्वं कस्य पुनर्ध्यानं कस्य च मुक्तावस्थायां शुद्धिरिति सर्वं गगनारविंदमिव निर्विषयत्वादसदाभाति, आत्माभावात् शुद्धिरशुद्धिश्च कस्य पुनः एकक्षणस्य द्विधर्माधारत्वाघटनात् अन्यथा निरंशत्वपक्षघातप्रसक्तेः, अपि—पुनः, किंकृत्वा? तत्र-आत्मनि, अधिकां दूषणाधानाद्बहुतरां, अशुद्धिं—अशुद्धतां, मत्वा ज्ञात्वा, कुतः कालोपाधिबलात्— कालः समयादिस्थायित्वरूपः स एव उपाधिः—विशेषणं तस्य बलं—सामर्थ्यं तस्मात्, तथाहि एकं वस्तु अनेकक्षणस्थायि सदनेकक्षणविशिष्टं भवेत्तदविशिष्ट वा? प्राक्तने पक्षे प्रथमक्षणेऽनेकक्षणविशिष्टत्वं भवेत् अन्यथा अनेकक्षणविशिष्टत्वाभावप्रसंगात् एवं द्वितीयादिक्षणेष्वपि. द्वितीयपक्षे कालाविशिष्टं वस्तु क्रमयौगपद्याभ्यां व्यतिरिक्तमवस्त्वेव स्यात्। पुनः किं विधाय? प्रकल्प्य—कल्पयित्वा, किं? क्षणिकं—क्षणस्थायिं चैतन्यं ज्ञानं सर्वं क्षणिकं सत्त्वात् प्रदीपवत् नित्ये क्रमाक्रमाभावादर्थक्रियाभावात्सत्त्वाभावः इति। कीदृक्षैश्च? पृथुकैः—बालिशैः,वस्तुनः कचित्कदाचित्क्षणिकत्वाभावात्। पुनः कीदृक्षैः? रतैः—रक्तैः क? शुद्धर्जुसूत्रे—शुद्धः—द्रव्यनिरपेक्षः,स चासौ ऋजुसूत्रश्च—अर्थपर्यायग्राहको नयः, तत्र कैः क इव? निस्सूत्रमुक्तेक्षिभिः अप्रोतसूत्रे ईहितहारमुक्ताफलावलोकिभिः पुरुषैः हारवत् यथा हारस्त्यक्तः अन्वयिसूत्रद्रव्यानंगीकारात् ॥ १६ ॥

अर्थ-आत्माकूं समस्तपणे शुद्ध इच्छक जे पृथुक कहिये बौद्धमति तिनिने तिस आत्मा विषैं कालके उपाधिके बलतैं अधिक अशुद्धता मानिकर अतिव्याप्तिपायकरि अर शुद्ध ऋजुसूत्रनयके प्रेरे हुये चैतन्यकूं क्षणिक कलपि करि आंधेनिने आत्माकूं छोड्या जातैं आत्मा तो द्रव्यपर्याय स्वरूप था सो सर्वथा क्षणिकपर्यायस्वरूप मानि छोडि दिया तिनिके आत्माकी प्राप्ति न भई इहां हारका दृष्टांत है। जैसे मोतीनिका हारनामा वस्तु है। तामैं सूत्रविषैं मोती पोये हैं।। ते भिन्न २ दीखै हैं सो जे हार नामा वस्तूकूं सूत्र सहित मोती पोये नाही देखे है अर मोतीनिहीकूं न्यारे २ देखि ग्रहण करै हैं तिनिके हारकी प्राप्ति नाही होय है तैसे ही जे आत्माका एक नित्य चैतन्यभावकूं नाही ग्रहण करै हैं अर समय समय वर्तना परिणामरूप उपयोगकी प्रवृत्तिकूं देखि तिसकूं सदा नित्य मानि कालकी उपाधितैं अशुद्धपना मानि ऐसैं जानै है जो नित्य मानै कालका उपाधि लागै तब आत्माके अशुद्धपणा आवै तब अतिव्याप्ति दूषण लागै सो इस दूषणके भयते ऋजु सूत्रनयका विषय जो शुद्ध वर्तमान समयमात्र क्षणिकपणा तिसभाव मानि आत्माकूं छोडि दिया ॥ भावार्थ—बौद्धमती आत्माकूं समस्तपणैं शुद्ध माननेका इच्छुक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होय अर विचारी जो आत्माकूं नित्य मानिये तो नित्यमें तो कालकी अपेक्षा आवै तातैं उपाधि लागै तब बडी अशुद्धता आवै तब अतिव्याप्तिदूपण लागै इस भयतैं शुद्ध ऋजु सूत्र नयका विषय वर्तमान समयमात्र था तिसमात्र क्षणिक आत्माकूं मान्या तब आत्मा नित्यानित्यस्वरूप द्रव्यपर्याय स्वरूप था तिसका ग्रहण ताकै न भया, केवलपर्याय मात्रविषैं आत्माकी कल्पना भई सो सत्यार्थ आत्मा नाही ऐसे जानना ॥१६॥ अब फेरि इसही अर्थके समर्थनरूप वस्तुका अनुभवन करनेकूं काव्य कहै हैं—

> कर्तुर्वेदयितुश्च युक्तिवशतो भेदोऽस्त्वभेदोऽपि वा
> कर्ता वेदयिता च मा भवतु वा वस्त्वेव संचिंत्यतां।
> प्रोता सूत्र इवात्मनीह निपुणैर्भेत्तु'(भर्तुं) न शक्या क्वचि-
> च्चिच्चिंतामणिमालिकेयमभितोऽप्येका चकास्त्येव नः ॥१७॥

सं० टी०—कर्तुः-कारकस्य, वेदयितुश्च-कर्मभोजकस्य च, भेदः-परस्परं कथंचिद्भिन्नत्वमस्तु सर्वथा भेदे तयोः केवलं कर्तृत्वं भोक्तृत्वं वा स्यात् यः कर्ता स एव भोक्ता इति जीवांतरवेदकसंतानेऽपि न स्यात् कुतः ? युक्तिवशतः-नयप्रमाणात्मिका युक्तिः तस्य वशतः द्रव्यार्थादेशादेकत्वप्रतिभासनात् अहमहमिकात्मो विवर्त्तात्माननुभवन् सर्वलोकानां स्वलक्षणप्रत्यक्षत्वप्रतिभासनाच्च चित्रज्ञानवत्सर्वथा भेदाघटनात्, तु-पुनः कथंचिदभेदो वास्तु सर्वथाऽभेदे तयोरुभयव्यपदेशाभावः केवलं कर्तैव भोक्तैव वा स्यात् ततस्तद्वतस्ताभ्यां परस्परं व्यावृत्तिरेकानेकस्वभावत्वात् घटरूपादिवत् ततः य एव करोति स एव अन्यो वा वेदयते य एव वेदयते स एव अन्यो वा करोति इति नास्त्येकांतः। कर्ता वेदयिता भोक्ता चात्मा भवतु वा-अथवा मा भवतु कर्ता भोक्ता मास्तु वस्त्वेव शुद्धात्मैकद्रव्यरूपं वस्तु वसति गुणपर्यायानिति वस्तु पर्यायानपेक्षया द्रव्यमेव शुद्धं संचिंत्यतां-ध्यायतां-विचार्यतां वा निपुणैः भेदज्ञैः पुरुषैः इह-आत्मनि चिद्रूपे, क्वचित्-कस्मिंश्चित् काले भेत्तुं धर्तुं, कर्ता भोक्ता चेति धर्तुं न शक्यस्तस्यैकरूपत्वात् दृष्टांतयतींत्यत्र इव- यथा सूत्रे गुणे तंतौ प्रोता अनुस्यूतो हारो मुक्तामणिरिति भेत्तुं न शक्यः, अपि-पुनः, नः-अस्माकं-स्याद्वादिनां, अभितः-सामस्त्येन इयं-प्रसिद्धा, एका अद्वितीया चिदित्यादिः-चित्-चेतना सैव चिंतामणिः,तस्य मालिका पंक्तिः, अनुस्यूतमुक्ताफलानां पंक्तिरिव चकास्त्येव-द्योतत एव क्षणाक्षणिकपक्षदूषणैरष्टसहस्र्यां क्षणिकज्ञानस्य निराकृतत्वात् ॥ १७ ॥ अथ व्यावहारिकदृशा तयोर्भिन्नत्वं चिंत्यते—

अर्थ—कर्ताकै अर भोक्ताकै युक्तिके वशतैं भेद होऊ अथवा अभेद होऊ अथवा कर्ता भोक्ता होऊ ही मति होऊ वस्तुहीका चिंतवन करो ॥ जातैं निपुण जे चतुर पुरुष तिनिकरि सूत्रविषैं पोई हुई मणिनिकी माला जैसे भेदी न जाय तैसे आत्मा विषे पोई हुई चैतन्यरूप चिंतामणीकी माला है सो कहूही कोईकरि भेदनेकूं समर्थ न हूजिये ॥ एसी यह आत्मारूपी माला समस्तपणे एक हमारे प्रकाशरूप प्रगट होऊ ॥ वस्तु द्रव्य पर्यायात्मक अनंतधर्मा है ता विषैं विवक्षाके वशतैं कर्ता भोक्तापणाका भेद भी है अर भेद नाही है। अर कर्ता भोक्ता भी काहेकूं कहना केवल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुद्ध वस्तुमात्रका असाधारण धर्मके द्वारे अनुभवन करना ऐसे आत्मा नामा वस्तु सो असाधारण चैतन्यमात्र भावके द्वारे अनुभवन करते चैतन्यके परिणमनरूप पर्यायके भेदनिकी अपेक्षा कर्ता भोक्ताका भेद है ।। चिन्मात्रद्रव्य अपेक्षा भेद नाही है ऐसैं भेद अभेद होऊ तथा चिन्मात्र अनुभवनमें काहेकूं भेद अभेद कहना ।। कर्ता भोक्ता ही न कहना वस्तु मात्र अनुभव करना जैसे मणिनिकी मालामें सूत्रमोतीनिकी विवक्षातैं भेद है मालामात्र ग्रहण करनेमें भेदाभेदका विकल्प नाही ।। तैसैं आत्माविषै चैतन्यके द्रव्यपर्याय अपेक्षा भेद है ।। तौऊ आत्मवस्तु मात्र अनुभव करते विकल्प नाही ।। सो आचार्य कहै हैं ऐसा निर्विकल्प आत्माका अनुभव हमारे प्रकाशरूप है ऐसे जैनीनिके वचन हैं । आगै इसै दृष्टांतकरि स्पष्ट करैं हैं ताकी सूचनिकाकूं नय विभागका काव्य कहै हैं–

विशेष–संस्कृत टीकाकारने भर्तुं न शक्या ऐसा पाठ निश्चितकर आत्मा एक स्वरूप है इसलिये वह सर्वथा कर्ता और भोक्ता नहीं ऐसा अर्थ लिखा है और पं० जयचंदजीने भेत्तुं न शक्या ऐसा पाठ रखकर चैतन्यरूप चिंतामणिकी माला किसीके द्वारा भिद नहिं सकती यह अर्थ किया है यद्यपि भावांशमें दोनों अर्थ अभिन्न हैं परन्तु पाठ जो पं० जयचंद्रजीने रक्खा है वही तात्त्विक प्रतीत होता है ।। १७ ।।

व्यावहारिकदृशैव केवलं कर्तृ कर्म च विभिन्नमिष्यते ।
निश्चयेन यदि वस्तु चिंत्यते कर्तृ कर्म च सदैकमिष्यते १८

सं० टी०—च-पुनः कर्तृ-कारकं, कर्म च-कार्यं, विभिन्नं—परस्परं भिन्नं, इष्यते, कया ? केवलं-परं व्यावहारिकदृशैव—व्यवहारदृष्ट्यैव यथा सुवर्णकारादिः कुंडलादिपरद्रव्यपरिणामात्मकं कर्म करोति तत्फलं च भुंक्ते न तु तन्मयो भवति तथात्मापि पुण्यपापादिकं पुद्गलात्मकं कर्म करोति, तत्फलकुलं च कवलयति न तु तन्मयः मीमांस्यते । यदि–चेत्, निश्चयेन–निश्चयनयेन वस्तुद्रव्यमात्रं केवलं, इष्यते तदासदा–नित्यं, कर्तृ कर्म च आत्मनः कर्तृत्वकर्मत्वयोरैक्यमिष्यते यथा च स नाडिंधमादि चिकीर्षुः, चेष्टारूपमात्मपरिणामात्मकं कर्म करोति आत्मपरिणामात्मकं दुःखलक्षणं चेष्टारूपं कर्मफलं भुंक्ते ततोऽनन्यत्वे सति तन्मयश्च भवति तथात्मापि चिकीर्षुश्चेष्टारूपं स्वपरिणामात्मकं कर्म करोति चेष्टारूपमात्मपरिणामात्मकं दुःखलक्षणं फलं च भुंक्ते ततोऽनन्यत्वे सति तन्मयश्चैव स्यात् ।। १८ ।। अथ वस्त्वंतरप्रवेशं वस्तुनो न निलुंढति पद्यत्रयेण—

अर्थ–व्यवहारकी दृष्टिमैं तो केवल कर्ता अर कर्म भिन्न दिखैं हैं अर जब निश्चयकरि देखिये वस्तूकूं विचारिये तब कर्ता अर कर्म सदाकाल एकही देखिये है ।। भावार्थ–व्यवहार नय तो पर्यायाश्रित है सो यामें तो भेदही दीखे ।। बहुरि शुद्ध निश्चयनय है सो द्रव्याश्रित है तामें अभेदही दीखे तातैं व्यवहारमैं तो कर्ता कर्मका भेद है, निश्चयमैं अभेद है ।। १८ ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ननु परिणाम एव किल कर्म विनिश्चयतः स भवति नापरस्य परिणामिन एव भवेत्। न भवति कर्तृशून्यमिह कर्म न चैकतया स्थितिरिह वस्तुनो भवतु कर्तृ तदेव ततः ॥१८॥

अर्थ—ननु कहिये अहो मुनि हों, तुम यह निश्चय करौ, जो यह प्रगटपणैं परिणाम है, सो तौ निश्चयतैं कर्म है। बहुरि सो परिणाम अपना आश्रय जो परिणामी द्रव्य, ताहीका होय है, अन्यका नाही होय है। जातैं परिणाम हैं ते अपने अपने द्रव्यके आश्रय हैं, अन्यके परिणामका अन्य आश्रय होय नाही॥ बहुरि जो कर्म है, सो कर्ताविना होय नाही। बहुरि वस्तु है सो द्रव्यपर्यायस्वरूप है। तातैं ताकी एक अवस्थारूप कूटस्थस्थिति आदि होय नाही, सर्वथा नित्यपणा बाधासहित है। तातैं अपना परिणामरूप कर्मका आपही कर्ता है, यह निश्चयसिद्धांत है॥ अब इसही अर्थके समर्थनरूप कलश काव्य कहै हैं—

विशेष—इस श्लोककी संस्कृतटीका उपलब्ध न हुई॥

बहिर्लुठति यद्यपि स्फुटदनंतशक्तिः स्वयं
तथाप्यपरवस्तुनो विशति नान्यवस्त्वंतरं।
स्वभावनियतं यतः सकलमेव वस्त्विष्यते
स्वभावचलनाकुलः किमिह मोहितः क्लिश्यते॥ १९॥

सं०टी—यद्यपि स्वयं-स्वभावतः, बहिःबाह्ये, स्फुटेत्यादिः—स्फुटंती-व्यक्ता चासावनंतशक्तिः द्विकवारानंताविभागप्रतिच्छेदश्च लुठति—स्फुटीभवति, यथा सेटिकायाः सेटिकत्वादिः तथापि अन्यवस्त्वंतरं सेटिकादि परवस्तुनो मध्ये न विशति-कुडयादिलक्षणस्य मध्ये न प्रविशति यतः यस्मात् कारणात्, सकलमेव—समस्तमेव वस्तु-चेतनलक्षणं द्रव्यं स्वभावनियतं-स्वस्य भावे स्वस्वरूपे, नियतं—स्थितं जीवस्य ज्ञानात्मकं लक्षणं अजीवस्य अचेतनस्य अचैतन्यं तद्विपरीतं इष्यते--अभिलष्यते अतः इह जगति, मोहितः मोहाक्रांतः पुमान्, किं क्लिश्यते किं वृथाक्लेशं करोति पराभिप्रायपरिवर्तनेन, किंभूतः सन्? स्वेत्यादिः--स्वभावस्य—वस्तुस्वरूपस्य, चलना--चापल्यंकर्तरि कर्मप्रवेशत्वं कर्मणि कर्तृप्रवेशत्वमित्यादिलक्षणं तत्राकुलः—व्याकुलतां गतः सन्, स्वरूपस्य ज्ञानादेः स्वरूपिणि जीवादौ व्यवस्थितत्वात् अन्यथा द्रव्योच्छेदः स्यात्॥ १९॥

अर्थ—यद्यपि वस्तु है सो आप प्रकाशरूप अनंतशक्तिस्वरूप है, तथापि अन्यवस्तु है, सो अन्यवस्तुनिविषैं प्रवेश नाही करे है, बाहरि ही लोटै है। जातैं समस्तही वस्तु अपने अपने स्वभावविषैं नियमरूप है ऐसैं मानिये है॥ सो आचार्य कहै हैं—जो, ऐसे होतेभी यह जीव अपने स्वभावतैं चलायमान होय, आकुल हुवा मोही भया संता, क्यौं क्लेशरूप होय है?॥ भावार्थ—वस्तुस्वभाव तौ नियमरूप ऐसा है, जो, काहू वस्तूने कोई मिलै नाही अर यह प्राणी

१९.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपने स्वभावसूं चलायमान होय व्याकुल क्लेश रूप होय है, सो यह बडा अज्ञान है ॥१९॥

फेरि इसही अर्थकूं दृढ करनेकूं कहै हैं–

वस्तु चैकमिह नान्यवस्तुनो येन तेन खलु वस्तु वस्तु तत् ।
निश्चयोयमपरोऽपरस्य कः किं करोति हि वहिर्लुठन्नपि ॥ २० ॥

स०टी—इह जगति, येन-कारणेन, एकं,चेतनादिलक्षणं, वस्तु द्रव्यं, अन्यवस्तुनः अपरवस्तुनः-चेतनादेः स्वरूपं न भवति खल्विति निश्चितं, तेन वस्तुनः- परवस्तुस्वभावाभावेन कारणेन, अयं प्रसिद्धः,निश्चयः-परमार्थः, अयं कः ? यद्वस्तु स्वगुणपर्यायैर्द्रव्यं तत्स्वगुणपर्यायैरेव वस्तु चेतनादि द्रव्यं नान्यथा परस्वरूपेण वस्तु भवत्यतिप्रसंगात् हीति–तस्मात् कारणात् कः-अपरः, अन्यः पदार्थः सेटकादिर्जीवादिश्च अपदस्य कुड्यादेः कर्मपुद्गलस्य च,किं श्वेतत्वं ज्ञानित्वं च करोति अपि तु न करोतीत्यर्थः । वहिर्वाह्ये,लुठन्नपि भित्त्यादीनां श्वेतत्वं कुर्वन्नपि परस्वरूपेण न भवति अन्यथा स्वद्रव्योच्छेदः, आत्मापि परद्रव्यस्य ज्ञेयस्य ज्ञायकः वहिर्भवन्नपि तत्स्वरूपेण न भवति ॥ २० ॥

अर्थ–जातै या लोकविषैं एक वस्तु है सो अन्यवस्तुका नाही है, तिसही कारणकरि वस्तु है सो वस्तु है, ऐसे न होय तौ वस्तुका वस्तुपणा न ठहरे, निश्चय है । ऐसे होतै अन्यवस्तुके बाहिर लौटे है, तौऊ ताका कहा करे ? किछू भी न करिसकै है ॥ भावार्थ--वस्तुका स्वभाव तौ ऐसा है, जो अन्य कोई वस्तु पलटाय न सकै, तब अन्यके अन्य कहा किया ? किछूभी न किया ॥ जैसे चेतनवस्तुके एकक्षेत्रावगाहरूप पुद्गल तिष्ठै है, तौऊ चेतनका जडकरि आपरूप तौ परिणमाय सक्या नाहीं, तब चेतनका कहा किया ? किछू भी न किया, यह निश्चयनयका मत है ॥ २० ॥ बहुरि निमित्तनैमित्तिकभावकरि अन्यवस्तुके परिणाम होय है, सो भी तिस वस्तुहीका है, अन्यका कहना व्यवहार है, सोही कहै हैं–

यत्तु वस्तु कुरुतेऽन्यवस्तुनः किंचनापि परिणामिनः स्वयं ।
व्यावहारिकदृशैव तन्मतं नान्यदस्ति किमपीह निश्चयात् ॥ २१ ॥

स०टी०—यत्तु तत् मतं कथितं कया व्यावहारिकदृशैव व्यवहारदृष्टयैव न तु परमार्थतः तत् किं ? तुविशेषे यद्वस्तु सेटिकादिः, परिणामिनः परिणमनशीलस्य, अन्यवस्तुनः कुड्यादेः स्वयं स्वभावतः किंचन धवलत्वादिकं कुरुते विदधाति,तथात्मापि परद्रव्यं स्वकेन भावेन ज्ञातापि, जानाति पश्यति विजहाति श्रद्धत्ते चैतत्सर्वं व्यवहारतः इह जगति, निश्चयात् परमार्थतः,किमपि सेटिकादि द्रव्यं चेतनद्रव्यं वा अन्यत् कुड्यादेः श्वेतकत्वं, आत्मनः परद्रव्यज्ञातृत्वं च नास्ति ॥ २१ ॥

अथ द्रव्ये द्रव्यांतरनिषेधं निधत्ते—

अर्थ--जो कोई वस्तु अन्यवस्तूकै किछू करै है ऐसा कहिये है सो वस्तु आप परिणामी है, अवस्थातै अन्य अवस्थारूप होना वस्तूका पर्यायस्वभाव है, याहीतै परिणामी कहिये है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सो ऐसे परिणामी वस्तुकै अन्यके निमित्ततैं परिणाम भया ताकूं कहै, यह अन्यने कीया सो यह व्यवहारनयकी दृष्टिकरि कहिये है ॥ बहुरि निश्चयतै तौ अन्य किछू किया है नाहीं, परिणाम भया सो आपहीका भया,अन्यने तौ तामैं किछूभी ल्याय धरया नाही ऐसे जानना ॥

शुद्धद्रव्यनिरूपणार्पितमतेस्तत्त्वं समुत्पश्यतो
नैकद्रव्यगतं चकास्ति किमपि द्रव्यांतरं जातुचित्।
ज्ञानं ज्ञेयमवैति यत्तु तदयं शुद्धस्वभावोदयः
किं द्रव्यांतरचुंबनाकुलधियस्तत्त्वाच्च्यवते जनाः ॥ २२ ॥

सं० टी--जातुचित्-कदाचित्, किमपि-चेतनमचेतनं वा द्रव्यांतरं, चेतनादचेतनं वस्त्वंतरं, अचेतनाच्चेतनं वा वस्त्वंतरं एकद्रव्यगतं-एकस्मिन् द्रव्ये चेतने चेतनं अचेतनं च अचेतने वा चेतनमचेतनं च गतं-संप्राप्तं, न चकास्ति--न द्योतते, कस्य ? तत्त्वं-वस्तुयाथात्म्यं समुत्पश्यतः-अवलोकयतो मुनेः किंभूतस्य ? शुद्धेत्यादि-शुद्धं द्रव्यं निरुपाधिस्वात्मादि द्रव्यं, तस्य निरूपणे--प्रतिपादने, अर्पिता-आरोपिता, मतिः-बुद्धिः येन तस्य, तु-पुनः, यत्--यस्माद्धेतोः, ज्ञानं ज्ञेयं-पदार्थं, अवैति-जानाति न तु ज्ञेयं स्वस्वरूपेण करोति नत्विदं तत्स्वरूपेण भवति किंतु केवलं परिछिनत्ति तत् तस्मात् कारणात् अयं ज्ञेयपरिच्छेदकत्वलक्षणः शुद्धेत्यादिः--शुद्धः--कर्मोपाधिनिरपेक्षः स्वभावः-स्वरूपं, तस्य उदयः-प्राकट्यं, ततः, जनाः--जिनागमानभिज्ञाः लोकाः, तत्त्वात्--वस्तुयाथात्म्यात् किं च्यवंते-कथं चलंति, कीदृक्षाः संतः ? द्रव्यमित्यादिः--द्रव्यात् द्रव्यांतरे-परद्रव्ये, चुंबनम् आश्लेषणं तेनाकुलाः सेटिकया कथं श्वेतत्वं कुड्यादेः, ज्ञानेन कथं ज्ञेयं ज्ञातमित्यादिरूपा धीः--बुद्धिः येषां ते यथोक्ताः संतः ॥ २२ ॥ अथ स्वभावस्वभाविनोर्भेदं चकास्ति--

अर्थ--आचार्य कहै हैं जो शुद्ध द्रव्यके निरूपणविषैं लगाई है बुद्धि जाने बहुरि तत्त्वकूं अनुभवता है ऐसा पुरुषकै एक द्रव्यविषैं प्राप्त भया अन्य द्रव्य किछूभी न कदाचित् प्रतिभासे है ॥ बहुरि ज्ञान है सो अन्य ज्ञेय पदार्थकूं जाने है सो यह ज्ञानका शुद्ध स्वभावका उदय है, सो यह जन लोक है ते अन्यद्रव्यके ग्रहणविषे आकुल हैं बुद्धि जिनकी ऐसें भये संते शुद्धस्वरूपतै क्यों चिगै है ? भावार्थ-शुद्धनयकी दृष्टिकरि तत्त्वका स्वरूप विचारतै अन्यद्रव्यका अन्यद्रव्यविषैं प्रवेश नाही दीखे है। अर ज्ञानविषैं अन्यद्रव्य प्रतिभासे है सो यह ज्ञानकी स्वच्छताका स्वभाव है। सो ज्ञान तिनिकूं ग्रहण न कीये है ॥ अर यह लोक अन्य द्रव्यका ज्ञानविषैं प्रतिभास देखि अर अपना ज्ञानस्वरूपतै छूटि अर ज्ञेयके ग्रहण करनेकी बुद्धि करै है सो यह अज्ञान है ॥ ताको आचार्यने करुणाकरि कह्या है जे ए लोक तत्त्वतैं क्यों चिगै हैं ॥ २२ ॥ फेरि उसही अर्थकूं दृढ करै हैं--

शुद्धद्रव्यस्वरसभवनात्किं स्वभावस्य शेष--

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मन्यद् द्रव्यं भवति यदि वा तस्य किं स्यात्स्वभावः ।
ज्योत्स्नारूपं स्नपयति भुवं नैव तस्यास्ति भूमि-
र्ज्ञानं ज्ञेयं कलयति सदा ज्ञेयमस्यास्ति नैव । २३ ।

सं० टी०—शुद्धेत्यादिः-शुद्धद्रव्यं—दर्शनज्ञानचारित्रात्मकनिरुपाधिजीवद्रव्यादि, तस्य स्वरसः स्वभावः, तेन भवनात् स्वभावस्य—चैतन्यादिलक्षणस्य स्वरूपस्य, शेषं द्रव्यात्परं अन्यद्रव्यं चेतन वा किं भवति अपि तु परद्रव्यस्य स्वभाविनस्तदन्यद्रव्यस्वभावः स्वरूपं न भवति, परद्रव्यं तस्य स्वभावि न भवतीति तात्पर्यं । यदि वा-अथवा सः स्वभावः चेतनादिलक्षणः तस्य-अचेतनाद्यन्यद्रव्यस्य स्वरूपं किं स्यात् ? अपि तु न स्यादेव । अथ स्वरूपस्वरूपिणोः परस्वरूपस्वरूपिभ्यां संकरव्यतिकरादिदोषापत्तेः न किंचिच्चेतनमचेतनं वा स्यात् । इममेवार्थं दृष्टांतयति-ज्योत्स्नारूपं सेटिकादिद्रव्यस्य श्वेतस्वरूपं भुवं भूतलं स्नपयति-धवलीकरोति, एव निश्चयेन, तथापि भूमिः—विश्वंभरा तस्य-ज्योत्स्नारूपस्य स्वभावो नास्ति तस्य स्वभाविनो ज्योत्स्ना स्वरूपं न, ज्योत्स्नायाः सेटिकास्वभावत्वात् । दृष्टांतेन स्पष्टं दार्ष्टांतं दर्शयति ज्ञानं-स्वपरावभासः ज्ञेयं कर्मतापन्नं परपदार्थं, कलयति—परिच्छिनत्ति—जानाति, सदा-नित्यं, तथापि अस्य ज्ञानस्य ज्ञेयं स्वरूपं नैवास्ति, ज्ञेयस्य स्वरूपस्य ज्ञानं स्वरूपि नैवास्ति तयोः परस्परमत्यंतभेदात् ॥ २३ ॥ अथ ज्ञानस्वभावं वावच्यते—

अर्थ—जिस द्रव्यका जो निजभाव होय सो स्वभाव है । सो आत्माका ज्ञानचेतना स्वभाव है । ताकै शुद्ध द्रव्य जो शुद्ध आत्मा ताका निजरस ज्ञानचेतना है । ताकै होतें ते अन्य वाकी जो द्रव्य हैं सो कहा होय ? किछूभी न होय । परमार्थकरि संबंध नाही ।। अथवा अन्यद्रव्य है ताकै यहू स्वभाव कहा होय ? किछूभी न होय । परमार्थकरि संबंध नाही ।। जैसैं ज्योत्स्ना जो चांदणी ताका रूप पृथ्वीकूं उज्वल करे है, तौ कहा पृथ्वी चांदणीकी होय जाय ? किछूभी न होय । तैसे ज्ञान है सो ज्ञेयपदार्थकूं सदाकाल जानै है, तौ ज्ञेय ज्ञानका किछू कहा होय जाय ? किछूभी नाही है ।। भावार्थ—शुद्धनयकी दृष्टिकरि देखिये तब कोई द्रव्यका स्वभाव काहू अन्यद्रव्यरूप होय नाही । जैसे चांदणी पृथ्वीकूं उज्ज्वल करै है परन्तु चांदणीकी पृथ्वी किछू होय नाही है । तैसे ज्ञान ज्ञेयकूं जानै है परन्तु ज्ञानका ज्ञेय किछू होय नाही आत्माका ज्ञान स्वभाव है सो याकी स्वच्छतामें ज्ञेय स्वयमेव झलकै है । तौऊ ज्ञानमैं तिनि ज्ञेयनिका प्रवेश नाही है ।।२३।। अब कहै हैं, जो ज्ञानमैं रागद्वेषका उदय कहां ताई है ? ताका काव्य—

रागद्वेषद्वयमुदयते तावदेतन्न याव-
ज्ज्ञानं ज्ञानं भवति न पुनर्बोध्यतां याति बोध्ये ।
ज्ञानं ज्ञानं भवतु तदिदं न्यक्कृताज्ञानभावं
भावाभावौ भवति तिरयन् येन पूर्णस्वभावः । २४।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—यावत्पर्यंतं ज्ञानं—बोधः, ज्ञानं-ज्ञायकं स्वपरावभासकं शुद्धं न भवति न जायते, तावत्कालं, एतत्—जगत्प्रसिद्धं, रागद्वेषद्वयं-रागद्वेषयोर्द्वयं उदयते अनुभागरूपेणोदयं धत्ते उदिते ज्ञाने तस्योदयाभावात्, पुनः यावज्ज्ञानं ज्ञानम्—प्राकट्यप्राप्तं न, तावत् बोध्ये—ज्ञेये वहिः पदार्थे बोधतां-ज्ञातृतां न याति—न प्राप्नोति ज्ञाते ज्ञाने स्वपरबोध्यप्रकाशकत्वात्, येन ज्ञानेन कृत्वा आत्मा, पूर्णस्वभावः भवति-जायते। कीदृक्षः सन्? तिरयन् आच्छादयन्, कौ ? भावाभावौ—अस्तिनास्तिस्वभावौ—विभाव-पर्यायौ उत्पादविनाशौ वा, तत् इदं—प्रसिद्धं, ज्ञानं-संसारावस्थासंभवात् रागद्वेषकलमषीकृतं ज्ञानं शुद्धं स्वभावबोधो भवतु—अस्तु, कीदृक्षं ? न्यग्गित्यादिः न्यक्कृतः—तिरस्कृतः, अज्ञानलक्षणो भावः—स्वभावः, येन तत् ॥ २४ ॥ अथ सम्यग्दृष्टेस्तत्क्षयमाशंसति–

अर्थ—यहु ज्ञान जेतैं ज्ञानरूप न होय है, अर बोध्य कहिये ज्ञेय सो ज्ञेयभावकूं प्राप्त न होय है, तेतैं रागद्वेष दोऊ उदय होय हैं। तातैं यह ज्ञान है सो ज्ञानरूप होऊ। कैसा होऊ? दूरि कीया है अज्ञानभाव जानैं ऐसा होऊ॥ तिस कारणकरि भाव अभाव ज्ञानमैं होय है। तिनिकूं दूरी करता संता पूर्णस्वभाव होय। जैते ज्ञान ज्ञान रूप न होय, ज्ञेय ज्ञेयरूप न होय तैतें राग-द्वेष उपजै है। तातैं यह ज्ञान अज्ञानभावकूं दूरि करि ज्ञानरूप होऊ। जिस कारणतैं ज्ञानमैं भाव अभाव ये दोय अवस्था हो तौ मिटि जाय अर ज्ञान पूर्ण स्वभावकूं प्राप्त होय जाय यह प्रार्थना है।

विशेष—संस्कृतटीकाकारने 'बोधतामेति बोध्ये' यह पाठ मानकर जवतक ज्ञान प्रकटित नहि हो जाता तवतक वह स्वपर ज्ञेय पदार्थोंको प्रकाशित नहिं करता किंतु प्रकट होनेपर ही प्रकाशित करता है यह अर्थ किया है और पं० जयचन्द्रजीने 'बोध्यतां याति बोध्यः' यह पाठ मान कर 'जवतक ज्ञेय पदार्थ ज्ञेयरूपसे प्रतिभासित नहिं होता' यह अर्थ किया है ॥ २४ ॥

रागद्वेषाविह हि भवति ज्ञानमज्ञानभावात्
तौ वस्तुत्वप्रणिहितदृशा दृश्यमानौ न किंचित्।
सम्यग्दृष्टिः क्षपयतु ततस्तत्त्वदृष्टया स्फुटं तौ
ज्ञानज्योतिर्ज्वलति सहजं येन पूर्णाचलार्चिः ॥ २५ ॥

सं०टी०—हि-स्फुटं, ज्ञानं—बोधः, इह-जगति, रागद्वेषस्वभावौ भवति-जायते कुतः? अज्ञानभावात्-अज्ञानमयस्वभावत्वात्। ननु कथं ज्ञानं रागद्वेषौ भवति? ज्ञानस्य ज्ञानावरणकर्मणः क्षयोपशमात् तयो-र्मोहनीयकर्मविवर्तत्वात्। कथं ज्ञाने रागद्वेषसद्भाव इति चेत् सत्यं रागद्वेषयोर्भावकर्मणोश्चैतन्यविवर्त-त्वात् ज्ञानस्वभावत्वं तथाग्रे समर्थयिष्यमाणत्वात् तदप्यभ्यधायि श्रीमद्विद्यानन्दिसूरिणा–

भावकर्माणि चैतन्यविवर्तात्मानि भांति नुः। क्रोधादीनि स्ववेद्यानि कथंचिच्चिदभेदतः॥ ११४ ॥ इति। तौ रागद्वेषौ दृश्यमानौ-अंतर्दृष्ट्यावलोक्यमानौ संतौ न किंचित् न किमपि ज्ञानिना दृश्येते, कया? वस्त्वित्यादिः-वस्तुत्वे चैतन्यलक्षणे वस्तुस्वरूपे, प्रणिहितदृशा-समारोपितदृष्ट्या ततः अंतर्दृष्ट्याऽदृश्यमा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नस्मात् स्फुटं-निश्चितं, सम्यग्दृष्टिः तत्त्वदर्शीपुमान् तौ-रागद्वेषौ, क्षपयतु-निर्जरादिभिर्निराकरोतु तत्त्वदृष्ट्या-वस्तुयाथात्म्यदर्शनेन, येन-रागद्वेषक्षपणेन, सहजं-स्वाभाविकं ज्ञानज्योतिः-ज्ञानविभागप्रतिच्छेदसमूहं धाम, ज्वलति प्रकाशते । किंभूतं तत् ? पूर्णाचलार्चिः पूर्णं निरावरणत्वात्संपूर्णं, अचलं अक्षोभं, प्रतिपक्षकर्माभावात् अर्चिः-ज्ञानशक्तिः, यस्य तत् 'स्त्री नपुंसकयोरर्चिः' इति भट्टिः ॥ २५ ॥ अथ रागद्वेषोत्पादककारणं संगच्छते—

अर्थ—इस आत्माविषै ज्ञान है सोही अज्ञानभावतैं रागद्वेषरूप परिणमै है । बहुरि ते रागादिक वस्तुपणाविषै स्थायिदृष्टिकरि देखे हुये किछू भी नाही हैं, द्रव्यरूप न्यारे वस्तु नाही हैं तातैं आचार्य प्रेरणा करै हैं, जो सम्यग्दृष्टि पुरुष हैं सो तत्त्वदृष्टिकरि तिनिकूं प्रगट देखि अर दोऊ नाश करो । ज्यौं स्वाभाविक ज्ञानज्योति पूर्ण है प्रकाशरूप अचल दीप्ति जाकी ऐसी देदीप्यमान प्रकाशै ॥ भावार्थ—रागद्वेष न्याराही तो द्रव्य नाही । जीवके अज्ञानभावतैं होय है । तातैं सम्यग्दृष्टि होय तत्त्वदृष्टिकरि देखिये, किछूभी वस्तु नाही ऐसैं देखे घातकर्मका नाश होय केवलज्ञान उपजै है ॥२५॥ आगैं कहै हैं जो, अन्यद्रव्यकरि अन्यद्रव्यके गुण नाही उपजाइये है, ताकी सूचनिकाका काव्य है—

रागद्वेषोत्पादकं तत्त्वदृष्ट्या नान्यद् द्रव्यं वीक्ष्यते किंचनापि ।
सर्वद्रव्योत्पत्तिरंतश्चकास्ति व्यक्तात्यंतं स्वस्वभावेन यस्मात् ॥ २६ ॥

सं०टी०—रागद्वेषोत्पादकं-रागद्वेषयोरुत्पादकं कारणं, अन्यद्रव्यं-आत्मद्रव्यं विहाय परद्रव्यमचेतनादि न वीक्ष्यते-नावलोक्यते, कया-तत्त्वदृष्ट्या-वस्तुयाथात्म्यदर्शनेन, कुतः ? यस्मात्कारणात् सर्वेत्यादिः-सर्वेषां द्रव्याणां-चेतनानां, उत्पत्तिः-उत्पादः अन्तः-अभ्यंतरे, स्वस्वभावेन स्वस्वरूपेण, अत्यंतं-निश्चितं व्यक्ता स्फुटा, चकास्ति--द्योतते । ननु सर्वद्रव्याणां नित्यत्वात् कथमुत्पत्तिः अन्यथा सौगतमतस्यागतिः ? इति चेन्न स्वस्वभावेनेति वचनात् स्वपरिणामेन स्वपर्यायेणैवोत्पत्तिर्न तु द्रव्यरूपेण यथा मृत्तिका कुंभभावेनोत्पद्यमाना किं मृत्स्वरूपेण ? यदि प्राक्तनः पक्षः तदा कुंभकाराहंकारनिर्भरपुरुषाधिष्ठितप्रसारितकरतच्छरीराकारः कुंभः स्यात्, न च तथाऽस्ति अत एवोत्तरः पक्षः श्रेयान् मृदेव कुंभस्योत्पादिका न तु कुंभकारः । तथा रागद्वेषौ पुद्गलस्वभावेनानुत्पद्यमानौ केवलमात्मनः स्वभावौ अन्योऽन्यस्योत्पादकत्वे तत्त्वव्यवस्थानाभावात् सर्वोच्छेदः स्यात् ॥ २६ ॥ अथ तद्धेतुत्वमात्मनः संगिरते—

अर्थ—रागद्वेषका उपजानेवाला तत्त्वदृष्टिकरि देखिये तब अन्यद्रव्य किछूभी नाही देखिये है ॥ चेतनहीके परिणाम हैं । जातैं यह न्याय है-जो सर्व द्रव्यनिकी उत्पत्ति है सो अपनेही निज स्वभावविषैं अंतरंगविषैं अत्यंत प्रगटरूप शोभै है । अन्यद्रव्यविषैं अन्यके गुणपर्यायनिकी उत्पत्ति नाही है ॥

यदिह भवति रागद्वेषदोषप्रसूतिः कतरदपि परेषां दूषणं नास्ति तत्र ।
स्वयमयमपराधी तत्र सर्पत्यबोधो भवतु विदितमस्तं यात्वबोधोऽस्मि बोधः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—यत्-यस्मात्कारणात्, इह-आत्मनि रागेत्यादिः-रागश्च द्वेषश्च रागद्वेषौ तावेव दोषौ स्वस्वरूपाच्छादकत्वात् तयोः प्रसूतिः-उत्पत्तिः स्यात् तत्र तथा सति परेषां अचेतनद्रव्याणां, कतरदपि किमपि, दूषणं-दोषः, नास्ति अचेतनद्रव्यस्य तदुत्पादकत्वाभावात् न तस्य दूषणं केवलमात्मनो दूषणं। तत्र-रागद्वेषे, आत्मनि सर्पति-व्याप्नुवति सति आत्मा स्वयं-स्वरूपेण, अपराधी दोषवान् भवतु-अस्तु किंभूतः सः ? अबोधः बोधरहितः सन् विदितं मया ज्ञातं अयं अबोधः—अज्ञानं, अस्तं-विनाशं, यातु प्राप्नोतु पुनः बोधः-अहं ज्ञानं, अस्मि-भवामि ॥ २७ ॥ अथान्यनिमित्तत्वं तयोस्तीर्यते—

अर्थ—जो इस आत्माविषैं रागद्वेष दोषोंकी उत्पत्ति है तहां परद्रव्यकूं किछूभी दूषण नाही है। तिस आत्माविषैं यह अज्ञान आप अपराधी फैलै है। यह कथन प्रगट होऊ,अर यह अज्ञान है सो अस्त होऊ। जातैं मै तो ज्ञानस्वरूप हों, ऐसैं मानना सम्यग्ज्ञान है ॥ भावार्थ—अज्ञानी जीव रागद्वेषकी उत्पत्ति परद्रव्यतैं मानि परद्रव्यतै कोप करै है। जो मेरे परद्रव्य रागद्वेष उपजावै है। ताकूं दूर करूं ताकूं समझानेकूं कहै हैं—जो रागद्वेषकी उत्पत्ति अज्ञानतैं आपही-केविषै होय है ते आपहीके अशुद्ध परिणाम हैं ॥ सो यह अज्ञान नाशकूं प्राप्त होऊ अर सम्यग्ज्ञान प्रगट होऊ, आत्मा ज्ञानस्वरूप है ऐसा अनुभव करौ। रागद्वेषके उपजनेमैं परद्रव्यकूं उपजावनहारा मानि तिसपरि कोप मति करौ। ऐसा उपदेश है ॥२७॥ अब इसही अर्थकूं दृढ करनेकूं अर अगिले कथनकी सूचनिकारूप काव्य कहै है—

रागजन्मनि निमित्ततां परद्रव्यमेव कलयंति ये तु ते।
उत्तरंति न हि मोहवाहिनीं शुद्धबोधविधुरांधबुद्धयः ॥ २८ ॥

सं० टी०—ये-वस्तुस्वरूपानभिज्ञपक्षाः सांख्याः, रागजन्मनि-रागद्वेषोत्पत्तौ, परद्रव्यमेव-आत्मान्यद्रव्यं रागोत्पत्तौ मणिकनककामिनीप्रमुखं, द्वेषोत्पत्तौ-विषविपक्षकर्कशकंटकादिद्रव्यं, एव निश्चयेन, निमित्ततां-हेतुतां, कलयंति-प्रतिपादयंति कलि बलि कामधेनुः इति कामधेनावुक्तत्वात्कलेः प्रतिपादनार्थः। तु पुनः, ते जडधियः हि-निश्चितं, मोहवाहिनीं-महामोहनिम्नगां, नोत्तरंति-उत्तर्तुं न शक्नुवंति स्वरूपानभिज्ञत्वात्, कीदृक्षाः संतः ? शुद्धेत्यादिः-शुद्धबोधेन—कर्ममलकलंकरहितेन ज्ञानेन, विधुरा रहिता अंधा, स्वरूपदर्शनाभावात् बुद्धिर्मतिः येषां ते, तत्कथं न कारणं ? तथाहि-यद्धि यत्र भवति तद्घातेन तद्धन्यते एव यथा प्रदीपघाते प्रकाशो हन्यते, न हन्यते च स्त्र्यादीनां विनाशे रागादिः तस्मात्तथा न, तथा च यत्र हि यद्भवति तत्तद्घाते हन्यते एव यथा प्रकाशघाते प्रदीपो हन्यते एव, न हन्यते च रागादीनां विनाशे कमनीयकामिन्यादिः तस्मान्न तत्तथा, यत्तु न यत्र भवति तत्तद्घाते न हन्यते यथा घटघाते घटप्रदीपो न हन्यते, न हन्यते स्त्रीघाते रागादिः, यत्र हि यन्न भवति तत्तद्घाते न हन्यते यथा घटप्रदीपघाते घटो न हन्यते, न रागादिघाते च स्त्र्यादिर्हन्यते तस्मान्न तत्तथेति ॥ २८ ॥ अथ बोधाबोधयोरन्यत्वमुन्नीयते—

अर्थ—जे पुरुष रागकी उत्पत्तिविषैं परद्रव्यहीका निमित्तपणा मानै हैं, अपना किछूभी हेतु न मानै हैं, ते मोहरूप नदीके पार नाही उतरै हैं ॥ जातैं शुद्धनयका विषयभूत जो आत्मा का स्वरूप ताका ज्ञानकरि रहित अंध है बुद्धि जिनिकी ते ऐसे हैं ॥ भावार्थ—शुद्धनयका विषय आत्मा अनंतशक्तिकूं लीये चैतन्यचमत्कारमात्र नित्य अभेद एक है। तामैं यह स्वच्छता है,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो जैसा निमित्त मिलै तैसे आप परिणमै है ॥ ऐसा नाही, जो पैला परिणमावै तैसे परिणमै है अपना किछू पुरुषार्थ नाही है सो ऐसे आत्माका स्वरूपका जिनिकूं ज्ञान नाही है, ते ऐसे मानै है, जो आत्माकूं परद्रव्य परिणमावै है । ऐसे माननेवाले मोहकी वाहिनी जो सेना, अथवा नदी, रागद्वेषादि परिणाम तिनितै पार नाही हो हैं । तिनिके रागद्वेष नाही मिटै हैं । जातैं अपना पुरुषार्थ तिनिकै होनमै होय तौ तिनिके मेटनेमेंभी होय । अर परहीके कीये होय तौ पैला कीयाही करै । अपना मेटना काहेका ? तातै अपना कीया होय अपना मेटचा मिटै, ऐसैं कथंचित् मानना सम्यग्ज्ञान है ॥२८॥

विशेष—राग आदिकी उत्पत्तिमें परद्रव्य कारण नहीं इस सिद्धांतको दृढ़रूपसे मंडन करनेकेलिये संस्कृत टीकाकारने ये व्याप्तियां बतलाई हैं—जो जहां रहता है उसके (आधारके) नाश होनेसे उसका [आधेयका] नाश हो जाता है जिसप्रकार प्रदीपके नाश होनेपर प्रकाश नहिं रहता । परन्तु स्त्री आदिके नाश होनेपर राग आदिका नाश नहिं होता । तथा जहां जो होता है वह उसके नष्ट होनेपर नष्ट होजाता है जिसप्रकार प्रकाश के नाश होजानेपर प्रदीप । परन्तु राग आदिके नष्ट होजानेपर स्त्री आदिका नाश नहिं होता इसलिये स्त्री आदि राग आदिकी उत्पत्तिमें कारण नहीं । जो जहांपर नही होता वह उसके नष्ट होनेपर नष्ट नहिं होता जिसप्रकार घटके नाश होजानेपर उसके भीतर रक्खा हुआ दीपक नष्ट नहिं होता उसीप्रकार स्त्रीके नष्ट होजानेसे राग आदिका भी नाश नहिं होता जहां जो नहि होता उसके नाशसे उसका भी नाश नहि होता जिसप्रकार दीपकके नष्ट होनेतर घटका नाश नहि होता उसीप्रकार राग आदिके नाश होनेसे स्त्री आदिका भी नाश नहि होता इसरीतिसे राग आदिकी उत्पत्तिमें आत्मासे भिन्न परद्रव्य ही कारण है सांख्यका यह सिद्धांत मिथ्या हूआ ॥ २८ ॥

पूर्णैकाच्युतशुद्धबोधमहिमा बोधो न बोध्यादयं
यायात्कामपि विक्रियां तत इतो दीपः प्रकाश्यादिव ।
तद्वस्तुस्थितिबोधबंध्यधिषणा एते किमज्ञानिनो
रागद्वेषमया भवंति सहजां मुञ्चंत्युदासीनतां ॥ २९ ॥

सं० टी०—इव—यथा, इतः—अस्मात्, प्रकाश्यात्—प्रकाशयितुं योग्यात् घटपटादेः दीपः—कज्जलध्वजः, कामपि विक्रियां न याति देवदत्तो हि यज्ञदत्तमिव हस्ते गृहीत्वा मां प्रकाशयेति घटपटादिः स्वप्रकाशने दर्शोयन्नं न प्रयोजयति प्रदीपोऽपि न चायः कांतोपलाकृष्टायः—सूचीवत् स्वस्थानात्प्रच्युत्य तं प्रकाशयितुमायाति वस्तुस्वभावस्य परेणोत्पादयितुमशक्यत्वात् परमुत्पादयितुमशक्यत्वाच्च तदसन्निधाने तत्संनिधाने च स्वरूपेणैव स प्रकाशते । तथा अयं बोधः—ज्ञानं, ततः—तस्मात् बहिरर्थात् शब्दरूपगंधरसस्पर्शगुणद्रव्यादेः, बोध्यात्—बोद्धुं—ज्ञातुं योग्यात् कामपि विक्रियां देवदत्तो यज्ञदत्तमिव करे गृहीत्वा मां शृणु मां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मां पश्ये त्यादिभिः स्वज्ञाने नात्मानं प्रेरयति न चात्माप्ययः सूचीवत् स्वस्थानात् तान् ज्ञातुमायाति किं तु स्वभावत एव जानाति इति विक्रियां न यायात्-न गच्छेत्। कीदृशो बोधः ? पूर्णेत्यादिः-पूर्णः स्वगुण-पर्यायैः संपूर्णः एकः अच्युतः-अक्षोभ्यः, शुद्धः-कर्ममलरहितः स चासौ बोधश्च तस्य तेन वा महिमा माहात्म्यं यस्य सः ततः-तस्मात् एते-प्रसिद्धा बौद्धा ज्ञानेन तदाकार-तदुत्पत्ति-तदध्यवसायवादिनः अज्ञा-निनः किं-किमु रागद्वेषमया भवंति, कीदृशाः ? वस्त्वित्यादिः-वस्तुनः-स्थितिः-नयोपनयैकांतसमुच्चयरूपा तस्या बोधेन वंध्या-रहिता धिषणा मतिर्येषां ते, पुनः सहजां-स्वभावजां उदासीनतां—रागद्वेषभावल-क्षणां माध्यस्थ्यं कथं मुंचन्ति ॥ २९ ॥ अथ निश्चयप्रतिक्रमणप्रत्याख्यानालोचनाचारित्रं विदति—

अर्थ--यह बोद्धा कहिये ज्ञानी है सो पूर्ण अर एक जो च्युत नाही होय अर शुद्ध-विकारतैं रहित ऐसा जो ज्ञान तिसस्वरूप है महिमा जाकी ऐसा है। सो ऐसा ज्ञानी बोध्य कहिये ज्ञेयपदार्थ तिनितैं किछूभी विक्रियाकूं नाही प्राप्त होय है ॥ जैसे दीपक है सो प्रकाशनेयोग्य घटपट आदि पदार्थ हैं तिनितैं विक्रियाकूं प्राप्त नाही होय है तैसे ॥ सो ऐसे वस्तूकी मर्यादा का ज्ञानकरि रहित है धिषणा कहिये बुद्धि जिनकी ऐसे भये संते ए अज्ञानी जीव अपनी स्वा-भाविक उदासीनताकूं क्यौं छोड़ै हैं ? रागद्वेषमय क्यों होय हैं ? ऐसा आचार्यने शोच किया है ॥ भावार्थ—ज्ञानका स्वभाव ज्ञेयकूं जाननेहीका है। जैसा दीपकका स्वभाव घटपट आदिकूं प्रकाशनेका है। यह वस्तुस्वभाव है। ज्ञेयकूं जाननेमात्रतैं ज्ञानमें विकार नाही होय है। अर ज्ञेयकूं जानिकरि भला बुरा मानि आत्मा रागी द्वेषी विकारी होय है। सो यह अज्ञान है। सो आचार्य शोच किया है-जो वस्तूका स्वभाव तो ऐसे, अर यह आत्मा अज्ञानी होयकरि रागद्वेषरूप क्यौं परिणमै है ? अपनी स्वाभाविक उदासीनता अवस्थारूप क्यों रहै नाही। सो यह शोच आचार्यका शोच युक्त है, जातैं जेतैं शुभ राग हैं तेतैं प्राणीनिकूं अज्ञानतैं दुःखी देखि करुणा उपजै तब शोच होय है ॥२९॥ अब अगिले कथनकी सूचनिकारूप काव्य कहै हैं-

रागद्वेषविभावमुक्तमहसो नित्यं स्वभावस्पृशः
पूर्वागामिसमस्तकर्मविकला भिन्नास्तदात्वोदयात्।
दूरारूढचरित्रवैभवबलां चंचच्चिदर्चिर्मयीं
विंदंति स्वरसाभिषिक्तभुवनां ज्ञानस्य संचेतनां ॥ ३० ॥

सं० टी०—रागेत्यादिः-रागद्वेषौ तौ च तौ विभावौ च विभावपर्यायौ ताभ्यां मुक्तं महो येषां ते पुरुषाः, ज्ञानस्य संचेतनां-सम्यग्ज्ञायकत्वं, विंदन्ति-लभंते, कीदृशां तां ? चंचदित्यादिः-चंचत्-देदीप्य-माना चित्-दर्शनज्ञानं, सैवार्चिः—प्रकाशः—तेन निर्वृतां स्वेत्यादिः—स्वस्य रसेन-स्वभावेन, अभिषिक्त सिंचितं, लक्षणया ज्ञातं, भुवनं-त्रैलोक्यं यया तां, कीदृशास्ते ? नित्यं—अवच्छिन्नतया निरंतरं, स्वभाव-स्पृशः-स्वभावं-चैतन्यस्वरूपं, नित्यस्वभावमिति पाठः नित्यश्चासौ स्वभावश्च शुद्धज्ञानस्वभावः तं स्पृशंति ध्यानविषयीकुर्वंति इति पूर्वेत्यादिः—पूर्वसमस्तकर्मभिर्विकलाः यत्पूर्वकृतं शुभाशुभं कर्म तस्मान्निवर्तय-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यात्मानं तु यः स प्रतिक्रमणं, भविष्यत्समस्तकर्मविकलाः शुद्धविष्यच्छुभाशुभं कर्म तस्मान्निवर्तते य आत्मानं स प्रत्याख्यानं, अनेनात्मनः प्रतिक्रमणप्रत्याख्याने निगदिते, तदात्वोदयात्—तदात्तनोदीर्णकर्मणः, भिन्नाः अनेनालोचनमुक्तं यच्छुभाशुभं कर्मोदीर्णं संप्रति चानेकविस्तरविशेषं यश्च नित्यमालोचयति स खल्वालोचना चेतयतेति। कुतः लभंते तां ? दूरेत्यादिः—दूरारूढं नित्यं प्रत्याख्यानप्रतिक्रमणालोचना-त्स्वभावात् दूरं—अतिशयेन, आरुढं-संप्राप्तं, चरित्रं तत्त्रितयलक्षणं तस्य वैभवं-माहात्म्यं, तस्य बलात् सामर्थ्यात्, इति स्वरूपं चारित्रं निगदितं ॥ ३० ॥ अथ ज्ञानसंचेतनां चेतयते—

अर्थ—ज्ञानी हैं ते कैसे हैं ? रागद्वेष जे विभाव तिनिकर रहित है मह कहिये तेज जिनिका वहुरि कैसे हैं ? नित्यही अपना चैतन्यचमत्कारमात्रस्वभाव है ताकूं स्पर्शनेवाले हैं। बहुरि कैसे हैं ? पूर्व क्रिये जे समस्त कर्म अर आगामी होंयगे जे समस्त कर्म तिनितैं रहित हैं। बहुरि कैसे हैं ? तदात्व कहिये वर्तमानकालमें आवै जो कर्मका उदय तातैं भिन्न हैं। ऐसैं ज्ञानी हैं ते अतिशयकरि अंगीकार किया जो चारित्र ताका जो विभव समस्तपरद्रव्यका त्याग ताके बलतैं ज्ञानकी सम्यक्प्रकार चेतना ताकूं अनुभवै हैं। कैसी है ज्ञानचेतना ? चञ्चत् कहिये चिमकती जागतीं जो चैतन्यरूप ज्योति तिसमयी है बहुरि कैसी है ? अपना ज्ञानरूप रस ताकरि सिंच्या हैं भुवन कहिये तीन लोक जीहि ॥ भावार्थ—जिनिका रागद्वेष गया अर अपने चैतन्यस्वभावका अंगीकार भया अर अतीत अनागत वर्तमान कर्मका ममत्व गया ऐसे ज्ञानी सर्व परद्रव्यतैं न्यारे होय चारित्रकूं अंगीकार करै हैं। ताके बलतैं कर्मचेतना अर कर्मफल-चेतनातैं न्यारी जो अपनी चैतन्यके परिणामस्वरूप ज्ञानचेतना ताकूं अनुभवन करे हैं॥ इहां तात्पर्य यह जानना—जो पहलैं तौ कर्मचेतना अर कर्मफल चेतनातैं भिन्न अपनी ज्ञानचेतनाका स्वरूप आगम अनुमान स्वसंवेदन-प्रमाणतैं जानैं अर ताका श्रद्धान-प्रतीति दृढ करै, सो यह तौ अविरत देशविरत प्रमत्त अवस्थामैं भी होय है। बहुरि जब अप्रमत्त अवस्था होय है, तब अपना स्वरूपहीका ध्यान करै है। तब ज्ञानचेतनाका जैसा श्रद्धान किया तिसविषै लीन होय है तब श्रेणी चढि केवलज्ञान उपजाय साक्षात् ज्ञानचेतना होय है। ऐसैं जानना॥

ज्ञानस्य संचेतनयैव नित्यं प्रकाशते ज्ञानमतीव शुद्धं।
अज्ञानसंचेतनया तु धावन् बोधस्य शुद्धिं निरुणद्धि बंधः ३१

स० टी—ज्ञानस्य-आत्मनः, गुणे गुणिन उपचारः संचेतनया—सम्यग्ध्यानेन, एव निश्चयेन, ज्ञानं बोधः नित्यं—निरंतरं, प्रकाशते-चकास्ति, किं ? अतीव शुद्धं-अत्यंतं निरावरणं, तु-पुनः अज्ञानसंचेत-नया ज्ञानादन्यत्र इदमहमिति चेतनं अज्ञानचेतना सा द्विधा-कर्मचेतना कर्मफल चेतना च। तत्र ज्ञानादन्यत्र इदमहं करोमीति चेतनमाद्या, वेदयेहं ततोऽन्यत्रेदमिति चेतनं द्वितीया। तया बंधः—अष्टविधकर्मणां बंधः धावन्—आस्कंदन् सन् बोधस्य ज्ञानस्य शुद्धिं निरुणद्धि-आच्छादयति अतो मोक्षार्थिना सा हेया ३१ अथ नैष्कर्म्यमवलंबते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–ज्ञानकी संचेतनाकरि ही ज्ञान है सो अत्यंत शुद्ध निरन्तर प्रकाशै है। बहुरि अज्ञानकी चेतनाकरि बंध है सो दोडता संता ज्ञानकी शुद्धताकूं रोकै है, न होने दे है॥ भावार्थ--संचेतना कहिये जो जहां जिसतैं एकाग्र होय तिसही ओर अनुभवनरूप स्वाद लीया करै सो तिस स्वरूप चेतना कहिये। सो जब ज्ञानहीतैं एकाग्र उपयुक्त होय तिसही ओर चेत राखै सो तौ ज्ञानचेतना है। सो यातें तौ ज्ञान अत्यंत शुद्ध होय प्रकाशै है, केवलज्ञान उपजि आवै है तब संपूर्ण ज्ञानचेतना नाम पावै॥ बहुरि अज्ञान जो कर्म अर कर्मका फलरूप उपयोगकूं करना सो तिसही ओर एकाग्र हो अनुभव करना सो अज्ञानचेतना है। सो यातैं कर्मका बंध होय है सो ज्ञानकी शुद्धताकूं रोकै है। ३१॥

कृतकारितानुमननैस्त्रिकालविषयं मनोवचनकायैः।
परिहृत्य कर्म सर्वं परमं नैष्कर्म्यमवलंबे॥ ३२॥

सं० टी०—परमं-उत्कृष्टतमं, नैष्कर्म्यं-कर्मस्वभावातिक्रांतं स्वं अवलंबे-अहमवलंबयामि। किंकृत्वा? त्रिकालविषयं-अतीतानागतवर्तमानविषयं सर्वं कर्म, कृतकारितानुमननैः-कृतं स्वयं, कारितं परैः, अनुमनितं-परकृतानुमोदितं मनोवचनकायैः परिहृत्य निराकृत्य मनोवचनकायैः कृतकारितानुमननैः यदतीतकर्मनिराकरणं तत्प्रतिक्रमणं, यत्तैस्तैर्वर्तमानकर्मनिराकरणमालोचना, यद्भविष्यत्कर्म तैस्तैर्निराकरणं, तत्प्रत्याख्यानं, तदक्षसंचारिणा नीयते 'पढमक्खो अंतगतो आदिगदो संकमेदि विदियक्खो' इति सूत्रेण, तथाहि-यन्मनसा कृतं दुष्कृतं मे मिथ्येति, यन्मनसा कारितं मिथ्या मे दुष्कृतमिति, यन्मनसानुमनितं मिथ्या मे दुष्कृतमिति यन्मनसा कृतं कारितं मिथ्या मे दुष्कृतं इति एकसंयोगद्विसंयोगत्रिसंयोगोत्पन्न भेदा एकान्नपंचाशत्प्रतिक्रमणभेदा जायंते॥ ३२॥ अथ स्वस्वरूपप्रतिक्रमणं चंक्रम्यते–

अर्थ–अतीत अनागत वर्तमानकालसंबंधी सर्वही कर्म हैं ताहि कृत, कारित, अनुमोदना अर मनवचनकायकरि परिहारकरि छोडिकरि उत्कृष्ट निष्कर्म अवस्था है, ताही मैं अवलंबन करौ हौं। ऐसैं सर्व कर्मका त्याग करनेवाला ज्ञानी प्रतिज्ञा करै है॥ अब सर्वकर्मका त्याग करनेका कृत कारित अनुमोदना मनवचनकायकरि गुणचास भंग होय हैं। तहां अतीतकालसंबंधी कर्मके त्याग करनेकूं प्रतिक्रमण कहिये॥३२॥

मोहाद्यदहमकार्षं समस्तमपि कर्म तत्प्रतिक्रम्य।
आत्मनि चैतन्यात्मनि निष्कर्मणि नित्यमात्मना वर्ते॥ ३३॥

सं० टी०—आत्मनि—चिद्रूपे, आत्मना-ज्ञानेन कृत्वा, नित्यं वर्ते-सततमहं प्रवर्तयामि कीदृशे? चैतन्यात्मनि-चेतनास्वरूपे, पुनः कीदृशे? निष्कर्मणि—कर्ममलातीते, किंकृत्वा? तत-पूर्वनिबद्धं समस्तमपि कर्म प्रतिक्रम्य—निराकृत्य, तत्किं? यत्—कर्म, अहं अहकं, मोहात्-भ्रांतिविजृंभणात्, अकार्षं कृतवान् यदहमचीकरं यदहं कुर्वंतमप्यन्यं समन्वज्ञासं मनसा वचसा वपुषा च एतत्स्वस्वरूपप्रतिक्रमणं॥ ३३॥ इति प्रतिक्रमणकल्पः समाप्तः। अथालोचनामालोचयति–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—जो मैं मोहतैं अज्ञानतैं, अतीतकालविषैं कर्म कीये, तिनि समस्तहीकूं प्रतिक्रमण-रूपकरि अर समस्त कर्मतैं रहित चैतन्यस्वरूप जो आत्मा ताविषैं आपहीकरि निरंतर वर्तौं हौं। ऐसैं ज्ञानी अनुभव करै ॥ भावार्थ—अतीतकालमैं किये कर्मका गुणचास भंगरूप मिथ्या-कार प्रतिक्रमणकरि ज्ञानी ज्ञानस्वरूप आत्माविषैं लीन होय निरंतर अनुभव करे। ताका यह विधान है ॥ मिथ्या कहनेका प्रयोजन यहु जो, जैसे कोई पहलैं धन कमाय घरमैं धरचा था, पीछे तासूं ममत्व छोडया। तब ताका भोगनेका अभिप्राय नाही। कमाया था जैसा न कमाया तैसैं कर्म बांध्या था, ताकूं अहित जानि ममत्व छोड्या। ताका फलमें लीन न होयगा, तब बांध्या मिथ्या ही है। ऐसा जानना ॥ ऐसा प्रतिक्रमणकल्प है ॥ ३३ ॥ अब आलोचनाकल्प है—

मोहविलासविजृम्भितमिदमुदयत्कर्म सकलमालोच्य ।
आत्मनि चैतन्यात्मनि निष्कर्मणि नित्यमात्मना वर्ते ॥ ३४ ॥

सं०टी०—आत्मनि आत्मना नित्यं वर्ते चैतन्यात्मनि निष्कर्मणि च, किंकृत्वा ? इदं—प्रसिद्धं, सकलं—समस्तं, उदयत्—उदयनिषेकावस्थापन्नं कर्म ज्ञानावरणादि, आलोच्य—सम्यग्विवेच्य, किंभूतं ? मोहेत्यादिः—मोहस्य—रागद्वेषरूपस्य, विलासः-विलासनं तेन विजृंभितं—निष्पादितं, अत्राप्यद्दसंचारः—करोमि कारयामि समनुजानामि, मनसा वचसा कायेन। मनसा कर्म न करोमि, मनसा न कारयामि, मनसा कुर्वंतमप्यन्यं न समनुजानामि, मनसा न करोमि न कारयामि, मनसा न करोमि कुर्वंतमप्यन्यं न समनुजानामि एवमेक-द्वित्रिसंयोगेन आलोचनभेदा एकान्नपंचाशत् संबोभुवन्ति ॥ ३४ ॥ इत्यालोचनाकल्पः समाप्तः ॥ अथ स्वप्रत्याख्यानमाख्याप्यते·

अर्थ—निश्चयचारित्रकूं अंगीकार करनेवाला कहै है—जो, मोहके विलासकरि फैल्या यह उदयकूं प्राप्त होता जो वर्तमान कर्म ताकूं समस्तकूं आलोचनामें लेकरि समस्तकर्मसूं रहित चैतन्यस्वरूप जो आत्मा ताविषैं मैं आपहीकरि निरंतर वर्तों हौं ॥ भावार्थ—वर्तमानकालमैं कर्मका उदय आवै, ताकूं ज्ञानी ऐसे विचारै है—जो, पूर्वे बांध्या था ताका यह कार्य है। मेरा तौ यह कार्य नाही। मैं याका कर्ता नाही। मैं तो शुद्ध चैतन्यमात्र आत्मा हौं। ताकी दर्शनरूप प्रवृत्ति है। ताकरि या उदय भये कर्मका देखने जाननेवाला हौं। मेरा स्वरूपहीमें मैं वर्तों हौं। ऐसा अनुभवन करना ही निश्चयचारित्र है ॥ ऐसैं आलोचनाकल्प समाप्त कीया ॥३४॥ आगैं प्रत्याख्यानकल्प कहै हैं—

प्रत्याख्याय भविष्यत्कर्म समस्तं निरस्तसंमोहः ।
आत्मनि चैतन्यात्मनि निष्कर्मणि नित्यमात्मना वर्त्ते ॥३५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं०टी—चैतन्यात्मनि निष्कर्मणि आत्मनि, नित्यं, आत्मना कृत्वा वर्ते ध्यानरूपेणाहं । कीदृशोहं ? निरस्तसंमोहः दूरीकृतरागद्वेषः । किं विधाय ? समस्तं भविष्यत्कर्म प्रत्याख्याय निराकृत्य—करिष्यत् करिष्यमाणं समनुज्ञास्यन्मनोवचनकायैः निरुध्य, इति प्रत्याख्यानं समाप्तं,तथा चात्रसंचारोऽत्र—करिष्यामि कारयिष्यामि समनुज्ञास्यामि मनसा वचसा कायेन । मनसा कर्म न करिष्यामि, मनसा न कारयिष्यामि मनसा कुर्वंतमन्यं न समनुज्ञास्यामि, मनसा न करिष्यामि न कारिष्यामि, मनसा न करिष्यामि कुर्वंतमप्यन्यं न समनुज्ञास्यामि एवमेकद्वित्रिसंयोगजाः एकोनपंचाशत्प्रत्याख्यानभेदा जायंते ॥ ३५ ॥ इति प्रत्याख्यानकल्पः समाप्तः । अथैतत्त्रयं त्रायते—

अर्थ—प्रत्याख्यान करनेवाला ज्ञानी कहै है—जो आगामी समस्त कर्मनिकूं मैं प्रत्याख्यानरूप त्याग करि, अर नष्ट भया है मोह जाका ऐसा भया संता कर्मसूं रहित चैतन्यस्वरूप जो आत्मा ताविषैं आपही करि वर्तौं हौं ॥ भावार्थ—निश्चयचारित्रमैं प्रत्याख्यानका विधान ऐसा है, जो, समस्त आगामी कर्मसूं रहित अपना शुद्धचैतन्यकी प्रवृत्तिरूप जो शुद्धोपयोग ताविषैं वर्तना है । सो ज्ञानी आगामी समस्त कर्मका प्रत्याख्यान करि अपना चैतन्यस्वरूपविषैं वर्तै है ॥ इहां तात्पर्य ऐसा जानना—जो व्यवहारचारित्रमें तौ ज्यौं प्रतिज्ञामैं दोष लागै ताका प्रतिक्रमण, आलोचना, प्रत्याख्यान होय हैं । अर इहां निश्चयचारित्रका प्रधानपणैं कथन है ॥ सो शुद्धोपयोगसूं विपरीत समस्त ही कर्म आत्माके दोष स्वरूप हैं तिनि सवही कर्मचेतनस्वरूप परिणामका ज्ञानी तीन कालके कर्मका प्रतिक्रमण आलोचना प्रत्याख्यानकरि समस्तकर्मचेतनासूं न्यारा अपना शुद्धोपयोगस्वरूप आत्माका ज्ञान श्रद्धान करि, अर तिसमैं थिर होनेका विधानकरि निष्प्रमाद दशाकूं प्राप्त होय । श्रेणी चढि केवलज्ञान उपजानेके सन्मुख होय है ॥ यह ज्ञानीका कार्य है ॥ ऐसा प्रत्याख्यानकल्प समाप्त कीया ॥ ३५ ॥ आगैं सकलकर्मका सन्यास कहिये क्षेपणा—पटक देना, ताकी भावनाकूं नृत्य कराय कथन पूरण करनेका काव्य है—

समस्तमित्येवमपास्य कर्म त्रैकालिकं शुद्धनयावलंबी ।
विलीनमोहो रहितं विकारैश्चिन्मात्रमात्मानमथावलंबे ३६

सं० टी—अथ प्रतिक्रमणादिकथनादनंतरं, चिन्मात्रं—चेतनामयं, आत्मानं—स्वचिद्रूपं, अवलंबे ध्यायामि अहं, कीदृशं ? विकारैः—कर्मोत्पन्नप्रकृतिभिः रहितं, कीदृशोहं ? शुद्धेत्यादिः—शुद्धं स्वस्वरूपं, नयति—प्राप्नोति, इति शुद्धनयः, आत्मानं अवलंबत इत्येवंशीलः, पुनः कीदृशः ? विलीनमोहः—विनष्टरागद्वेषमोहः, किंकृत्वा ? इत्येवं पूर्वोक्तं प्रतिक्रमणादिकथनरूपेण समस्तं—निखिलं, त्रैकालिकं—त्रिकाले—अतीतानागतवर्तमाने भवं त्रैकालिकं, कर्म—ज्ञानावरणादि, अपास्य—निराकृत्य ॥ ३६ ॥ अथ सकलकर्मफलसंन्यासभावनां नाटयति—

अर्थ—शुद्धनयका अवलंबन करनेवाला कहै है, जो इत्येवं कहिये पूर्वोक्तप्रकार तीनकाल—अतीतवर्तमानभविष्यत्संबंधी कर्मकूं निराकरणकरि छोडिकरि अर शुद्धनयका अवलंबन कर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेवाला ज्ञानी मैं हों । सो विलय भया है मोहमिथ्यात्वकर्म जाका ऐसा भया संता अब समस्त-विकारतैं रहित चैतन्यमात्र आत्माकूं अवलंबूं हौं ।। ३६ ।। अब सकलकर्मफलका संन्यासकी भावनाकूं नृत्य करावे हैं—

विगलंतु कर्मविषतरुफलानि मम भुक्तिमंतरेणैव ।
संचेतयेऽहमचलं चैतन्यात्मानमात्मानं ।।३७।।

सं० टी:—मम आत्मनः कर्मेत्यादि:—कर्म एव विषतरु:—विषवृक्षः चेतनाच्छादकत्वात् तस्य फलानि शुभाशुभानि विगलंतु—स्वयं गलित्वा पतंतु—प्रलयं यांत्वित्यर्थः कथं ? भुक्तिमंतरेण—उदयदानम् विना, अहं आत्मानं संचेतये—ध्यायामि, कीदृशं ? अचलं- अक्षोभ्यं, चैतन्यात्मानं दर्शनज्ञानचेतनास्वरूपं तथाहि—नाहं मतिज्ञानावरणीयफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये, नाहं श्रुतज्ञानावरणीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये एवं ज्ञानावरणपंचके दर्शनावरणनवके, वेदनीयद्विके, दर्शनमोहनीयत्रिके, चारित्रवेदनीयाख्यमोहनीयपंचविंशतिके, आयुश्चतुष्के, नामकर्मणस्त्रयोनवतिप्रकृतौ, गोत्रद्विकं, अंतरायपंचके योजनीयं विस्तरभयात् सुगमत्वाच्च न लिखितमत्र ।। ३७ ।। अथात्मतत्त्वे कालावलीं सफलामभिरमयति—

अर्थ—सकलकर्मफलकी संन्यासभावना करनेवाला कहै है, जो, कर्मरूपी विषका वृक्षके फल हैं ते मेरे भोगनेविनाही खिरि जावो ।। मै चैतन्यस्वरूप जो मेरा आत्मा ताकूं निश्चल चेतूं हौं—अनुभवूं हों । भावार्थ—ज्ञानी कहै है, जो कर्मका फल उदय आवै है, ताकूं मै ज्ञाता द्रष्टा हुवा देखूं हौं, ताका फलका भोक्ता नाहीं बनूं हौं, तातैं मेरे भोगे विनाही ते कर्म खिरि जावो । मैं मेरे चैतन्यस्वरूप आत्मामैं लीन भया तिनिका देखने जाननेवालाही हौं ।। इहां इतना विशेष और जानना जो, अविरतदशामैं तथा देशविरत प्रमत्तसंयतदशामैं तौ ऐसा ज्ञान-श्रद्धान ही प्रधान है अर जब अप्रमत्तदशा होयकरि श्रेणी चढै है तब यह अनुभव साक्षात् होय है ।।३७।।

निश्शेषकर्मफलसन्न्यसनान्ममैवं सर्वक्रियांतरविहारनिवृत्तवृत्तेः ।
चैतन्यलक्ष्म भजतो भृशमात्मतत्त्वं कालावलीयमचलस्य वहत्वनंता ३८

सं० टी०—मम—मे इयं—प्रसिद्धा, कालावली—कालसमयपंक्तिः, अनंता—अनंतसमयावच्छिन्ना, वहतु यातु, कीदृक्षस्य मे ? भृशं—अत्यर्थं, आत्मतत्त्वं—स्वस्वरूपं, भजतः—आश्रयतः, कीदृशं ? चैतन्यलक्ष्म चैतन्यमेव लक्ष्म लक्षणं यस्य तत्, एवं—पूर्वोक्तप्रकारेण, निरित्यादि:—निश्शेषाणि—समस्तानि तानि च तानि कर्मफलानि च अज्ञानत्वशुभाशुभादीनि तेषां सं—सम्यक् प्रकारेण न्यसनं—परित्यजनं तस्मात्, पुनः किंभूतस्य मे ? सर्वेत्यादि:—स्वक्रियाया अन्या क्रिया क्रियांतरं सर्वस्मिन् क्रियांतरे विहारः विहरणं, तत्र निवृत्ता वृत्तिः प्रवर्तनं यस्य तस्य ।। ३८ ।। अथ कर्मफलभुक्ति भनक्ति—

अर्थ—सकलकर्मके फलका त्यागकरि ज्ञानचेतनाकी भावना करनेवाला ज्ञानी कहै है—जो, एवं कहिये पूर्वोक्त प्रकार सकल कर्मका फलका सन्न्यास करनेतै मैं कैसा हों ? चैतन्य है लक्षण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जाका ऐसा आत्मतत्त्व, ताही अतिशयकरि भोगवता हों। अर इस सिवाय अन्य जो उपयोगकी तथा बाह्यली क्रिया, ताविषैं विहार कहिये प्रवर्तना तातैं रहित है वृत्ति जाकी ऐसा अचल हों। सो मेरे यह कालकी आवली प्रवाहरूप अनंत है सो इसहीकूं भोगनेरूप जावो। उपयोगकी प्रवृत्ति अन्यविषैं मति जावो। भावार्थ—ऐसी भावना करनेवाला ज्ञानी ऐसा तृप्त भया है, जो भावना करते मानूं साक्षात् केवली ही भया। सो ऐसा ही रहना अनंतकाल चाहै है। सो सत्य है। याही भावनातैं केवली होय है। केवलज्ञान उपजनेका परमार्थ उपाय यही है। बाह्य व्यवहार चारित्र है सो इसहीका साधनरूप है। अर इस विना व्यवहारचारित्र है सो शुभ-कर्मकूं बांधै है। मोक्षका उपाय नाही है। फेरि काव्य कहै हैं—

यः पूर्वभावकृतकर्मविषद्रुमाणां भुंक्ते फलानि न खलु स्वत एव तृप्तः।
आपातकालरमणीयमुदर्करम्यं निष्कर्मशर्ममयमेति दशांतरं सः ॥ ३६ ॥

सं० टी०— खलु–निश्चितं, यः–पुमान् स्वत एव स्वस्वभावत एव, तृप्तः–संतृप्तः, पूर्वेत्यादिः–पूर्वभावैः पूर्वोदयितविभावपरिणामैः कृतानि कर्माणि तान्येव विषद्रुमाः—विषवृक्षाः, तेषां फलानि–सुखदुःखादीनि, न भुंक्ते ततो भिन्नत्वेन तत्फलास्वादको न भवति। सः–योगी, दशांतरं–संसारावस्थातः अवस्थांतरं मोक्षं, एति प्राप्नोति। कीदृशं ? आपातेत्यादिः–आपातकाले तत्प्राप्तिकाले रमणीयं–मनोज्ञं, ननु प्राप्तिकाले भोगसुखवद्रमणीयं तदानादरणीयमित्याकांक्षायां उदर्करम्यं–उदर्के–उत्तरकाले, रम्यं मनोज्ञं निरित्यादिः निष्कर्म–कर्मातीतं तच्च तच्छर्म च तेन निर्वृत्तं, ॥ ३६ ॥ अथ प्रशमरसपानं पाययति—

अर्थ—जो पुरुष पूर्वे अज्ञानभावकरि कीये जे कर्म तेही भये विषके वृक्ष तिनिका फल उदय आया ताकूं ताका स्वामी होय न भोगवै है। अर निश्चयकरि अपने आत्मस्वरूपहीतें तृप्त है। अन्य किछू तृष्णा नाही करै है। सो पुरुष वर्तमानकालविषैं तौ सुन्दर रमनेयोग्य, अर आगामी कालविषैं जाका फल सुन्दर रमने योग्य ऐसा कर्मनितैं रहित स्वाधीनसुखमयी दशांतर कहिये ऐसी दशा संसार अवस्थामैं पूर्वे कबहू न भई ऐसी अन्यस्वरूप दशाकूं प्राप्त होय है भावार्थ—इस ज्ञानचेतनाकी भावनाका यहु फल है। याके भावनातैं अत्यन्त तृप्त रहै है, अन्य तृष्णा न करै है। अर आगामी केवलज्ञान उपजाय सर्वकर्मनितैं रहित मोक्ष–अवस्थाकूं प्राप्त होय है ॥३६॥ अब उपदेश करै हैं,जो,ऐसे कर्मचेतना अर कर्म फल चेतनाका त्यागकी भावनाकरि अज्ञानचेतनाका अभावकूं प्रकट नचाय ज्ञानचेतनाका स्वभावकूं पूर्ण करि, ताकूं नचावतै संतै ज्ञानी जन हैं ते सदाकाल आनन्दरूप रहैं। इस अर्थके कलशरूप काव्य हैं—

अत्यंतं भावयित्वा विरतिमविरतं कर्मणस्तत्फलाच्च
प्रस्पष्टं नाटयित्वा प्रलयनमखिलाज्ञानसंचेतनायाः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्णं कृत्वा स्वभावं स्वरसपरिगतं ज्ञानसंचेतनां स्वां
सानंदं नाटयंतः प्रशमरसमितः सर्वकालं पिबंतु ॥४०॥

सं० टी०—इतः-कर्मतत्फलविरक्तिभजनादनंतरं, सर्वकालं-सर्वदा, प्रशमरसं-साम्यपीयूषं, पिबंतु आस्वादयंतु योगिनः। कीदृक्षास्ते ? स्वां स्वकीयां ज्ञानसंचेतनां ज्ञानं मे ज्ञानस्याहमिति भावनां, सानंदं हर्षोद्रेकं यथा भवति तथा नाटयंतः-कुर्वंतः, किं कृत्वा ? स्वेत्यादिः-स्वस्य-आत्मनः रसः, तत्र परिगतं प्राप्तं, स्वभावं-स्वरूपं, पूर्णं-संपूर्णं, कृत्वा—विधाय तदपि किंकृत्वा ? प्रस्पष्टं व्यक्तं यथा भवति तथा अखिलेत्यादिः-अखिला-समस्ता चासावज्ञानचेतना च कर्मचेतना कर्मफलचेतना च तस्याः प्रलयनं विनाशनं नाटयित्वा विधाय, तदपि किंकृत्वा ? अविरतं-निरंतरं, कर्मणः—ज्ञानावरणादेः, च-पुनः, तत्फलात् तेषां कर्मणां फलात् रागद्वेषादेः, अत्यंतं निश्शेषं, विरतिं-विरक्तिं, भावयित्वा-संभाव्य-कृत्वेत्यर्थः ॥४०॥ अथेतो ज्ञानं विवेचयति—

अर्थ—ज्ञानी जन हैं ते कर्मतैं अर कर्मके फलतैं अत्यंत विरक्तभावनाकूं निरंतर भावकरि, बहुरि समस्त अज्ञानचेतनाका नाशकूं स्पष्ट प्रगटपणै नृत्य कराय अर अपना निजरसतैं पाया स्वभावरूप जो ज्ञानचेतना ताकूं, आनंदसहित जैसे होय तैसे पूर्ण करि नृत्य करावते संते इहांतै आगै प्रशमरस जो कर्मका अभावरूप आत्मिकरस अमृत ताही सदाकाल पीवो। यह ज्ञानी जननिकूं प्रेरणा है॥ भावार्थ—यह पहलैं तो तीन कालसंबंधी कर्मका कर्तापणारूप कर्म चेतनाके गुणचास भंगरूप त्यागकी भावना कराई। पीछै एकसो अडतालीस कर्मप्रकृतिका उदयरूप कर्मका फलका त्यागकी भावना कराई। ऐसे अज्ञानचेतना का प्रलय कराय अर ज्ञानचेतनामें प्रवर्तनेका उपदेश कीया है। यह ज्ञानचेतना सदा आनन्द रूप अपना स्वभावका अनुभवरूप है। ताकूं ज्ञानी जन सदा भोगवो। यह श्रीगुरूनिका उपदेश है॥ ४० ॥ आगैं यह सर्व विशुद्धज्ञानका अधिकार है सो ज्ञानकूं कर्ताभोक्तापणातै भिन्न दिखाय अर अन्यद्रव्य अर अन्यद्रव्यनिके भाव तिनितै ज्ञानकूं न्यारा दिखावै है। ताकी सूचनिकाका काव्य है—

इतः पदार्थप्रथनावगुंठनात् विना कृतेरेकमनाकुलं ज्वलत्।
समस्तवस्तुव्यतिरेकनिश्चयाद्विवेचितं ज्ञानमिहावतिष्ठते ॥ ४१ ॥

सं० टी०—इह-आत्मनि जगति वा, ज्ञानं-बोधः, विवेचितं-भिन्नं, अवतिष्ठते-आस्ते, कुतः ? इतः अस्मात्, पदार्थेत्यादिः—पदार्थानां शास्त्रशब्दरूपरसगंधवर्णस्पर्शकर्मधर्माधर्मकालाकाशाध्यवसायादीनां प्रथनं—विस्तारः, तस्य अवगुंठनात् न श्रुतं ज्ञानं अचेतनत्वात् ततो ज्ञानश्रुतयोर्व्यतिरेकः एवं शब्दादिषु योज्यं, कृतिः-कारणं तस्य विना—अंतरेण क्रियाया अंतरेण स्वभावादित्यर्थः एकं-अद्वितीयं, पुनः कीदृक्षं अनाकुलं—आकुलतारहितं, पुनः ज्वलत्-देदीप्यमानं, कुतः ? समस्तेत्यादिः-समस्तानां निखिलानां, वस्तूनां-शास्त्रशब्दादीनां, व्यतिरेकः-भिन्नत्वं, ज्ञानार्थयोर्भिन्नत्वं तस्य निश्चयः-निर्णयः, तस्मात् ॥ ४१ ॥ अथ ज्ञानस्य मध्याद्यंतराहित्यमर्हते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—इहांतै आगै इस ज्ञानके अधिकारविषैं समस्तवस्तुनितैं व्यतिरेक कहिये भिन्नका निश्चयते विवेचित कहिये न्यारा कीया जो ज्ञान सो अवस्थान करै है, निश्चल तिष्ठै है। कैसा हुआ तिष्ठे है? पदार्थका जो प्रथना कहिये फैलना ताका अवगुण्ठन कहिये ज्ञेयज्ञानसंबंधकरि एकसे दीखना, तातैं भई जो अनेकरूप कृति कहिये कर्तृत्वभावरूप क्रिया, ताविना एक ज्ञानक्रियामात्र सर्व आकुलताते रहित दैदीप्यमान होता तिष्ठै है॥ भावार्थ—सर्ववस्तुनितें न्यारा ज्ञानकूं प्रगट दिखावै हैं॥ ४१॥

अन्येभ्यो व्यतिरिक्तमात्मनियतं बिभ्रत्पृथग्वस्तुता-
मादानोज्झनशून्यमेतदमलं ज्ञानं तथावस्थितं।
मध्याद्यंतविभागमुक्तसहजस्फारप्रभाभासुरः
शुद्धज्ञानघनो यथास्य महिमा नित्योदितस्तिष्ठति॥ ४२॥

सं॰ टी॰तथा—तेनैव प्रकारेण, एतत्—प्रसिद्धं, ज्ञानं—बोधः, अवस्थितं—व्यवस्थितं, कीदृक्? अन्येभ्यः सर्वपरद्रव्येभ्यः, व्यतिरिक्तं—भिन्नं, अनेनातिव्याप्तिः परिहृता, आत्मनियतं—सर्वदर्शनादिजीव स्वप्रतिष्ठं, अनेनाऽव्याप्तिः परिहृता ज्ञानस्य। पुनः पृथग्वस्तुतां परपदार्थेभ्यो भिन्नस्वभावं परिच्छेदकलक्षणं बिभ्रत् दधत् अनेन असंभवः परिहृतः, आदानोज्झनशून्यं—परवस्तुनः आदानं ग्रहणं उज्झनं त्यजनं च ताभ्यां शून्यं रहितं, अमलं—कर्ममलातिक्रांतं, तथा कथं? यथा अस्य—ज्ञानस्य नित्योदितः—नित्यमुदीयमानः—प्रकाशमानः, महिमा माहात्म्यं तिष्ठति, कीदृक्षः सः? मध्येत्यादिः—मध्यं च आदिश्च अंतश्च मध्याद्यंताः तेषां विभागः, भेदः, तैः मुक्ता रहिता सा चासौ सहजा—स्वाभाविकी, स्फारा विस्तीर्णा, प्रभा—दीप्तिश्च लक्षणया ज्ञायकत्वं तया भासुरः—प्रकाशनशीलः, पुनः कीदृशः? शुद्धेत्यादि—शुद्धज्ञानेन घनः निरंतरः॥ ४२॥ अथात्मधारणामनुमोदते—

अर्थ—यह ज्ञान है सो तैसे अवस्थित भया है, जैसे, याका महिमा निरंतर उदयरूप तिष्ठै, प्रतिपक्षी कर्म न रहै॥ कैसा अवस्थित भया है? अन्य जे परद्रव्य तिनितैं व्यतिरिक्त कहिये न्यारा अवस्थित भया है। बहुरि कैसा है? आत्मनियतं कहिये आपहीविषैं निश्चित है। बहुरि कैसा है? पृथक् कहिये न्याराही वस्तुपणाकूं धारता संता है। वस्तूका स्वरूप सामान्यविशेषात्मक है, सो ज्ञानभी सामान्यविशेषपणाकूं धार्या है। बहुरि कैसा है? आदानोज्झन कहिये ग्रहणत्याग तिनिकरि शून्य है—रहित है। ज्ञानमें किछू त्याग ग्रहण नाही है। बहुरि कैसा है? अमल कहिये रागादिक मलतैं रहित है ऐसा है बहुरि याका महिमा नित्य उदयरूप तिष्ठै है सो कैसा है? मध्य अर आदि अर अंत जे विभाग तिनिकरि मुक्त कहिये रहित, अर सहज कहिये स्वाभाविक, अर स्फार कहिये फैल्या विस्तरचा जो प्रभा कहिये प्रकाश ताकरि दैदीप्यमान है

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि शुद्धज्ञानका घन कहिये समूह है ऐसा जाका महिमा सदा उदयमान है। तैसे अवस्थित भया है ठहर्या है ॥ भावार्थ—ज्ञानका पूर्णरूप सर्वकूं जानना है। सो जब यह प्रकट होय है तब तिनिं विशेषणनिसहित प्रकट होय है। सो याकी महिमाकूं कोई विगाडि सकै नाही सदा उदयमान रहै है ॥४२॥ अब कहै हैं, ऐसे ज्ञानस्वरूप आत्माका धारणा सोही कृतकृत्यपणा है—

उन्मुक्तमुन्मोच्यमशेषतस्तत्तथात्तमादेयमशेषतस्तत्।
यदात्मनः संहृतसर्वशक्तेः पूर्णस्य संधारणमात्मनीह ॥ ४३ ॥

सं० टी—इह अस्मिन् आत्मनि चिद्रूपे, आत्मनः ज्ञानस्वरूपस्य, तत्—प्रसिद्धं, संधारणं—धारणं, एकाग्रतापणं। कीदृशस्य ? संहृतेत्यादिः—संहृता—निवारिता, सर्वा कर्मोपाधिजा शक्तिः सामर्थ्यं येन तस्य, पूर्णस्य—संपूर्णज्ञानशक्तिविशिष्टस्य तत् यत् संधारणं तदेव अशेषतः—सामस्त्येन, उन्मोच्यं उन्मोक्तुं त्यक्तुं योग्यं, शरीरादि उन्मुक्तं—त्यक्तं, तथा—येन प्रकारेण सर्वं त्यक्तं तेनैव प्रकारेण तत् आत्मसंधारणं, अशेषतः आदेयं-गृहीतुं योग्यं दर्शनज्ञानादि आत्तं—गृहीतं, आत्मन उपादानमेव हेयोपादेययोः परित्यागग्रहणाभिप्रायः ॥ ४३ ॥ अथास्यानाहारकत्वं शंक्यते—

अर्थ—जो समेटी है सर्व शक्ति जानैं ऐसा जो पूर्णस्वभाव आत्मा, ताका आत्माहीविषैं धारण करना सो धारण किया अर उन्मोच्य कहिये जो छोडनेयोग्य था, सो तौ सर्व उन्मुक्त कहिये छोडया अर जो आदेय कहिये लेनेयोग्य था, सो समस्त लीया ॥ भावार्थ—जो पूर्णज्ञानस्वरूप सर्वशक्तीका समूहस्वरूप आत्मा, ताकूं धारणा सोही धारण किया अवर त्यागनें योग्य तौ सर्वही त्यागा अर ग्रहण करनेयोग्य था सो ग्रहण कीया। यह ही कृतकृत्यपणा है ॥४३॥ आगैं कहै हैं, जो, ऐसे ज्ञानकै देह भीं नाही है ताकी सूचनिकाका श्लोक है—

व्यतिरिक्तं परद्रव्यादेवं ज्ञानमवस्थितं।
कथमाहारकं तत्स्याद्येन देहोऽस्य शंक्यते ॥ ४४ ॥

सं० टी०—तत्—ज्ञानं, आहारकं—आहार्यवस्तुग्राहकं कथं स्यात् ? केन प्रकारेण स्यात् ? न केनापि, तस्यामूर्तत्वात् आहारकस्य मूर्तत्वात्। तत् किं ? यत्—ज्ञानं, एवं—अन्येभ्य इत्यादि पूर्वोक्तयुक्त्या, परद्रव्यात् व्यतिरिक्तं—भिन्नं, अवस्थितं सुप्रतिष्ठं। अस्य—ज्ञानस्य, देहः—शरीरं येन कथं शंक्यते—आरेक्यते संभाव्यते ? न कथमपि अस्यानाहारकत्वात् ॥ ४४ ॥ अथालिंगमालिंग्यते—

भावार्थ—एवं कहिये पूर्वोक्तप्रकार परद्रव्यतै न्यारा ज्ञान अवस्थित भया ठहरया ॥ सो ऐसा ज्ञान आहारक कहिये कर्मनोकर्मरूप आहार करनेवाला कैसा होय ? अर जब आहारक नाही तब याके देहकी शंका कैसी करिये ? नाही करिये ॥४४॥

एवं ज्ञानस्य शुद्धस्य देह एव न विद्यते।
ततो देहमयं ज्ञातुर्न लिंगं मोक्षकारणं ॥ ४५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं०टी०-एवं—मूर्तत्वामूर्तत्वप्रकारेण यतः शुद्धस्य निष्कल्मषस्य ज्ञानस्य, देह एव निश्चयेन न विद्यते--नास्ति, ततः तस्माद्देहाभावात् ज्ञातुः-ज्ञायकस्य, पुंसः लिंगं पाखंडिलिंगं गृहिलिंगं वा न मोक्षकारणं-न मुक्तेर्मार्गः, हेतुगर्भितविशेषणमाह देहमयं—देहनिवृत्तं, यदि देहः स्वकीयो न तर्हि तदाश्रितं लिंगं स्वकीयं कथं स्यात् ॥ ४५ ॥ तर्हि को मोक्षमार्गः ? इति चेत्

अर्थ-एवं कहिये पूर्वोक्तप्रकारकरि शुद्धज्ञानकै देह ही नाही विद्यमान है, तातैं ज्ञाताके देहमयी लिंग है, चिन्ह है, भेष है सो मोक्षका कारण नाही है ॥

दर्शनज्ञानचारित्रत्रयात्मा तत्त्वमात्मनः ।
एक एव सदा सेव्यो मोक्षमार्गो मुमुक्षुणा ॥ ४६ ॥

सं० टी०-मुमुक्षुणा-मोक्तुमिच्छुना पुंसा एक एव-जिनोपदिष्ट एव न मिथ्योपकल्पितः, मोक्षमार्गः मोक्षसाधनोपायः सदा-नित्यं, सेव्यः-आश्रयणीयः, कीदृक्षः ? दर्शनेत्यादिः-स्वश्रद्धान-स्वज्ञान-स्वचरणत्रयस्वरूपः, एतत्त्रयमंतरेण तस्यानुपलब्धेः पुनः आत्मनः तत्त्वं-स्वरूपं, दर्शनादित्रयमंतरेणात्मस्वरूपाभावात् मोक्षमार्गस्य दर्शनादित्रयात्मकत्वात् च ॥ ४६ ॥ अथ तमेव मोक्षमार्गं मार्गयति-

अर्थ-जातैं आत्माका तत्त्व कहिये यथार्थरूप दर्शनज्ञानचारित्र का त्रिकस्वरूप है तातैं मोक्षके इच्छक पुरुषनिकरि एकही यह मोक्षमार्ग सदा सेवने योग्य है ॥ ४६ ॥

एको मोक्षपथो य एष नियतो दृग्ज्ञप्तिवृत्त्यात्मक—
स्तत्रैव स्थितिमेति यस्तमनिशं ध्यायेच्च तं चेतति ।
तस्मिन्नेव निरंतरं विहरति द्रव्यांतराण्यस्पृशन्
सोऽवश्यं समयस्य सारमचिरान्नित्योदयं विंदति ॥ ४७ ॥

सं० टी०--यः-सर्वजनप्रसिद्धः, मोक्षमार्गः-नानामिथ्यामतिविजृम्भितः, अनेकतां दधानोऽपि स एषः मोक्षपथः, दृगित्यादिः-दर्शनज्ञानचारित्रत्रयात्मकः सन्, एकः-न त्वनेकधा नियतः-अनेकप्रमाणनयोपन्यासैर्निश्चितः, यः-पुमान्, तत्रैव—मोक्षपथे दर्शनादिरूपे, स्थितिं-निश्चलतां स्वात्मनः, एति-प्राप्नोति च-पुनः, अनिशं-निरंतरं-तं—रत्नत्रयरूपं मोक्षपथं एकाग्रो भूत्वा, ध्यायेत्—ध्यानविषयीकुर्यात्, पुनः णः तं—मोक्षपथं, सकलकर्मफलचेतनासंन्यासेन शुद्धज्ञानचेतनामयीभूत्वा चेतति—मुहुर्मुहुरनुभवति निरंतरं-प्रतिक्षणं, तस्मिन्नेव-दर्शनादित्रयात्मके मोक्षपथे, विहरति-अनुचरति । कीदृक्षः सन् ? द्रव्यांतराणि-पर-द्रव्याणि, अस्पृशन्-अनाश्रयन् मनागपि स्वकीयान्यकुर्वन्, सः-पुमान्, अचिरात्-शीघ्रं तद्भवे तृतीयभवादौ वा अवश्यं-नियमतः, समयस्य-पदार्थस्य-सिद्धांतशासनस्य वा सारं-परमात्मानं टंकोत्कीर्णस्वभावं विंदति-लभते, साक्षात् परमात्मा भवतीति यावत् । कीदृशं ? नित्योदयं-नित्यमुदीयमानं ॥४७॥ अथ लिंगस्य वैयर्थ्यं सार्थयति-

अर्थ-जो दर्शनज्ञानचारित्रस्वरूप यह एक मोक्षका मार्ग है सो जो पुरुष तिसही विषैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितीकूं प्राप्त होय हैं तिष्ठै हैं,बहुरि जो तिसहीकूं निरंतर ध्यावै है, बहुरि जो तिसहीकूं चेतै है, अनुभवै है, बहुरि जो तिसहीविषैं निरन्तर विहार करै है प्रवर्तै है, कैसा भया संता ? अन्य-द्रव्यनिकूं नाही स्पर्शता संता, सो पुरुष थोरेही कालमें अवश्य समयसार जो परमात्माका रूप जाका नित्य उदय रहैं ऐसा अनुभवै है पावै है। भावार्थ–निश्चयमोक्षमार्गके सेवनतैं थोरेही कालमें मोक्षकी प्राप्ति होय यह नियम है ॥ ४७ ॥ आगै कहै हैं,जो द्रव्यलिंगहीकूं मोक्षमार्ग मानि ता विषैं ममत्वभाव राखैं हैं ते मोक्ष नाही पावै हैं । ताकी सूचनिकाका काव्य है–

ये त्वेनं परिहृत्य संवृतिपथप्रस्थापितेनात्मना
लिंगे द्रव्यमये वहन्ति ममतां तत्त्वावबोधच्युताः ।
नित्योद्योतमखंडमेकमतुलालोकं स्वभावप्रभा–
प्राग्भारं समयस्य सारममलं नाद्यापि पश्यंति ते ॥ ४८ ॥

सं० टी०—ते-पुरुषाः, अद्यापि-इदनीमपि, साक्षात्स्वरूपप्रकाशनावसरेऽपि, समयस्य सारं-आत्मानं,न पश्यंति—नेक्षंते, कीदृक्षं नित्योद्योतं-सदा प्रकाशमानं, अखंडं-संपूर्णं, एकं-कर्मद्वैतरहितं, अतुलालोकं-अनुपमेयप्रकाशं, तत्प्रकाशसदृशस्यापरस्याभावात् , स्वेत्यादिः-स्व एव भावः—पदार्थः, तस्य प्रभा-ज्ञानं, अथवा स्वभावज्ञानस्य प्रभा—द्योतकत्वं तया प्राग्भारं -पूर्वं भृतं, अमलं-निर्मलं, ते के ? ये पुरुषा आत्मना कृत्वा द्रव्यमये-नाग्न्यत्रिदंडिप्रमुखद्रव्यनिर्मापिते लिंगे-वेषे, ममतां 'अहं श्रमणः, अहं श्रमणोपासकश्च इति ममत्वं वहंति,-कुर्वंति, कीदृक्षाः ? ये तत्त्वेत्यादिः-तत्त्वस्य—वस्तुयाथात्म्यस्य, अवबोधः परिज्ञानं, तेन च्युताः, कीदृशेनात्मना ? समित्यादिः--संवृतिपथे-कल्पनापथे,प्रस्थापितेन--आरोपितेन, किंकृत्वा ? एनं-दर्शनज्ञानचारित्रलक्षणं भावलिंगं परिहृत्य-मुक्त्वा, इतस्ततो द्रव्यलिंगे प्रवृत्तस्य न मुक्ति-रित्यभिप्रायः ॥ ४८ ॥ अथ व्यवहारं यिमूढयति–

अर्थ–जे पुरुष यह पूर्वोक्त परमार्थस्वरूप मोक्षमार्ग ताकूं छोडिकरि अर व्यवहार मार्ग-विषैं चलाया स्थाप्या जो अपना आत्मा ताहीकरि द्रव्यमय जो यह बाह्यलिंग भेष ताविषैं ममता करै हैं, जाने हैं कि यह ही हमकूं मोक्ष प्राप्त करेगा,ते पुरुष तत्त्वके यथार्थ ज्ञानतैं रहित भये संते मुनिपद लिया है तौऊ इस समयसारकूं नाही अवलोकन करै हैं, नाही पावै । कैसा है समयसार ? नित्य है उदय जाका, कोई प्रतिपक्षी होय ताका उदयका विच्छेद न करि सकै है। बहुरि कैसा है ? अखंड है, जामैं अन्य ज्ञेय आदिके निमित्ततैं खंड नाही होय है बहुरि कैसा है ? एक है पर्यायनिकरि अनेक अवस्था होय हैं, तौऊ एकरूपपणाकूं नाही छोडै है बहुरि कैसा है ? अतुल कहिये जाके बराबरी अन्य नाही ऐसा है आलोक कहिये प्रकाश जाका, सूर्यादिकका प्रकाशकी ज्ञानप्रकाशकूं उपमा नाही लागै । बहुरि अपने स्वभावकी जो प्रभा ताका प्राग्भार है जाका भार अन्य सहारी सकै नाही । बहुरि अमल है, रागादिक विकारमलकरि रहित है । ऐसा परमात्माका स्वरूपकूं द्रव्यलिंगी नाही पावै है ॥४८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

**व्यवहारविमूढदृष्टयः परमार्थं कलयंति नो जनाः।
तुषबोधविमुग्धबुद्धयः कलयंतीह तुषं न तंडुलं ॥ ४९ ॥**

सं० टी०—व्यवेत्यादिः-व्यवहारेण-श्रमणश्रमणोपासक लक्षणद्विविधेन लिंगेन मोक्षमार्गः इति स्वरूपेण विमूढा-मोहिता दृष्टिर्येषां ते, जनाः-लोकाः परमार्थं—निश्चयं, न कलयंति-न प्राप्नुवंति-न जानंति वा तस्य स्वयमशुद्धद्रव्यानुभवनात्मकत्वे सति परमार्थत्वाभावात्। अत्र दृष्टांतोपन्यासः-इह-जगति, तुषेत्यादिः तुषबोधः-तंडुलाच्छादकत्वज्ञानं तेन विमुग्धा सर्वमिदं तुषमेवेति विमुग्धा-विमोहिता बुद्धिर्येषां ते जनाः तुषं-तंडुलाच्छादिकां त्वचं कलयंति-जानंति पुनस्तत्र स्थितं तंडुलं-अक्षतं न जानंति तत्र तस्य परिज्ञानाभावात्। वैतालीयनाम छंदः।

षट् विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः। न समात्र पराश्रिता कला वैतालीये रलौ गुरुः। ॥ १ ॥ इति छंद उक्तलक्षणसद्भावात् ॥ ४९ ॥ द्रव्यलिंगिना कुतः स्वरूपाप्राप्तिः? इति चेत्—

अथ—जे जन व्यवहारहीविषैं विमूढ मोही है बुद्धि जिनकी ऐसे हैं ते परमार्थकूं नाही जानै हैं। जैसैं लोकविषैं जे तुसहीके ज्ञानविषैं विमुग्धबुद्धि जन हैं ते तुसहीकूं तंडुल जानै हैं अर तंदुलकूं तंदुल नाही जानै हैं॥ भावार्थ—जे परमार्थ आत्माका स्वरूप नाही जानै हैं अर व्यवहारविषैं मूढ होय रहे हैं शरीरादि परद्रव्यहीकूं आत्मा जानै हैं ते परमार्थ आत्माकूं नाही जानै हैं। जैसैं तुष तंडुलका भेद तौ जानै नाही अर परालकूं कूटैं तिनिके तंडुलकी प्राप्ति नाही तुस तंडुलका भेदज्ञान भये संते तंडुल पावै ॥४९॥ आगै इसही अर्थकूं दृढ करनेकूं कहै हैं—

**द्रव्यलिंगममकारमीलितैर्दृश्यते समयसार एव न।
द्रव्यलिंगमिह यत्किलान्यतो ज्ञानमेकमिदमेव हि स्वतः ॥५०॥**

सं० टी०—समयसारः-समयेषु पदार्थेषु सारः, एव निश्चितं न दृश्यते—नेदयते, कैः? द्रव्यलिंगे-श्रमणोहं, श्रमणोपासकोहमिति यः ममकारः अहंकारः तेन मीलितैः-आच्छादितैः, पुम्भिः, कुतः? यत् यस्मात्कारणात्-किल इति स्पष्टं, इह-जगति, द्रव्यलिंगं-वेषधारणादिचिन्हं, अन्यतः-परद्रव्याच्छरीरादेः भवति, हीति-निश्चितं इदं-प्रसिद्धं एकं-अद्वितीयं ज्ञानमेव-परमात्म-ज्ञानमेव, स्वतः-स्वरूपात्, जायते नान्यतस्तत्-नान्यत्ततः ॥ ५० ॥ अथ शास्त्रे परमामन्यते—

अर्थ—द्रव्यलिंगके ममकारकरि मीलित हैं मोही आंधे हैं तिनिकरि समयसार है सो देखियंही नाही है। जातैं इस लोकविषैं द्रव्यलिंग है सो तौ अन्यद्रव्यतैं होय है अर यह ज्ञान है सो आप आत्मद्रव्यतैंही होय है॥ भावार्थ—जे द्रव्यलिंगकूं ही आपा मानै है ते आंधे हैं। तिनिकूं आपा पर सूझ्या नाही ॥५०॥

**अलमलमतिजल्पैर्दुर्विकल्पैरनल्पैरयमिह परमार्थश्चेत्यतां नित्यमेकः।
स्वरसविसरपूर्णज्ञानविस्फूर्तिमात्रान्न खलु समयसारादुत्तरं किंचिदस्ति ५१**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी—अलमलं-पूर्यतां-पूर्यतां, कैः ? अतिजल्पैः-इदं मोक्षहेतुः, इदं नेत्यादि वचोजल्पनैः पुनः अनल्पैः-प्रचुरैः, दुर्विकल्पैः-तत्तन्मानससंकल्पैः, अलमलं, अथवा तद्विशेषणं दुर्-दुष्टा विकल्पा यत्रातिजल्पे तैः, जल्पस्य विकल्पपूर्वकत्वात्,इह जगति, नित्यं, एकः अयं परमार्थः-परा-उत्कृष्टा, मा-ज्ञानादिलक्ष्मीर्यस्य स चासावर्थः, कुतः आत्मार्थः, चेत्यतां-ध्यायतां ? खलु निश्चितं, समयसारात्-परमात्मनः सकाशात्, उत्तरं-अपरं, किंचित्-किमपि ध्येयं नास्ति। कीदृशात् तस्मात् ? स्वेत्यादिः-स्वस्य-आत्मनः, रसः तस्य विसरः-समूहः, तेन पूर्णं-परिपूर्णं तच्च तत् ज्ञानं च विस्फूर्तिमात्र-विस्फुरणकात्स्न्र्यं यत्र तस्मात् ॥ ५१ ॥ अथ शास्त्र परिसमापयत् तन्माहात्म्यमावर्ण्यते—

अर्थ—आचार्य कहै हैं जो अति बहुत कहनेकरि अर बहुत दुर्विकल्पनिकरि पूरी पडो। इस अध्यात्मग्रंथविषैं यह परमार्थ है, सोही एक निरन्तर अनुभवन करना जातै निश्चयकरि अपने रसका फैलावकरि पूर्ण जो ज्ञान ताका स्फुरायमान होनेमात्र जो समयसार परमात्मा तिस शिवाय अन्य किछूभी सार नाही है॥ भावार्थ—पूर्णज्ञानस्वरूप आतमाका अनुभवन करना। निश्चयकरि इस उपरांति किछूभी सार नाही है॥ आगैं इस समयसार ग्रंथकूं पूर्ण करै है। ताकी सूचनिकाका श्लोक है—

इदमेकं जगच्चक्षुरक्षयं याति पूर्णतां।
विज्ञानघनमानंदमयमध्यक्षतां नयत् ॥ ५२ ॥

सं० टी०—इदं—अध्यात्मतरंगिणीनाम शास्त्रं, समयसारप्राभृतं वा, एकं—सकलशास्त्रातिशायित्वात् परमात्मस्वरूपप्रकाशकत्वात्, अक्षयं-आचंद्रार्कं शाश्वतं सत्, पूर्णतां-भव्यतां- पूर्णतां-संपूर्णतां याति प्राप्नोति, कीदृशं ? जगच्चक्षुः-जगन्नेत्रं, तत्प्रकाशकत्वात्, पुनः कीदृशं ? विज्ञानघनं- आत्मानं अध्यक्षतां नयत्-प्रापयत्, कीदृशं तं ? आनंदमयं-आत्यंतिकसुखनिर्वृत्तं, इदं शास्त्रं ब्रह्मप्रकाशकत्वात् शब्दब्रह्मायमाणमधीत्योत्तमं सौख्यं विंदति इत्यभिप्रायः ॥ ५० ॥ अथात्मतत्त्वोपसंहारं दंध्वन्यते—

अर्थ—इदं कहिये यह समयप्राभृत है सो पूर्णताकूं प्राप्त होय है। कैसा है ? अक्षय कहिये जाका विनाश न होय ऐसा जगतके अद्वितीय नेत्रसमान है। जातैं कहा करता है ? विज्ञानघन जो शुद्ध परमात्मा समयसार आनन्दमय ताकूं प्रत्यक्ष प्राप्त करता संता है॥ भावार्थ—यह समयप्राभृत ग्रंथ है सो वचनरूप तथा ज्ञानरूप दोऊही प्रकार करि नेत्रसमान है। जातैं जैसैं नेत्र घटपटादिककूं प्रत्यक्ष दिखावै हैं तैसैं यह शुद्ध आत्माका स्वरूपकूं प्रत्यक्ष अनुभवगोचर दिखावै है ॥५२॥

इतीदमात्मनस्तत्त्वं ज्ञानमात्रमवस्थितं।
अखंडमेकमचलं स्वसंवेद्यमबाधितं ॥ ५३ ॥

सं० टी०—इति-उक्तयुक्त्या, ज्ञानमात्रं-ज्ञानमयं, इदं आत्मनस्तत्त्वं-स्वरूपं, अवस्थितं-सुप्रतिष्ठं ज्ञानादपरस्य तत्राभावात् तस्य तन्मयत्वाच्च अन्यथा अचेतनत्वप्रसंगात् अखण्डम्-परवादिभिः प्रमाणैः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खंडयितुमशक्यत्वात्, एकं-कर्मोपाधिनिरपेक्षत्वात्, अचलं-शाश्वतत्वात्, स्वसंवेद्यं-स्वानुभवप्रत्यक्षत्वात् अबाधितं—तत्स्वरूपबाधकस्य प्रमाणस्य कस्य चित्परमाणोश्चासंभवात् ॥ ५३ ॥ अथ स्वरूपनिरूपणानंतरं विशदस्याद्वादविद्यानवद्यवादविनोदवेदनाय पातिकापद्यं निगद्यते—

अर्थ—इति कहिये या प्रकार आत्माका तत्त्व कहिये परमार्थभूत स्वरूप ज्ञानमात्र अवस्थित भया निश्चित ठहरया। कैसा है ज्ञानमात्रतत्त्व ? अखंड है अनेक ज्ञेयाकारकरि खंड खंड दीखे है, तौऊ ज्ञानमात्रविषै खंड नाही है। बहुरि याही तैं एकरूप है। बहुरि अचल है। ज्ञानरूपतैं चल न होय अर ज्ञेयरूप नाही है। बहुरि स्वसंवेद्य है आपहीकरि आप जाननेयोग्य है। बहुरि अबाधित है काहू खोटी युक्तिकरि बाध्या नाही जाय है ॥ भावार्थ—इहां आत्माका निजस्वरूप ज्ञानही कह्या है जातैं आत्मामैं अनन्त धर्म हैं, तिनिमैं केई तौ साधारण हैं, ते तौ अतिव्याप्तिरूप हैं। तिनितैं आत्मा पिछाण्या जाय नाही। बहुरि केइ पर्यायाश्रित हैं, कोई अवस्थामैं है, कोईमैं नाही हैं,ते अव्याप्ति रूप हैं। तिनितै भी आत्मा पिछान्या जाय नाही। बहुरि चेतनता है सो यद्यपि लक्षण है तथापि शक्तिमात्र है, सो अदृष्ट है। तातैं ताकी व्यक्ति दर्शन ज्ञान हैं। तिनिमें ज्ञान साकार है, प्रकट अनुभवगोचर है। तातैं याहीके द्वारै आत्मा पहिचान्या जाय है ॥ तातैं या ज्ञानहीकूं प्रधानकरि आत्मतत्त्व कह्या है ॥ एसा मति जानूं जो आत्माकूं ज्ञानमात्र तत्त्व कह्या है। सो एताही परमार्थ है अन्य धर्म झूटे हैं आत्मामें नाही हैं ऐसा सर्वथा एकांत कीगे मिथ्यादृष्टि होय है। विज्ञानाद्वैतवादी बौद्धका मत आवै है। तथा वेदांत का मत आवै है। सो ऐसा एकांत बाधासहित है ॥ एसा एकांत अभिप्रायकरि मुनिव्रतभी पालै, अर आत्माका ज्ञानमात्रका ध्यान भी करै तौ मिथ्यात्व कटै नाही। मंदकषायनिके वशतैं स्वर्ग पावै तौ पावौ,मोक्षका साधन तौ होय नाही। तातैं स्याद्वादकरि यथार्थ समझना ॥

ऐसे इहातांई गाथाका व्याख्यान अर तिस व्याख्यानके कलशरूप तथा सूचनिकारूप काव्य टीकाकार कीये। अब इहां टीकाकार विचारै हैं-जो इस ग्रन्थमैं ज्ञानकूं प्रधानकरि ज्ञानमात्र आत्मा कहते आये। तहां कोई ऐसा तर्क करै, जो जैनमत तौ स्याद्वाद है, ज्ञानमात्र कहनेमैं एकांत आया, स्याद्वादतैं विरोध आया। तथा एकही ज्ञानमैं उपायतत्त्व अर उपेयतत्त्व ऐ दोय कैसे बणैं ? एसे तर्कके निराकरणके अर्थि किछू कहिये हैं। ताका श्लोक है—

अत्र स्याद्वादशुद्ध्यर्थं वस्तुतत्त्वव्यवस्थितिः।
उपायोपेयभावश्च मनाग्भूयोऽपि चिंत्यते ॥ ५४ ॥

सं० टी०—अत्र-समसारपद्यपूर्णताप्रस्तावे भूयोऽपि—पुनरपि पूर्वं तत्त्वस्वरूपमुक्तं ततोऽपि पुनः मनाग्-संक्षेपतः किंचित्, वस्त्वित्यादिः-वस्तुनः तत्त्वं—स्वरूपं, तस्य व्यवस्थितिः-व्यवस्था, चिंत्यते विचार्यते च। उपेत्यादिः-उपायः-स्वप्राप्तये दर्शनज्ञानचारित्रप्राप्तये उपायः-तेनोपायेन प्राप्यः आत्मा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तयोर्भावः स्वरूपं, चिंत्यते, किमर्थं ? स्यादित्यादिः स्याद्वादः अनेकांतवादः, तत्र यदेव तत् तदेवातत्, यदेकं तदेवानेकं द्रव्यपर्यायार्पणात् यदेव सत् तदेवासत् स्वपरद्रव्यक्षेत्रकालभावविवक्षातः यदेव नित्यं तदेवानित्यं द्रव्यपर्यायार्पणात् इत्याद्यनेकांतस्य युक्तितोऽर्हत्सहस्रयां निरूपणात् तस्य शुद्धयर्थं प्रतिपाद्यचित्तध्वांतनिवारणात् तस्य स्वतः शुद्धत्वाच्च ॥ ५४ ॥ अथ तत्र ज्ञानस्यातदात्मकत्ववादिवादमनूद्य तत्समाधानसंधानमादधते—

अर्थ–इहां इस अधिकारविषै स्याद्वादके शुद्धताके अर्थि वस्तुतत्त्वकी व्यवस्था है सो विचारिये है तथा एकही ज्ञानमें उपायभाव अर उपेयभाव किछू एक फेरिभी विचारिये है ॥ भावार्थ–यद्यपि इहां ज्ञानमात्र आत्मतत्त्व कह्या है तथापि वस्तुका स्वरूप सामान्यविशेषात्मक अनेक धर्मस्वरूप है, सो स्याद्वादतै सधै है। सो ज्ञानमात्र आत्माभी वस्तु है, ताकी व्यवस्था स्याद्वादकरि साधिये है। अर इस ज्ञानहीमैं उपायभाव अर उपेयभाव कहिये साध्यसाधकभाव विचारिये है। अब याकी व्यवस्था कहै हैं–स्याद्वाद है सो समस्तवस्तूका साधनेवाला एक निर्बाध अर्हत्सर्वज्ञका शासन है मत है। सो स्याद्वाद सर्ववस्तु अनेकांतात्मक हैं ऐसे कहै है। जातै सर्वही वस्तुका अनेकांतात्मक कहिये अनेकधर्मरूप स्वभाव है। असत्यार्थ कल्पनाकरि नाही कहे है। जैसा वस्तूका स्वभाव है तैसाही कहै है॥ सो इहां आत्मा नामा वस्तूकूं ज्ञानमात्रपणाकरि कहते संतें स्याद्वादका परिकोप नाही है। ज्ञानमात्र आत्मवस्तुकैभी स्वयमेव अनेकांतात्मकपणा है। सो कैसा है सोही कहै हैं ॥ तहां अनेकांतका ऐसा स्वरूप है, जो, जोही वस्तु तत् स्वरूप है, सोही वस्तु अतत्स्वरूप है। बहुरि जोही वस्तु एकस्वरूप है सोही वस्तु अनेकस्वरूप है। बहुरि जोही वस्तु सत्स्वरूप है सोही वस्तू असत्स्वरूप है बहुरि जोही वस्तु नित्यस्वरूप हैं सोही वस्तु अनित्य स्वरूप है ऐसे एकवस्तुविषैं वस्तुपणाको निपजावनहारी परस्परविरुद्ध दोय शक्तिका प्रकाशना सो अनेकांत है। सो ऐसीं विरुद्ध दोय शक्ति अपना आत्मवस्तूकै ज्ञानमात्रपणा होतैंभी पाइए है। सोही कहिये है। आत्माकै ज्ञानमात्रपणा होतैंभी अंतरंगविषैं चिमकता प्रकाशमान जो ज्ञानस्वरूप ताकरि तौ तत्स्वरूपपणा है। बहुरि बाह्य जेते अनंतज्ञेयभावकूं प्राप्त अर ज्ञानस्वरूपतै भिन्न जे परद्रव्यनिके रूप, तिनिकरि अतत्स्वरूपपणा है। तिनि स्वरूप ज्ञान नाही है॥ बहुरि सहभूत प्रवर्त्तते अर क्रमरूप प्रवर्त्तते जे अनंत चैतन्यके अंश तिनिका समुदायरूप अविभागरूप जो द्रव्यपणा ताकरि तौ एकपणा है बहुरि अविभाग एकद्रव्यविषैं व्याप्त जे सहभूत प्रवर्तते अर क्रमरूप प्रवर्तते चैतन्यके अनंत अंश, तिनिरूप पर्याय, तिनिकरि अनेकपणा है॥ बहुरि अपने द्रव्य क्षेत्र काल भावरूप होनेकी शक्तीका स्वभावपणाकरि सत्त्वरूप हैं॥ बहुरि परके द्रव्य क्षेत्र काल भावका होनेकी शक्तीका स्वभावपणाकै अभावकरि असत्त्वस्वरूप है ॥ बहुरि अनादिनिधन अविभाग एकवृत्तिरूप जो परिणमन तिसपणाकरि नित्यपणा स्वरूप है ॥ बहुरि क्रमकरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रवर्तते जे एकसमयपरिणाम अनेकवृत्तीके अंश तिनिकरि परिणमनेपणाकरि अनित्यपणा स्वरूप है ऐसे तत्पणा, अतत्पणा एकपणा अनेकपणा, सत्पणा असत्पणा, नित्यपणा अनित्यपणा प्रकट प्रकाशेही है ।। इहां तर्क, जो, आत्मवस्तूके ज्ञानमात्रपणा होतेभी स्वयमेव अनेकांत प्रकाशै है, तौ, अर्हत भगवान् तिसके साधनपणाकरि अनेकांतकूं कौन अर्थी अनुशासन करै हैं उपदेशरूप करै हैं ? ताका समाधान-जो अज्ञानी जन हैं तिनिके ज्ञानमात्र आत्मवस्तूका प्रसिद्ध करनेके अर्थी कहै हैं । निश्चयकरि अनेकांतविना ज्ञानमात्र आत्मवस्तुही प्रसिद्ध नाही होय है । सोही कहिये है । स्वभावही थकी वहुत भावनिकरि भरया जो यह लोक ताविषैं सर्वभावनिकै अपने स्वभावकरि अद्वैतपणा है । तौऊ द्वैतपणाका निषेध करनेका असमर्थपणा है । तातैं समस्तही वस्तु है सो स्वरूपविषैं प्रवृत्ति अर पररूपतैं व्यावृत्ति इनि दोऊ रीतिकरि दोऊ भावनिकरि आश्रित है, युक्त है, यह नियम है, सोही ज्ञानमात्र भावविषैं लगावना । तहां ज्ञानभाव है सो अन्य बाकीके ज्ञेयभावनिकरि सहित अपना निजज्ञानरसका भरकरि प्रवर्त्या जो ज्ञाताज्ञेयका संबंध तिसपणाकरि अनादिहीतैं ज्ञेयाकार परिणमताही दीखै है । तातैं जो अज्ञानी जन हैं सो ज्ञान तत्त्वकूं ज्ञेयरूप अंगीकार करि अज्ञानी होयकरि अर आप नाशकूं प्राप्त होय है । तिस काल यह अनेकांत है, सो अपना ज्ञानस्वरूपकरि ज्ञेयतैं भिन्न ज्ञानतत्त्वकूं प्रकट करि अर इस आत्माकूं ज्ञातापणाकरि परिणमनतैं ज्ञानी करता संता तिस आत्माकूं उदयरूप करै है । नाश न होने दे है ।। १ ।। वहुरि अज्ञानी जन जिस काल ऐसे मानैं हैं, जो यह सर्व जगत् है सो निश्चयकरि एक आत्मा है । ऐसैं अज्ञानतत्त्वकूं अपना ज्ञानस्वरूपकरि अंगीकार करि अर समस्त जगतकूं आपा मानि ग्रहण करि, अपना भिन्न आत्मा का नाश करै है । तिस काल परभावस्वरूपकरि अतत् कहिये सर्व जगत् एकही आत्मा नाही है, ऐसैं भिन्न आत्मस्वरूपपणा प्रकट करि अर यह अनेकांत है सो समस्त जगत् भिन्न ज्ञानकूं दिखावता संता आत्माका नाश नाही करने दे है ।। २ ।। बहुरि जिस काल अनेक ज्ञेयनिके आकारनिकरि खंड खंड रूप कीया जो एक ज्ञानका आकार ताकूं देखि एकांतवादी ज्ञानतत्त्वकूं नाशकूं प्राप्त करै है । तिस काल यह अनेकांत है सो ज्ञानतत्त्वके द्रव्यकरि एकपणाकूं प्रकट करता संता ताकूं जीवावै है । नाश नाही होने देवै है ।। ३ ।। वहुरि जिस काल एकांती ज्ञानका एक आकारका ग्रहण करनेका अर्थि अनेक ज्ञेयनिके आकार ज्ञानमैं आवै हैं, तिनिका त्याग करि अर ज्ञानस्वरूप आत्माका नाश करै है । तिस काल यह अनेकांत है सो ज्ञानके पर्यायनिकरि अनेकपणाकूं प्रकट करता संता आत्माका नाश नाही करने दे है ।। ४ ।। बहुरि जिस काल एकांती है सो ज्ञायमान ज्ञानमैं आते जे परद्रव्य तिनिके परिणमनतै ज्ञाताद्रव्यकूं पर द्रव्यपणाकरि अंगीकार करि आत्माका नाश करै है तिसकाल अपना स्वद्रव्यकरि आत्मा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

का सत्त्वकूं प्रकट करता संता अनेकांत है सोही तिस आत्माकूं जीवावे है नाश नाही होने दे हैं ५ बहुरि जिस काल एकांती है, सो, सर्वद्रव्यनिकूं ज्ञाताद्रव्यकरि अंगीकार तै मैंही हों, ऐसे परद्रव्य करि आत्माका नाश करै है, तिस काल, परद्रव्यरूप आत्मा नाही है, ऐसैं परद्रव्यकरि आत्माका असत्त्वकूं प्रकट करता संता अनेकांतही नाश करने नाही दे है ॥६॥ बहुरि परक्षेत्रविषैं प्राप्त जे ज्ञेय पदार्थ तिनिके आकार तिनिसारिखा परिणमनतै परक्षेत्रहीकरि ज्ञानकूं सद्रूप अंगीकार करि एकांती नाशकूं प्राप्त करै है, तिस काल अपना क्षेत्रकरि अस्तित्वकूं प्रकट करता संता अनेकांतही जीवावे है, नाश नाही होने दे है ॥ ७ ॥ बहुरि अपने क्षेत्र विषैं होनेके अर्थि परक्षेत्रविषैं प्राप्त जे ज्ञेय तिनिका आकार ज्ञानका होना ताका त्यागकरि ज्ञानकूं ज्ञेयाकाररहित तुच्छ करता संता एकांती आत्माका नाश करै है तिस काल अनेकांत है सो ज्ञानकै अपना क्षेत्रविषैं परक्षेत्रविषैं प्राप्त जे ज्ञेय तिनिके आकाररूप परिणमनेका स्वभावपणा है, ऐसैं परक्षेत्रकरि नास्तिपणाकूं प्रगट करता संता नाश करने न दे है ॥ ८ ॥ बहुरि जिस काल पूर्वे आलंबे थे ज्ञेय पदार्थ तिनिका विनाशका कालविषैं ज्ञानका असत्त्वकूं अंगीकार करि एकांती ज्ञानकूं नाशकूं प्राप्त करै है, तिस काल अपना ज्ञानहीका कालकरि अज्ञानका सत्त्वकूं प्रगट करता संता अनेकांतही ज्ञानकूं जीवावै है, नाश न होने दे है ॥ ९ ॥ बहुरि जिस काल अर्थका आलंबनका कालहीविषैं ज्ञानका सत्त्वकूं ग्रहणकरि एकांती आत्माका नाश करै है तिस काल परके कालकरि असत्त्वकूं प्रकट करता संता अनेकांतही नाश होने न दे है ॥ १० ॥ बहुरि जिस काल ज्ञायमान जाननेमैं आवता जो परभाव ताके परिणमनके आकार दीखता जो ज्ञायकभाव ताकूं परभावकरि ग्रहणकरि अर ज्ञानभावकूं एकांती नाशकूं प्राप्त करै है, तिस काल स्वभावकरि ज्ञानका सत्त्वकूं प्रकट करता संता अनेकांतही ज्ञानकूं जीवावे है नाश न होने दे है ॥ ११ ॥ बहुरि जिस काल एकांती है सो ऐसा मनावै है जो सर्व भाव हैं ते मै हौं, ऐसैं परभावकूं ज्ञायकपणाकरि अंगीकार करि, अर आत्माका नाश करै है, तिस काल परभावनिकरि ज्ञानका असत्त्वकूं प्रकट करता संता अनेकांत है सोही आत्मा का नाश न होने दे है ॥ १२ ॥ बहुरि जिस काल अनित्य जे ज्ञानके विशेष तिनिकरि खंडित भया जो नित्यज्ञानसामान्य, सो नाशकूं प्राप्त होय है ऐसा एकांत स्थापै, तिस काल ज्ञानका सामान्यरूपकरि नित्यपणाकूं प्रकट करता संता अनेकांत है सोही नाश करने न दे है ॥ १३ ॥ बहुरि जिसकाल नित्य जो ज्ञानसामान्य ताका ग्रहण करनेके अर्थि अनित्य जे ज्ञानके विशेष तिनिका त्यागकरि एकांत है सो आत्माकूं नाशकूं प्राप्त करै है, तिस काल ज्ञानके विशेषरूपकरि अनित्यपणाकूं प्रकट करता संता अनेकांत है सोही तिस आत्माकूं जीवावै है, नाश होने न दे है ॥ १४ ॥ ऐसैं चौदह भंगनिकरि ज्ञानमात्र आत्माकूं एकांत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करि तौ आत्माका अभाव होना अर अनेकांतकरि आत्माका ठहरना दिखाया । तहां तत् अतत्, अर एक अनेक, नित्य अनित्य, ऐसे तौ छह भंग भये । अर सत्त्व असत्त्वके द्रव्य क्षेत्र काल भावकरि आठ भंग कीये, ऐसे चौदह भंग जानने ॥ अब इनिके कलशरूप १४ काव्य हैं, सो कहिये हैं--

बाह्यार्थैः परिपीतमुज्झितनिजप्रव्यक्तिरिक्तीभव-
द्विश्रांतं पररूप एव परितो ज्ञानं पशोः सीदति ।
यत्तत्तत्दिह स्वरूपत इति स्याद्वादिनस्तत्पुन-
र्दूरोन्मग्नघनस्वभावभरतः पूर्णं समुन्मज्जति ॥

सं० टी०—पशोः पश्यते बध्यते कर्मेति पशुः, अज्ञानी तस्य अतत्स्वभाववादिनोऽज्ञानिनः, ज्ञानं बोधः, सीदति विशीर्णतां याति युक्तिबलाभावात्, कीदृशं तत् ? बाह्यार्थैः अचेतनपदार्थैः परिपीतं ततः समुत्पन्नो-स्तदाकारधारित्वात्तत्स्वरूपेण ज्ञानं उज्झितेत्यादिः उज्झिता त्यक्ता, निजप्रव्यक्तिः स्वप्राकट्यं, तया रिक्ती-भवत् स्वरूपावेदकत्वात् पुनः परितः समंतात् पररूपे परात्मके अचेतनादौ द्रव्ये विश्रांतं एव निश्चयेन न स्वस्वरूपे । ज्ञानस्यार्थप्राकट्यं न तु स्वप्राकट्यं ज्ञानं तु ज्ञायते खलु अर्थप्राकट्यान्यथानुपपत्त्या इत्यतदा-त्मकत्वं वदतो ज्ञानाभावप्रसंगात् अनवस्थादिदोषदुष्टत्वात् । ननु स्वात्मनि क्रियाविरोधात्स्वरूपप्रकाशात्म-कत्वं कथं तदभावात् परस्वरूपेण व्यवस्था इति चेन्न, प्रदीपस्य स्वपरप्रकाशनवत् ज्ञानस्यापि स्वपरप्रकाशा-त्मकत्वात्, का स्वात्मनि क्रिया विरुद्धा ? न तावद्धात्वर्थलक्षणा भवनाभावप्रसंगात्, उत्पत्तिलक्षणायास्तस्या अनंगीकाराच्च ज्ञप्ति लक्षणाया विरोधाभावात् । पुनः भूयः, इति युक्त्या स्याद्वादिनः अनेकांतमतावलंबिनः तत् ज्ञानं पूर्णं स्वगुणपर्यायैरभिन्नं सत् समुन्मज्जति सर्वत्र स्वप्रकाशकत्वेन समुच्छलति । इति किं ? इह जगति, यत् ज्ञानादि, तत् तत्स्वरूपं स्वपरप्रकाशात्मकं, तत् ज्ञानादि, स्वरूपतः स्वभावतः ततः तदात्मकं स्यात् । कुतः ? दूरोदित्यादिः दूरं अनंतकालं, उन्मग्नः स्वगुणिनि लयं गतः घनः निरंतरं, यः स्वभावः स्वरूपं, तस्य भरः अतिशयः तस्मात् स्वरूपस्य स्वरूपिणि लीनत्वात्तदात्मत्वमेव ॥ ५५ ॥ अथाभिन्नवादिनो मतमाशंक्य स्याद्भिन्नत्वं समाचेष्टते—

अर्थ—पशु कहिये अज्ञानी तिर्यंचसमान सर्वथा एकांती, ताका ज्ञान है सो बाह्य ज्ञेय पदार्थनिकरि समस्तपणे पीया गया ऐसा होता संता छोडि जो अपनी व्यक्ति तिनिकरि रीता भया संता समस्तपणेकरि पररूपहीकेविषैं विश्रांत भया रहि गया । अपना रूप किछू भी न रह्या, सो नष्ट भया । बहुरि स्याद्वादीका ज्ञान है सो जो अपने स्वरूपतैं जो है सो तत्स्वरूपही है, ज्ञानस्वरूपही है, ऐसे तत्स्वरूप भया संता अतिशयकरि प्रगट भया जो ज्ञानका समूहरूप स्वभाव ताके भरतैं संपूर्ण उदयरूप प्रकट होय है ॥ भावार्थ—कोई सर्वथा एकांती तौ ज्ञानकूं ज्ञेयाकार मात्रही मानै है । ताके तौ ज्ञानकूं ज्ञेय पीय गये आप कछू न रह्या । बहुरि स्याद्वादी ज्ञान अपने स्वरूपकरि ज्ञानही है, ज्ञेयाकार भया तौऊ ज्ञानपणाकूं नाहीं छोडै है । ऐसे मानै है । तातैं तत्स्वरूप ज्ञान प्रकट प्रकाशमान है ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विश्वं ज्ञानमिति प्रतर्क्य सकलं दृष्ट्वा स्वतत्त्वाशया
भूत्वा विश्वमयः पशुःपशुरिव स्वच्छंदमाचेष्टते।
यत्तत्तत्पररूपतो न तदिति स्याद्वददर्शी पुनर्वि-
श्वाद्भिन्नमविश्वविश्वघटितं तस्य स्वतत्त्वं स्पृशेत॥

सं० टी०—ननु यदुक्तं स्याद्वादिभिरभिन्नं तदिष्टमेव तथाहि प्रतिभास एवेदं यत् प्रतिभासते तत् प्रतिभास एव यथा प्रतिभासस्वरूपं प्रतिभासमानं चेदं जगत्, न चात्र जगतः, प्रतिभासमानत्वमसिद्धं साक्षादसाक्षाच्च तस्य प्रतिभासमानत्वे शब्दविकल्पगोचरातिक्रांतत्वेन वक्तुमशक्तेः प्रतिभासश्चिद्रूप एवान्यथा प्रतिभासाविरोधात् तस्य पुरुषाद्वैतत्वात् इति विश्वं ज्ञानं प्रतर्क्य विचार्य कथा ? स्वतत्त्वाशया-स्वप्रतिभासांतःप्रवेशाशया, सकलं दृष्ट्वा-प्रतिभासमयं सर्वं विलोक्य पुरुषाद्वैतमनंशं तस्य च देशकालाकारतो विच्छेदानुपलब्धेः नित्यत्वं सर्वगतत्वं निराकारत्वं च व्यवतिष्ठते। न हि कश्चिद्देशः कालः आकारश्च प्रतिभासशून्यः प्रतिभासविशेषाणां नीलसुखादीनां विच्छेदात् तेषामसत्यत्वात् यदि ते न प्रतिभासंते तर्हि संतीति कथं ज्ञायते ततो न तैरनैकांतिकः। यच्च कारकक्रियाभेदकर्मफललोकद्वैतविद्याविद्याबंधमोक्षद्वयं तद्बाधकमभ्यधायि तदपि निरस्तं तेषां प्रतिभासस्वभावत्वादन्यथा व्यवस्थानायोगात्। यदपि पक्षहेतुदृष्टांतानामुपनिषद्वाक्यानां च प्रतिभासनमप्रतिभासनमिति दूषणोद्भावनं तदपि प्रत्याख्यातं। प्रतिभासमात्रात्मत्वात्तेषां पंचविंशतिसांख्योपकल्पितानां प्रकृत्यादीनां तथात्वे हेतुत्वे दोषाभावात् स्याद्वादिनामनेकांतात्मकत्वे साध्ये सत्वादिसाधनवत्, तत्त्वानां यमनियमानशनादीनां संप्रज्ञातासंप्रज्ञातयोगफलकैवल्यादीनां च प्रतिभासात्मकत्वेन तदंतःप्रविष्टत्वसिद्धेः नैयायिकोपकल्पितप्रमाणप्रमेयादिषोडशतत्त्ववत् एवं मीमांसोपकल्पितानां भट्टप्रभाकरोपकल्पितानां चात्मजनफलादीनां योगाचारसौत्रांतिकवैभाषिकमाध्यमकांगीकृतानां क्षणक्षयलक्षणानां च चतुरार्यसत्यानां च वैशेषिकांगीकृतद्रव्यगुणकर्मादीनां षण्णां पदार्थानां लौकायितकेष्ट पृथ्व्यादीनां चतुर्णां नास्तिकाध्यासितनास्तीतितत्त्वस्य च गगनकुसुमादीनां च प्रतिभासमानत्वेन प्रतिभासांतःप्रविष्टत्वसिद्धेः। अप्रतिभासमानत्वे तद् व्यवस्थाविरोधात् तथापि तदंगीकारेऽनिष्टतत्त्वसिद्धिप्रसंगात् न केषांचित्स्वेष्टतत्त्वसिद्धिरतः प्रतिभासमानत्वमेष्टव्यं तथा चोक्तं-

सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किंचन। आरामं तस्य पश्यंति न तत्पश्यति कश्चन॥१॥

इति विश्वमयो भूत्वा कश्चिदद्वैतवादी पशुः-पशुरिव-अज्ञानीव, स्वच्छंदं--निरंकुशत्वेन, आचेष्टते-स्वेच्छयेहते प्रतिभासविशेषाणां पररूपत्वेन सत्यत्वात्। पुनः स्याद्वाददर्शी कश्चित् युक्त्या तस्य वस्तुनः स्वतत्त्वं-स्वस्वरूपतः स्वरूपं स्पृशेत्। इति किं ? यत् ज्ञानादि स्वरूपेण तत् तत्त्वं, तत्—ज्ञानादि पररूपतः-परस्वरूपतः तत्त्वं न भवति अन्यथा सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः—

नोदितो दधि खादति किमुष्ट्रं चाभिधावति।

इत्यतिप्रसंगस्य दुर्निवारत्वात्। कीदृशं तत्त्वं ? विश्वात्-समस्तपदार्थाद्भिन्नं पृथक्, पुनः अविश्वेत्यादि—अविश्वं—अविश्वस्वरूपं तच्च तद्विश्वेन विश्वपदार्थेन घटितं च निष्पादितं विश्वपदार्थपरिच्छेदकत्वात्॥ ५६॥ अथानेकत्ववादमारेक्यैकत्वमारेकते-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—पशु कहिये अज्ञानी सर्वथा एकांतवादी है सो, समस्त ज्ञेयपदार्थ हैं सो ज्ञानमय हैं, ऐसैं विचारि करि, अर सकलजगतकूं निजतत्त्वकी आशाकरि देखि आप समस्तवस्तुमयी होय। अर तिर्यंचकी ज्यों स्वच्छंद चेष्टा करै है ॥ बहुरि स्याद्वादका देखनेवाला है सो तिस ज्ञानका निजस्वरूपकूं ऐसा देखै है, जो अपने ज्ञानस्वरूपतैं तत्स्वरूप है ॥ सो पर जे ज्ञेयस्वरूप तिनितैं तत्स्वरूप नाही है ऐसे समस्तवस्तुतैं भिन्न अर समस्तज्ञेयवस्तुनिकरि घड्या तौऊ समस्त ज्ञेयस्वरूप नाही, ज्ञेयाकाररूप भया तौऊ न्यारा ऐसा ज्ञानका स्वरूप अनुभवै है ॥ भावार्थ—जो वस्तु अपना स्वरूपतैं तत्स्वरूप है सोही वस्तु परका स्वरूपतैं अतत्स्वरूप है ऐसैं स्याद्वादी देखै है। सो ज्ञान अपना स्वरूपतैं तत्स्वरूप है। तैसेही पर ज्ञेयनिका आकाररूप भया हैं तौऊ तिनितैं भिन्न है तातैं अतत्स्वरूप है। अर एकांतवादी समस्तवस्तुस्वरूप ज्ञानकूं मानि आपाकूं तिनि ज्ञेयमयी मानि अज्ञानी होय पशुकी ज्यौं स्वच्छंद प्रवर्ते है। ऐसा अतत्स्वरूपका भंग है।

विशेष—इस श्लोकसे ग्रन्थकारने ज्ञानाद्वैतवादियोंके सिद्धांतका स्वरूप बता कर उसपर घृणा प्रकटकी है तथा जैन सिद्धांतमें ज्ञानका जो स्वरूप बतलाया है उसकाभी कुछ वर्णन किया है क्योंकि ज्ञानाद्वैतवादीका मत है कि जिस प्रकार ज्ञानका निजस्वरूप ज्ञानमें प्रसिद्ध है उसीप्रकार जो पदार्थ प्रतिभासित होते हैं देखनेमें आते हैं वे भी ज्ञानमें प्रविष्ट हैं ज्ञानस्वरूप हैं यहांपर ऐसी शंका न करनी चाहिये कि यदि सब ज्ञान स्वरूप है तो घट पट आदि व्यवहार क्यों और कैसे होते हैं? क्योंकि ये सब व्यवहार अवास्तविक मिथ्या हैं सबको ज्ञानस्वरूप माननेमें कोई प्रकारका दोष नहिं आसकता तथा नैयायिक जो प्रमाण प्रमेय आदि सोलह तत्त्व मानते हैं मीमांसक आत्मा जन फल आदि छै, सांख्य प्रकृति पुरुष आदि पचीस, लोकायतिक पृथ्वी आदि पांच और नास्तिक नास्तितत्त्व मानता है वे भी सब ज्ञानस्वरूपही हैं ज्ञानसे भिन्न नहीं। परन्तु यह ज्ञानाद्वैतवादीका सिद्धांत प्रत्यक्षबाधित है घट पट आदि कभी ज्ञानस्वरूप हो नहिं सकते इसलिये जैन सिद्धांतमें जो ज्ञानको ज्ञानस्वरूप और जडपदार्थोंसे भिन्न माना है वही यथार्थ है ॥ ५६ ॥

बाह्यार्थग्रहणस्वभावभरतो विश्वग्विचित्रोल्लस-
ज्ज्ञेयाकारविशीर्णशक्तिरभितस्त्रुट्यन् पशुर्नश्यति
एकद्रव्यतया सदाप्युदितया भेदभ्रमं ध्वंसयन्नेकं-
ज्ञानमबाधितानुभवनं पश्यत्यनेकांतवित् ॥ ५७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—पशुः—सौगताख्योऽज्ञानी नश्यति- नाशं याति,—तत्कल्पितो ज्ञानक्षणो युक्त्या न व्यवस्था-मेतीत्यर्थः, कीदृक्षः सः ? अभितः—समंतात्, तुट्यन्—विनश्यन् पूर्वक्षणस्वलक्षणनिर्मूलं विनश्यदुत्तरमुत्पा-दयति। पुनः कीदृक्षः ? विश्वगित्यादिः—विश्वक् सामस्त्येन, विचित्रा—नीलपीताद्यनेकप्रकाराः, उल्लसंतः स्वाकारार्पणेनोल्लसंतः—गच्छंतः, ते च ते ज्ञेयानां—ज्ञानविषयभूतानां नीलादिक्षणानां आकारा ज्ञाने स्वाका-रार्पकत्वं तैः विशीर्णा—अनेकधा जाता शक्तिः—सामर्थ्यं यस्य नीलपीतादीनां क्षणिकत्वात् तदुत्पत्तितस्त-दाकारमनुकुर्वाणं ज्ञानं तदध्यवसायतः प्रमाणं क्षणिकं कारकगुणानां कार्यसद्भावात् क्षणिकं हि सर्वं यत्सत्त-त्क्षणिकं यथा घटः संति च नीलपीतानि च। घटाद्यवयवो न कपालांशमंतरेणोपलभ्यते। स हि अवयवी अवयवेषु वर्तमानः प्रत्यवयवं साकल्येन वर्तते एकदेशेन वा। यदि साकल्येन तदा यावंतोऽवयवास्तावंतो-ऽवयविनः। तत्रापि चावयवकल्पनायामनवस्था। एकदेशेन चेत् भंगित्वप्रसंगात एकत्वं न स्यात् इत्यादियु-क्त्या नीलपीताद्यवयवा एव। वाह्येत्यादिः—क्षणिकलक्षणानां वाह्यार्थानां ग्रहणं तदेव स्वभावः-स्वरूपं यस्य भवतोऽतिशयात् ज्ञानमपि क्षणिकं तदप्ययुक्तं यतः अनेकांतवित्स्याद्वादी, एकं पूर्वापरविवर्तव्यापितया अद्वितीयं ज्ञानं पश्यति, कीदृक्षं तत् ? अबाधितेत्यादिः—अबाधितं प्रमाणैरनुभवनं यस्य तत्, न च कस्या-पीदृशी प्रतीतिर्मया क्षणिकं वस्तु लब्धमिति सर्वेषां साधारणस्थूलघटादीनां प्राप्तेः, एकद्रव्यतया अहं मतिज्ञानी स एवाहं श्रुतज्ञानी यदेव मया दृष्टं तदेव मया लब्धमित्येकद्रव्यत्वेन भेदभ्रमं—भिन्नज्ञानभ्रांतिं ध्वंसयन्—विनाशयन् अन्यथा जीवांतरवत् स्वात्मन्यपि भेदप्रसंगात् स्याद्वादी कीदृक्षया तया ? सदा व्युदि-तया—सदा—नित्यं, आबालगोपालचांडालाबालादीनां प्रसिद्धया विद्यमानतया॥ ५७॥ अथैकज्ञानमतमति निराचिकीर्षुरनेकतां ज्ञानस्य चिकीर्षति—

अर्थ—पशु कहिये अज्ञानी सर्वथा एकांतवादी है सो ज्ञानका स्वभाव बाह्य ज्ञेयपदार्थका ग्रहणरूप है ताके भरतैं समस्त अनेक उदय भये प्रकट ज्ञानमैं आये जे ज्ञेयनिके आकार तिनि-करि खंड खंड विगडी है शक्ति जाकी ऐसा भया संता समस्तपर्णौंकरि तूटता खंड खंड होता आप नाशकूं प्राप्त होय है। बहुरि अनेकांतका जाननेवाला है सो सदा उदयरूप जो ज्ञानका एकद्रव्यपणा तिसकरि ज्ञेयनिके आकार होनेतैं भया जो सर्वथा भेदका भ्रम ताही दूरि करता संता निर्बाध अनुभवनस्वरूप ज्ञानकूं एक देखै॥ भावार्थ—ज्ञान है सो ज्ञेयनिके आकार परिण-मनेतैं अनेक दीखे हैं। ताकूं सर्वथा एकांतवादी अनेक खंडखंडरूप देखता संता ज्ञानमय जो आपा ताका नाश करै हैं। अर स्याद्वादी ज्ञानकूं ज्ञेयाकार भया है तौऊ सदा उदयरूप द्रव्यपणाकरि एक देखै है। यह एकस्वरूप भंग है॥

ज्ञेयाकारकलंकमेचकचिति प्रक्षालनं कल्पय—

न्नेकाकारचिकीर्षया स्फुटमपि ज्ञानं पशुर्नेच्छति।

वैचित्र्येऽप्यविचित्रतामुपगतं ज्ञानं स्वतः क्षालितं

पर्यायैस्तदनेकतां परिमृशन् पश्यत्यनेकांतवित्॥ ५८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—पशुः—अज्ञानी सांख्यादिः कश्चित्, स्फुटमपि—अनेकाकारतया व्यक्तमपि ज्ञानं नेच्छति, कीदृक्षः सन् ? एकेत्यादिः—ज्ञानस्य एकाकारं—एकत्वं, चिकीर्षया—कर्तुमिच्छया,ज्ञेयेत्यादिः—ज्ञेयस्य—पदार्थस्य, आकारः—ज्ञाने तदाकारः, स एव कलंकः—कालिमा, ज्ञाने तदाकारस्याभावात् एकस्वभावत्वात्तस्य कूटस्थनित्यत्वात् तेन मेचकः—चित्रितः, चित्—ज्ञानं, तत्र प्रक्षालनं अनेकाकारनिवारणं, कल्पयन्—कुर्वन्, तत्राह अनेकांतवित् तत्—ज्ञानं, पश्यति—ईक्षते, कीदृशं तत् ? पर्यायैः—मतिश्रुतादिज्ञानविवर्तैः, अनेकतां—कथंचिदनेकत्वं परिमृशन्—अंगीकुर्वन्, सर्वथैकत्वे नानाज्ञेयग्रहणं न स्यात् एकार्थज्ञानस्य नित्यमसंभवात् तदभावः स्यात्। तदुक्तमष्टसहस्र्यां—

प्रमाणकारकैर्व्यक्तं व्यक्तं चेदिंद्रियार्थवत्। ते च नित्ये विकार्यं किं साधोस्ते शासनाद्बहिः ॥१॥ इति

ननु ज्ञानं पर्यायैरनेकत्वं दधदशुद्धं स्यात् पर्यायस्याशुद्धत्वख्यापनात् इति चेन्न, स्वतः—स्वभावतः, क्षालितं—निर्मलं, यतः। ननु ज्ञानस्यानेकत्वमेवेष्टं दृष्टेष्टानां तद्विषयानामिष्टत्वात् जगतो विचित्रत्वात् ? इति चेन्न कुतः ? पर्यायापेक्षया वैचित्र्येऽपि एकज्ञानद्रव्यतया अविचित्रतां—एकस्वरूपतां, उपगतं—प्राप्तं, अतः कथंचिदेकं द्रव्यार्पणात्, कथंचिदनेकं पर्यायार्पणात् ॥५८॥ अथ परद्रव्यास्तित्वन्यस्तं ज्ञानं निराकृत्य स्वास्तित्वास्तिक्यमागम्यते—

अर्थ—पशु अज्ञानी सर्वथा एकांतवादी है सो ज्ञेयनिके आकारनिकरि कलंककरि अनेकाकाररूप मलिन जो चैतन्य ताविषैं एक चैतन्यका मात्र आकार करनेकी इच्छा करि प्रक्षालन कहिये धोवना कल्पता संता ज्ञान अनेकाकार प्रकट है तौऊ ताकूं नाही मानै है एकाकारही मानि ज्ञानका अभाव करै है। बहुरि अनेकांतका जाननेवाला है सो ज्ञेयाकारकरि ज्ञानका विचित्रपणा है तौऊ एकपणाकूं प्राप्त ज्ञान है सो आप स्वयमेव प्रक्षाल्या हुवा शुद्ध है, एकाकार है अर पर्यायनिकरि ताके अनेकताकूं अनुभवै है ॥ भावार्थ—एकांतवादी तौ ज्ञानविषैं ज्ञेयाकारकूं मैल जाणि एकाकार करनेकूं ज्ञेयाकारकूं धोय दूरि करी ज्ञानका नाश करै है। बहुरि अनेकांती ज्ञानकूं स्वरूपकरि अनेकाकारपणा मानै है। सो ऐसा वस्तुस्वभाव है सो सत्यार्थ है ऐसा अनेकस्वरूप भंग है ॥

विशेष—इस श्लोकमें ज्ञानको कथंचित् एकाकार और कथंचित् अनेकाकार बतलाया है यहांपर यह शंका करना अनुचित है कि यदि ज्ञान पर्यायोंकी अपेक्षा अनेकाकार है तो पर्यायों के अशुद्ध होनेसे ज्ञानभी अशुद्ध होगा ? क्योंकि यह ज्ञान स्वभावसे ही निर्मल है वह अशुद्ध नहिं हो सकता। यदि कहो ज्ञानका विषय समस्त जगत है और वह विचित्र-अनेकाकार है इसलिये ज्ञानके भी सर्वथा अनेकाकार ही मान लेना चाहिये सो ठीक नही क्योंकि उसकी ज्ञानद्रव्य एक ही है इसलियें द्रव्यार्थिक नयकी अपेक्षा वह एक पर्यायार्थिक नयकी अपेक्षा अनेक है ॥ ५८ ॥

प्रत्यक्षालिखितस्फुटस्थिरपरद्रव्यास्तितावंचितः
स्वद्रव्यानवलोकनेन परितः शून्यः पशुर्नश्यति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वद्रव्यास्तितया निरूप्य निपुणं सद्यः समुन्मज्जता
स्याद्वादी तु विशुद्धबोधमहसा पूर्णो भवन् जीवति ॥ ५९ ॥

सं० टी०—पशुः—परद्रव्येण सदिति प्रतिपद्यमानः कश्चित् नश्यति स्वपक्षाद्वेषं लक्षयति—परितः—सामस्त्येन स्वेत्यादिः—स्वस्य—आत्मनः, द्रव्यं द्रवति द्रोष्यति अदुद्रवत् स्वगुणपर्यायान् इति द्रव्यं, तदस्तित्वानवलोकनेन—स्वास्तित्वानीक्षणेन शून्यः, पुनः कीदृक्षः ? प्रत्यक्षेत्यादिः—प्रत्यक्षेण—[illegible] आलिखिता आज्ञावा, स्फुटा—व्यक्ता, स्थिरा—अनेककालस्थायित्वात् सा चासौ परद्रव्यास्तिता च, न च घटास्तित्वं पटास्त्विेऽस्ति सर्वस्य सर्वार्थक्रियाकरणात्, नहि पटादयः घटादय इव पय आहरणलक्षणामर्थक्रियां कुर्वंति घटादिज्ञाणं वा इति परास्तित्वाभावेपि तया वंचितः। स्याद्वादी तु कथं व्यवतिष्ठते—अनेकांतमतमतिः स्वतत्त्वं जीवति स्थिरं स्थापयतीत्यर्थः। कीदृक्षः ? विशुद्धेत्यादि—विशुद्धज्ञानतेजसा पूर्णो भवन्—स्वमनोरथं पूर्णीकुर्वन्, कीदृशेन तेन समुन्मज्जता—समुच्छलता, जगति प्रकाशं गच्छता, किंकृत्वा ? सद्यः—तत्कालं, स्वेत्यादिः—स्वस्य—आत्मनः द्रव्यास्तित्वं तया निपुणं यथोक्तं अस्तित्वं निरूप्य अवलोक्य ॥ ५९ ॥ अथ परद्रव्यस्वरूपं ब्रह्मेतिवादिनं प्रति परद्रव्येणासदिति संन्यस्यते—

अर्थ—पशु अज्ञानी एकांतवादी है सो प्रत्यक्षप्रमाणकरि आलिखित कहिये चितारया हुवा दीखता स्फुट प्रकट स्थूल अर स्थिर कहिये निश्चल ऐसा परद्रव्यकूं देखि तिसका अस्तित्वकरि ठिग्या हुवा अपना निज आत्मद्रव्यका अस्तित्व नाही देखनेकरि समस्तपणैं सर्वथाशून्य होता आपका नाश करै है। बहुरि स्याद्वादी है सो अपना निजद्रव्यका अस्तिपणाकरि निपुण जैसे होय तैसैं निज आत्मद्रव्यका निरूपणकरि तत्काल प्रकट होता जो विशुद्धज्ञानरूप तेज ताकरि पूर्ण होता जीवै नष्ट न होय है॥ भावार्थ—एकांती बाह्य परद्रव्यकूं प्रत्यक्ष देखि ताहीका अस्तित्व मान्या। अर अपना आत्मद्रव्य इन्द्रियप्रत्यक्षकरि दीख्या नाही। जाकूं शून्य मानि आत्माका नाश करै है॥ बहुरि स्याद्वादी ज्ञानरूप तेजकरि अपना आत्मद्रव्यका अस्तित्वके अवलोकनकरि आप जीवै है, आपका नाश नाहीं करै है। यह स्वद्रव्यअपेक्षा अस्तित्वका भंग है॥

सर्वद्रव्यमयं प्रपद्य पुरुषं दुर्वासनावासितः
स्वद्रव्यभ्रमतः पशुः किल परद्रव्येषु विश्राम्यति।
स्याद्वादी तु समस्तवस्तुषु परद्रव्यात्मना नास्तितां
जानन्निर्मलशुद्धबोधमहिमा स्वद्रव्यमेवाश्रयेत् ॥ ६० ॥

सं० टी०—पशुः—अद्वैतैकांतावलंबी, स्वेत्यादिः—स्वस्य द्रव्यं तस्य भ्रमतः—भ्रांतेः, परद्रव्येषु समस्तचेतनाचेतनेष्वपरद्रव्येषु, किल—निश्चितं, विश्राम्यति—विश्रामं याति, परद्रव्यं सर्वं स्वद्रव्यमिति कृत्वा तिष्ठति, किंकृत्वा ? पुरुषं—ब्रह्म, सर्वद्रव्यमयं—समस्त—चेतनेतरवस्तुमयं प्रपद्य—अंगीकृत्य, तदभ्युपगमे वेदवाक्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"पुरुष एवेदं यद्भूतं यच्च भाव्यं स एव हि सकललोकप्रलयस्थितिहेतुरिति" सर्वेषां प्रतिभासमानत्वेन प्रतिभासांतः-प्रविष्टत्वं तस्यैकत्वे घटपटलकुटमुकुटशकटादीनां भेदस्तु दुर्वासनावासितः-दुर्वासनया अविद्यया सदसन्नित्यानित्यैकानेकादिरूपेण प्रतिभासमानया वासितः—कल्पितः इति वदन् अद्वैतदुर्वासनावासितः दुर्वासनया-अनादिकालभूतमहामोहाख्ययाऽविद्यया वासितः-वासनाविषयीकृतः। स्याद्वादी तु समस्तवस्तुषु सर्वपदार्थेषु स्वद्रव्यमेव स्वद्रव्येणास्तित्वमेव आश्रयेत्—भजेत्। किंकुर्वन् ? तेषु परद्रव्यात्मना—परस्वरूपेण नास्तितां जानन् प्रमाणबलान्नास्तित्वमभ्युपगच्छन्, कीदृक्षः सः ? निर्मलेत्यादिः-निर्मलः-द्रव्यमलकलंकरहितः, शुद्धः—भावकर्मविकलः, स चासौ बोधश्च तेन महिमा-माहात्म्यं यस्य सः ॥ ६० ॥ अथ परक्षेत्रास्तित्वं निराकुर्वन् स्वक्षेत्रास्तित्वं तुदति—

अर्थ-पशु अज्ञानी एकांतवादी है सो पुरुष जो आत्मा ताकूं सर्वद्रव्यमयी एक कल्पिकरि अर कुनयकी वासनाकरि वासित हुआ प्रकट परद्रव्यविषैं स्वद्रव्यका भ्रमकरि विश्राम करै है। बहुरि स्याद्वादी है सो समस्तही वस्तुविषैं परद्रव्यस्वरूप करि नास्तिताकूं जानता संता-निर्मल है शुद्धज्ञानकी महिमा जाकी ऐसा हुवा स्वद्रव्यहीकूं आश्रय करै है॥ भावार्थ-एकांतवादी तौ सर्वद्रव्यमय एक आत्माकूं मानि परद्रव्य अपेक्षा नास्तिता है ताका लोप करै है। अर स्याद्वादी समस्तविषैं परद्रव्य अपेक्षा नास्तिता मानि अपना निजद्रव्यमें रमै है। यह परद्रव्य अपेक्षा नास्तिताका भंग है ॥

भिन्नक्षेत्रनिषण्णबोध्यनियतव्यापारनिष्ठः सदा
सीदत्येव वहिः पतंतमभितः पश्यन् पुमांसं पशुः।
स्वक्षेत्रास्तितया निरुद्धरभसः स्याद्वादवेदी पुन-
स्तिष्ठत्यात्मनिखातबोध्यनियतव्यापारशक्तिर्भवन् ॥ ६१ ॥

सं० टी०—कश्चिन्नैयायिकादिः पशुः-अज्ञानी, सीदत्येव-स्वस्थित्यभावाद्विषादं यात्येव। किंकुर्वन् ? अभितः-समंतात् वहिः पतंतंस्वक्षेत्रात्परक्षेत्रे पतंतं, पुमांसं-आत्मानं, पश्यन्-अवलोकयन्, सदा-नित्यं आत्मनः व्यापकत्वांगीकारात, कीदृशः सः ? भिन्नेत्यादिः-भिन्नं च तत् क्षेत्र तत्र निषण्णं-वर्तमानं तच्च तद्बोध्यं-ज्ञातुं योग्यं द्रव्यं च तत्र नियतः-निश्चितः, व्यापारः सन्निकर्षादिक्रिया-आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियं अर्थेन इन्द्रियाणां प्राप्यकारित्वनियमात् इतिसान्निकर्षादिव्यापारः बोध्यक्षेत्रगमनलक्षणः तत्र निष्ठः, तत्पक्षावलंबी स्वव्यवस्थानाभावात्सीदत्येव। स्याद्वादवेदी पुनः कथं तिष्ठति ? स्वेत्यादिः स्वस्य क्षेत्रे अस्तिता-अस्तित्वं तया निरुद्धरभसः सन्निकर्षादीनां निरुद्धो रभसः-वेगः, येन सः, प्रमाणपरीक्षादौ. सन्निकर्षस्य गतादावतिप्रसंगेन दूषितत्वात्। नायनसन्निकर्षस्य घटरूपयोः समवेतयोः सद्भावे समवेतयोर्घटरसयोः स कथं न स्यात् इति निरस्तत्वात्। तर्हि क्वचिदपि बोध्ये आत्मनो व्यापित्वं न स्यात् इति वदंतं प्रति स्याद्वादवादी कीदृक्षो भवंस्तिष्ठति ? आत्मेत्यादिः-आत्मनि स्वस्मिन् निखातं व्यवस्थितं तच्च यद्बोध्यं च स्वरूपलक्षणं बोध्यमित्यर्थः तत्र नियता-निश्चिता व्यापारशक्तिः, येन स ईदृक्षो भवन् सन ॥ ६१ ॥ अथ परक्षेत्रे नास्तित्वाभावं वदंतं प्रति परक्षेत्रे नास्तित्वं क्वणति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–पशु अज्ञानी एकांतवादी है सो भिन्नक्षेत्रविषें तिष्ठया जे ज्ञेयपदार्थ तिनिविषैं ज्ञेयज्ञायकसंबंधरूप निश्चितव्यापारविषैं तिष्ठया संता पुरुषकूं समस्तपणे बाह्यज्ञेयनिविषैंही पडता संता ताकूं देखता संता कष्टहीकूं प्राप्त होय है। बहुरि स्याद्वादका जाननेवाला है सो अपने क्षेत्रविषें अपना अस्तिपणाकरि रोक्या है अपना रभस ज्यानैं ऐसा भया संता आत्माहीविषैं आकाररूप भये जे ज्ञेय तिनिका निश्चितव्यापारकी शक्तिरूप होता संता अपने क्षेत्रहीविषें अस्तित्वरूप तिष्ठै है ॥ भावार्थ–एकांतवादी तौ भिन्नक्षेत्रविषैं ज्ञेय पदार्थ तिष्ठै हैं तिनिके जाननेके व्यापाररूप होता पुरुषको बाह्य पडताही मानि नष्ट करै है। बहुरि स्याद्वादी अपना क्षेत्रविषैंही तिष्ट्या पुरूष अन्यक्षेत्रविषैं तिष्ठते ज्ञेयनिकूं जानता संता अपने क्षेत्रहीविषैं अस्तित्वकूं धारै है, ऐसा मानता संता आत्माहीविषैं तिष्ठै है। यह स्वक्षेत्रविषैं अस्तित्वका भंग है ॥ ६१ ॥

स्वक्षेत्रस्थितये पृथग्विधपरक्षेत्रस्थितार्थोज्झना-
त्तुच्छीभूय पशुः प्रणश्यति चिदाकारान् सहार्थैर्वमन् ।
स्याद्वादी तु वसन् स्वधामनि परक्षेत्रे विदन्नास्तितां
त्यक्तार्थोऽपि न तुच्छतामनुभवत्याकारकर्षी परान् ॥ ६२ ॥

सं० टी०—पशुः कश्चिदज्ञानी प्रणश्यति–स्वक्षयं नयति, किंकृत्वा ? पृथगित्यादिः पृथग्,–भिन्नं, विधिः प्रयोजनं येषां ते ते च ते परक्षेत्रे–स्वक्षेत्रादपरक्षेत्रे, स्थितार्थाश्च तेषां उज्झनं–परिहरणं तस्मात् तुच्छभूय निस्स्वभावं भूत्वा, किमर्थं ? स्वक्षेत्रे स्थितये–स्वक्षेत्रे भवनाय। स्याद्वादी तु पुनः परान् परिच्छेद्यपदार्थान्, आकारकर्षी आकारग्राही सन्. न तुच्छतां–न तुच्छभावतां, अनुभवति। ननु पराकारकर्षी स्याद्वादिबोधः परार्थग्राही स्यादित्याशंकायामाह–त्यक्तार्थोऽपि त्यक्तपरद्रव्योऽपि परिच्छिनत्ति। त्यक्तार्थत्वं कथं ? परक्षेत्रे स्वक्षेत्रादपरक्षेत्रे नास्तितां वदन्–प्रतिपादयन्। ननु परक्षेत्र इव स्वक्षेत्रे मास्त्वति चेन्न यतः स्वधामनि स्वक्षेत्रे वसन्–अस्तित्वं भजन्, पुनः किं कुर्वन् ? चिदाकारान्–चित्पर्यायान, वमन् उद्गिरन, कैः सह ? अर्थैः–पदार्थैः ॥ ६२ ॥ अथ स्वकालास्तित्वं प्रीणाति—

अर्थ–पशु अज्ञानी एकांतवादी है सो अपना क्षेत्रविषैं तिष्ठनेके अर्थी न्यारे न्यारे परक्षेत्रविषैं तिष्ठे ज्ञेय पदार्थ तिनके छोडनेतैं तुच्छ होयकरि अपने चैतन्यके ज्ञेयरूप आकारनिकूं परज्ञेय अर्थकी साथि रमता संता जैसैं अर्थनिकूं छोडै तैसैं चैतन्यके आकारनिकूंभी छोडै। तव आपा तुच्छ रह्या। ऐसा आपका नाश करै है। बहुरि स्याद्वादी अपने क्षेत्रविषैं वसता संता परक्षेत्र विषैं अपनी नास्तिताकूं जानता संता यद्यपि परक्षेत्र ज्ञेय पदार्थनिकूं छोडै है तौऊ अपने चैतन्यके ज्ञेयरूप आकार भये तिनिकूं परतैं खेचनेवाला होता तुच्छताकूं नाहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुभवै है नष्ट नाही होय है ॥ भावार्थ—एकांती तौ परक्षेत्रविषैं तिष्ठते ज्ञेयपदार्थनिके आकार चैतन्यके आकार भये तिनिकूं जैसे अर्थनिकैं छोड़े है तैसे चैतन्यके आकारनिकूं भी छोडै है ऐसैं जानै है। चैतन्यके आकारनिकूं अपना करूंगा तो अपना क्षेत्र छुटि जायगा। तातैं आप चैतन्यके आकाररहित तुच्छ होय है, नष्ट होय है। बहुरि स्याद्वादी ज्ञेयपदार्थनिकूं छोडै है, तौऊ चैतन्यके आकारनिकूं छोड़ै नाही है। अपने क्षेत्रविषैं वसता परक्षेत्र विषैं अपनी नास्ति ताकूं जानता तुच्छ नाही होय है, नष्ट नाही होय है ॥ यह परक्षेत्रनास्तितताका भंग है ॥

पूर्वालंबितबोध्यनाशसमये ज्ञानस्य नाशं विदन्
सीदत्येव न किंचनापि कलयन्नत्यंततुच्छः पशुः ।
अस्तित्वं निजकालतोऽस्य कलयन् स्याद्वादवेदी पुनः
पूर्णस्तिष्ठति वाह्यवस्तुषु मुहुर्भूत्वा विनश्यत्स्वपि ॥ ६३ ॥

सं० टी०—पशुः-कश्चिदज्ञानी, सीदत्येव-विनश्यत्येव, किं कुर्वन् ? पूर्वेत्यादिः—पूर्वं-स्वोत्पत्तिक्षणे, आलंबितं-ज्ञेयस्वरूपेण अवलंबितं तच्च तद्बोध्यं च ज्ञेयं तस्य नाशः क्षयः तस्य समये-क्षणे, ज्ञानस्य बोधस्य, नाशं-विनाशं विदन्—जानन् अत्यंततुच्छः अत्यंतं-निश्शेषं तुच्छः-निस्स्वभावः सर्वेषां तुच्छस्वभावत्वात् निरन्वयविनाशात् । सोऽपि वादी तुच्छस्वभावः तन्मध्ये पतितत्वात् किंचनापि-किमपि, चेतनाचेतनं स्थिरं न कलयन् । पुनः स्याद्वादवेदी पूर्णः-पूर्वापरकालस्थायित्वेन पूर्णमनोरथस्तिष्ठति आस्ते । किंकुर्वन् ? अस्य-ज्ञानस्य, निजकालतः-स्वकालतः, अस्तित्वं कलयन् किंकृत्वा ? मुहुः-पुनः, वाह्यवस्तुषु वहिःपदार्थेषु, भूत्वा-तद्ग्राहकस्वरूपेणोत्पद्य, कीदृशेषु तेषु ? विनश्यत्स्वपि-पर्यायापेक्षया प्रतिक्षणं विनाशं गच्छत्सु अपि शब्दात् द्रव्यादेशादविनश्यत्सु । वाह्यपदार्थेषु विनश्यत्स्वपि, ज्ञानं न विनश्यति स्वकाले सत्त्वात् ॥ ६३ ॥ अथ परकाले नास्तित्वमाविभूते—

अर्थ—पशु अज्ञानी एकांतवादी है सो पूर्वकालमैं आलंबे जे ज्ञेयपदार्थ तिनिका नाश होनेके समयविषैं ज्ञानका भी नाशकूं जानता संता किछू भी नाही जानता संता तुच्छ भया नाशकूं प्राप्त होय है। बहुरि स्याद्वादका वेदी है सो इस आत्माका अपने कालतैं अस्तित्वकूं जानता संता वाह्यवस्तु वारम्वार होयकरि नष्ट होते संते भी आप पूर्णही तिष्ठै है ॥ भावार्थ—पहिले ज्ञेय पदार्थ जाने थे उत्तरकालमैं विनसि गये तिनिकूं देखि एकांती अपना ज्ञानकाभी नाश मानि अज्ञानी हुवा आत्माका नाश करै है। बहुरि स्याद्वादी ज्ञेयपदार्थनिकूं नष्ट होतैभी अपना अस्तित्व अपनाही कालतैं मानता नष्ट न होय है ॥ यह स्वकालअपेक्षा अस्तित्वका भंग है ॥६३॥

अर्थालंबनकाल एव कलयन् ज्ञानस्य सत्त्वं वहि—
र्ज्ञेयालंबनलालसेन मनसा भ्राम्यन् पशुर्नश्यति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नास्तित्वं परकालतोऽस्य कलयन् स्याद्वादवेदी पुन—
स्तिष्ठत्यात्मनिखातनित्यसहजज्ञानैकपुंजीभवन् ॥ ६४ ॥

सं० टी०—पशुः-कश्चिदज्ञानी, परकाले वस्तुनोऽस्तित्ववादी नश्यति-स्वपक्षक्षयेण स्वयं क्षयं याति। कीदृक्षः सन्? मनसा-चित्तेन कृत्वा भ्राम्यन्-अन्यथार्थस्यान्यथार्थकल्पनया भ्रमं गच्छन्, कीदृशेन तेन? वहिरित्यादिः-वहिर्ज्ञेयं-वाह्याचेतनादिद्रव्यं तदेवालंबनं-अवलंबनं तत्र लालसं यत्तेन, पुनः कीदृक्षः सः? अर्थेत्यादिः-अर्थस्य-ज्ञेयस्य आलंबनं तदुत्पत्त्यादिवशादवलंबनं तस्य काले-समये एव ज्ञानस्य सत्त्वं अस्तित्वं, कलयन्-अंगीकुर्वन् तदुक्तं तन्मते—

अर्थस्यासंभवे भावात्प्रत्यक्षे च प्रमाणता। प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयं ॥ इति ॥

अर्थालंबनलक्षणे परकाले सत्त्वे सर्वदा सत्त्वप्रसंगात्। स्याद्वादवेदी पुनः अस्य-ज्ञानस्य परकालतः परकालेन, नास्तित्वं-असत्त्वं कलयन्-अंगीकुर्वन्, तिष्ठति-आस्ते, ननु यथा परकालेन नास्तित्वं स्याद्वादिनां तथा स्वकालेऽपि तदस्तु इति चेन्न यतः आत्मेत्यादिः-आत्मनि-चिद्रूपे, निखातं-आरोपितं तच्च तन्नित्यं-द्रव्यरूपतया शाश्वतं, सहजज्ञानं च चिद्रूपस्य शाश्वतिकत्वे ज्ञानस्यापि शाश्वतिकत्वात् तत्काले तस्य सद्भावः तस्य एकपुंजीभवन्-अद्वितीयसमूहः सन् ॥ ६४ ॥ अथ स्वभावास्त्विमनुभूयते—

अर्थ—पशु अज्ञानी एकांतवादी है, सो ज्ञेयपदार्थके आलंबनकालही ज्ञानका अस्तित्व जानता संता वाह्यज्ञेयका आलंबनविषैं चित्तकूं अनुरागसहित करि अर वाह्य भ्रमता संता नाशकूं प्राप्त होय है। बहुरि स्याद्वादका वेदी है सो परकालतैं अपना आत्माका नास्तित्वकूं जानता संता आत्माविषै उकिरया जो नित्य स्वाभाविक ज्ञानपुञ्ज तिस स्वरूप होता संता तिष्ठै है नष्ट न होय है॥ भावार्थ—एकांती तौ ज्ञेयके आलंबनके कालही ज्ञानका सत्त्व जानै है सो ज्ञेयके आलंबनविषैं मन लगाय वाह्य भ्रमता संता नष्ट होय है। बहुरि स्याद्वादी ज्ञेयके कालतैं अपना अस्तित्व नाही जानै है, अपनेही कालतैं अपना अस्तित्व जानै है। तातैं ज्ञेयतैं न्यारा ही अपना ज्ञानका पुञ्जरूप होता नष्ट न होय है यह परकाल अपेक्षा नास्तित्वका भंग है ॥६४॥

विश्रांतः परभावभावकलनान्नित्यं वहिर्वस्तुषु
नश्यत्येव पशुः स्वभावमहिमन्येकांतनिश्चेतनः।
सर्वस्मिन्नियतस्वभावभवनज्ञानाद्विभक्तो भवन्
स्याद्वादी तु न नाशमेति सहजस्पष्टीकृतप्रत्ययः ॥ ६५ ॥

सं० टी०—पशुः-परभावेनात्मानं मन्यमानः कश्चिदज्ञाता, नश्यत्येव कीदृशः? नित्यं-निरंतरं वहिर्वस्तुषु-नीलादिज्ञेयलक्षणेषु, विश्रांतः-स्थितः, कुतः? परेत्यादिः-परे च ते भावाश्च नीलपीतादयस्तेषां भावः स्वभावः, तस्य कलना-ग्रहणं, आत्मसात्करणं तस्मात्। स्याद्वादवेदी तु न नाशमेति-विनाशं न प्राप्नोति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कीदृशः ? सहजेत्यादिः सहजः-स्वाभाविकः स्पष्टीकृतः प्रत्ययः-ज्ञानं, येन सः, स्वस्वभावनियतत्वात् सर्वस्माद् ज्ञेयाद्विभक्तः-भिन्नः, भवन्-सन् परभावस्वभावग्राहकत्वाभावात् । कुतः ? नियतेत्यादिः नियतः निश्चितः, स्वभावः—चैतन्यादिस्वरूपं, तेन भवनं यस्य तच्च तज्ज्ञानं च तस्माद्, कीदृक्षः सः ? स्वेत्यादिः स्वस्य भावः पर्यायः, ज्ञानादिलक्षणः, तस्य महिमा—माहात्म्यं यत्र तस्मिन्नात्मनि, एकांतेत्यादिः एकांतत् सर्वथास्तित्वनास्तित्वादेः निर्गतं चेतनंज्ञानं, यस्य सः, आत्मनि एकांतज्ञानाभावात् अनेकांतज्ञानं ॥ ६५ ॥ अथापरपर्यायपरं ब्रह्म निषेधयन् परस्वरूपेण सदित्युद्घाटयति—

अर्थ—पशु अज्ञानी एकांतवादी है सो परभावकूं ही अपना भाव जाननेतैं वाह्यवस्तुनिविषैं विश्राम करता संता अपना स्वभावकी महिमाविषैं एकांतकरि निश्चेतन भया जड होता संता आप नाशकूं प्राप्त होय है । बहुरि स्याद्वादी है सो सर्वहीं वस्तुविषें अपना निश्चित नियमरूप जो स्वभावभावका भवनस्वरूप ज्ञान तातैं सर्वतैं न्यारा होता संता सहजस्वभावका—स्पष्ट प्रत्यक्ष अनुभवरूप कीया है प्रत्यय कहिये प्रतीतिरूप जानपना जानैं ऐसा भया नाशकूं नाही प्राप्त होय है भावार्थ—एकांती तो परभावकूं निजभाव जानि वाह्यवस्तूविषैं विश्राम करता संता आत्माका नाश करै हैं। वहुरि स्याद्वादी अपना ज्ञानभाव यद्यपि ज्ञेयाकार होय है, तथापि ज्ञानहीकूं अपना भाव जानता संता आपका नाश नाही करै है ॥ यह अपना भावकी अपेक्षा अस्तित्वका भंग है ॥६५॥

अध्यास्यात्मनि सर्वभावभवनं शुद्धस्वभावच्युतः
सर्वत्राप्यनिवारितो गतभयः स्वैरं पशुः क्रीडति ।
स्याद्वादी तु विशुद्ध एव लसति स्वस्य स्वभावं
भरादारूढः परभावभावविरहव्यालोकनिष्कंपितः ॥ ६६ ॥

सं० टी०—सर्वभावमयं पुरुषं कल्पयन् पशुः-कश्चिदज्ञानी, स्वैरं-स्वेच्छया, यमनियमासनाद्यभावात्, क्रीडति-विहरति इतस्ततः । कीदृक्षः ? गतभयः-गतः—नष्टः, भयः-इहपरलोकादिलक्षणो यस्य सः, सर्वस्य ब्रह्ममयत्वादिहपरलोकाद्यभावः, पुनः सर्वत्रापि-निषिद्धानुष्ठानेऽपि अनिवारितः अलाबूनि मज्जंति । ग्रावाणः प्लवंते, अंधो मणिमविंदत् तमनंगुलिरावतत् उत्ताना वै देवगावो वहंतीत्यादीनां वेदवाक्यानां पूर्वापरविरुद्धानां मातृगमनादिप्ररूपकानां च सद्भावान्न तेषां कश्चिन्निवारकः । पुनः शुद्धेत्यादिः—शुद्धस्वभावे च्युतः शुभाशुभपर्यायमयत्वात्, किंकृत्वा ? आत्मनि-चिद्रूपे, सर्वेत्यादिः-सर्वभावानां-समस्तस्वभावानां, भवनं-अस्तित्वं, अध्यास्य-अध्यारोप्य । स्याद्वादी तु विशुद्ध एव—निर्मलस्वज्ञाननियत एव लसति विलासं करोति दृष्टेष्टविरोधाभावात् । कीदृक्षः ? भरात्—अतिशयेन, स्वस्य-आत्मनः, स्वभावं-स्वरूपं, आरूढः-विश्रांतः, स्वभावेन सत्वात् तर्हि परस्वभावेनाप्यस्तु तन्निवारणार्थमाह-परेत्यादि-परे च ते भावाश्च चेतनाचेतनादयश्च तेषां भावाः पर्यायाः रागद्वेषनीलपीतादयः तेषां विरहेण-अभावेन, व्यालोकः-स्वतत्त्वावलोकनं तेन निष्कंपितः-निश्चलः, प्रमाणप्रसिद्धत्वात् ॥ ६६ ॥ अथ सर्वस्य क्षणभंगाभोगभंगिसंगतस्य तत्त्वस्य निरसनव्यसनं नित्यत्वं पणायते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ–पशु अज्ञानी एकांतवादी है सो अपने आत्माविषैं सर्वज्ञेयपदार्थनिका होना निश्चय करि अर शुद्धज्ञानस्वभावतैं च्युत भया संता सर्वपदार्थनिविषैं निःशंक वर्जनारहित स्वेच्छाचारी भया क्रीडा करै है। अपना भावका लोप करै है। बहुरि स्याद्वादी है सो अपनाही भावविषैं सर्वथा आरूढ भया परभावके अपने भावविषैं अभावका प्रकटपणा है ताकरि निश्चय भया शुद्धही शोभायमान है ॥ भावार्थ–एकांती तौ परभावनिकूं आपा जानि अपने शुद्धस्वभावसूं च्युत भया सर्वत्र निःशंक स्वेच्छातैं प्रवर्ते है। बहुरि स्याद्वादी परभावनिकूं जानै है तौऊ तिनितैं न्यारा अपना आत्माकूं शुद्धज्ञानस्वभाव अनुभवता संता शोभै है। यह परभाव अपेक्षा नास्तित्वका भंग है ॥

प्रादुर्भावविराममुद्रितवहद्ज्ञानांशनानात्मना
निर्ज्ञानात्क्षणभंगसंगपतितः प्रायः पशुर्नश्यति
स्याद्वादी तु चिदात्मना परिमृशंश्चिद्वस्तु नित्योदितं
टंकोत्कीर्णघनस्वभावमहिमज्ञानं भवन् जीवति ।६७।

सं० टी०—प्रायः-बाहुल्येन, पशुः-सर्वक्षणिकवादी कश्चिदज्ञानी नश्यति-सीदति, कीदृक्षः ? क्षणेत्यादिः-क्षणे पदार्थानां भंगः-विनाशः, तस्य संगः-संगतिः, तत्र पतितः-तदंगीकारपरवशीभूतः, कुतः ? निर्ज्ञानात्—स्वपक्षसिद्धदृष्टेष्टप्रमाणनिर्णयात् कल्पनापोढमभ्रांतं प्रत्यक्षं स्वलक्षणमर्कदेश्यमित्यादिलक्षणसद्भावात्, ज्ञानांशेत्यादिः-ज्ञानानामंशाः-पर्यायाः, सुखदुःखाहंकारादयः, तेषां नानात्मना-परस्परं सर्वथा भिन्नस्वभावेन, प्रादुरित्यादिः—पीतादिज्ञानलक्षणानां प्रादुर्भाव उत्पत्तिः, नीलादिज्ञानलक्षणानां विरामः-विनाशः, तेन मुद्रितं—लांछितं वस्तु वहतीति। ननु स्याद्वादिनां प्रतिक्षणं क्षणिकानां पर्यायाणां सद्भावात्सुगतगतिगमनमारमणमेव विभावपर्यायाणां तु नरकादीनां तु स्थायित्वाभ्युपगमेऽपि तेषामसत्त्वात् ? इति चेन्न यतः स्याद्वादी तु जीवति-समस्तमतमंडनखंडनेन विलासित्वात् उज्जीवति । कीदृशः ? चिदात्मना चेतनास्वरूपेण सर्वत्रावग्रहेहादो चैतन्यस्वभावेन नित्योदितं-नित्यस्वरूपेणोदितं चिद्वस्तु-चैतन्यद्रव्यं, परिमृशन्-कलयन् प्रमाणबलादनुभवन्नित्यर्थः। पुनः टंकोदित्यादिः-टंकेन उत्कीर्णघनस्वभावः-निरंतरप्रकाशमानस्वरूपं स एव महिमा-माहात्म्यं यस्य तत् टंकोत्कीर्णं च घनस्वभावमहिमा च तच्च तज्ज्ञानं च भवन्-जायमानः सन् ॥ ६७ ॥ अथ सर्वथा सत्यनित्यचित्तशातनमनित्यत्वमात्मनो ज्ञानस्य विज्ञापयति—

अर्थ–पशु अज्ञानी एकांतवादी है सो उत्पादव्ययकरि लक्षित प्राप्त होता जो ज्ञान ताके अंशनिकरि नानास्वरूपका निर्णयका ज्ञानतैं क्षणभंगका संगमैं पड्या बाहुल्यपणे आपाका नाश करै है। बहुरि स्याद्वादी है सो चैतन्यस्वरूपकरि चैतन्यवस्तूकूं नित्य उदयरूप अनुभवता संता टंकोत्कीर्ण घनस्वभाव है महिमा जाकी ऐसा ज्ञानरूप होता संता जीवै है। आपका नाश नाही करै है ॥ भावार्थ–एकांती तौ ज्ञेयके आकारवत् ज्ञानकूं उपजता विनसता देखी अर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षण भंगकी संगतीवत् आपका नाश करै है। बहुरि स्याद्वादी है सो ज्ञान ज्ञेयकी साथि उपजै विनशै है तौऊ चैतन्यभावका नित्य उदय अनुभवता संता ज्ञानी होता जीवै है आपका नाश नही करै है यह नित्यपणाका भंग है ॥ ६७ ॥

टंकोत्कीर्णविशुद्धबोधविसराकारात्मतत्त्वाशया
वांछत्युच्छलदच्छचित्परिणतेर्भिन्नं पशुः किंचन ।
ज्ञानं नित्यमनित्यतापरिगमेप्यासादयत्युज्ज्वलं
स्याद्वादी तदनित्यतां परिमृशंश्चिद्वस्तुवृत्तिक्रमात् ॥६८॥

सं० टी०—पशुः–कश्चिन्नित्यैकांतवादी शठः, किंचनापि–किमपि ज्ञानं भिन्नं–पृथक्, वांछति–ईहते, कुतः ? उच्छलदित्यादिः उद्–ऊर्ध्वमुच्छलंती, अच्छा–निर्मला, सा चासौ श्चचित्परिणतिः चित्पर्यायः तस्याः, पर्यायपर्यायिणोः परस्परं भेदात् ज्ञानस्य नित्यत्वं, कया ? टंकोदित्यादिः–टंकेनोत्कीर्णः पर्यायाभावात् नित्यत्वात् स चासौ विशुद्धश्च पूर्वापरविवर्तकालिकाविकलत्वात् स चासौ बोधश्च तस्य विसरः–निवहः, स एवाकारः तेनोपलक्षितं आत्मतत्त्वं तस्य वांछा–नित्यत्वात्मज्ञानाकांक्षा तया । स्याद्वादी स्यात्–कथंचिच्छब्देनोपलक्षितो वादः–जल्पनं, विद्यते यस्य सः, वस्तुनस्तथात्वात् तथा कांक्षायाः समुत्पत्तेः, तथा विवक्षायाः सद्भावात् अनेकांतात्मकं सर्वं एकांतस्वरूपानुपलब्धेरित्यनेकांतवादी ज्ञानं नित्यं–पूर्वापरावग्रहेहादिषु व्याप्तज्ञानत्वसामान्येन स्यान्नित्यं, आसादयति–प्राप्नोति, कीदृक्षं ? उज्ज्वलं–अवदातं, अनित्यतापरिगमेऽपि वस्तुनोऽनित्यतापरिज्ञाने अपिशब्दान्न केवलं नित्यमेव अनित्यतापरिज्ञाने सत्यपि, नन्वनित्यतापरिज्ञानमात्रवस्तुशुक्तिकायां रजतपरिज्ञानवन्न पुनस्तथा वस्तुनः प्राप्तिरिति तदपि स्वमनोरथमात्रं यतः अनित्यतां वस्तुगतानित्यत्वं परिमृशन् अर्थक्रिययोपलभमानः कुतः ? चिदित्यादिः चिद्वस्तुनः–चेतनारूपवस्तुपर्यायस्य वृत्तिः–वर्तना तस्याः क्रमात्—अनुक्रमात्, ॥ ६८ ॥ अथानेकांतमतव्यवस्था सुघटेति संजाघटीति इति पद्यद्वयेन—

अर्थ—पशु अज्ञानी एकांतवादी है सो टंकोत्कीर्ण निर्मलज्ञानका फैलावरूप एक आकार जो आत्मतत्त्व, ताकी आशाकरि अर आपविषैं उछलती जो निर्मल चैतन्यकी परिणति, तासैं न्यारा किछू आत्माकूं चाहै है। सो किछू है नाही ॥ बहुरि स्याद्वादी है सो नित्यज्ञान हुए सो अनित्यताकूं प्राप्त होतैंभी उज्वल दैदीप्यमान चैतन्यवस्तुकी प्रवृत्तिके क्रमतैं ज्ञानके अनित्यताकूं अनुभवता संता ज्ञानकूं अंगीकार करै है ।। भावार्थ—एकांती तौ ज्ञानकूं एकाकार नित्य ग्रहण करनेकी वांछा करि अर ज्ञानचैतन्यकी परिणति उपजै विनशै है तातैं भिन्न किछू मानै है, सो परिणाम सिवाय परिणामी किछू न्यारा ही है नाही ।। बहुरि स्याद्वादी है सो यद्यपि ज्ञान नित्य है, तौऊ चैतन्यकी परिणति क्रमतैं उपजै विनशै है, ताके क्रमतैं ज्ञानकी अनित्यता मानै है, वस्तुस्वभाव ऐसाही है,यह अनित्यपणाका भंग है ॥६९॥ अब कहै हैं, जो, ऐसा अनेकांत है, सो जे अज्ञानकरि मोही मूढ हैं, तिनिकूं आत्मतत्त्वकूं ज्ञानमात्र साधता संता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वयमेव अनुभवनमें आवै है ॥

इत्यज्ञानविमूढानां ज्ञानमात्रं प्रसाधयन् ।
आत्मतत्त्वमनेकांतः स्वयमेवानुभूयते ॥ ६९ ॥

सं० टी०—इति अमुना प्रकारेण, स्वयमेव-स्वय प्रकाशमानत्वादिस्वरूपेण, आलोकाद्युपायेन च आत्मतत्वं-आत्मस्वरूपं अनेकांतः-स्याद्भिन्नाभिन्नत्वसत्त्वासत्त्वैकानेकत्वनित्यत्वादयः अनुभूयते—स्वानुभवप्रत्यक्षीक्रियते, किंकुर्वन् ? अज्ञानेत्यादिः-अज्ञानेन-अनादिकालविजृंभितमोहाज्ञानेन विमूढानां-मोहितानां, ज्ञानमात्रं-ज्ञानसाकाल्य, प्रसाधयन्-स्वरूपप्रकाशनादिभिर्दर्शयन् ॥ ६९ ॥

अर्थ-ऐसे पूर्वोक्तप्रकार अनेकांत है सो जे अज्ञानकरि प्राणी मूढ भये हैं तिनिकूं समझावनेकूं आत्मतत्त्वकूं ज्ञानमात्र साधता संता आपै आप अनुभवगोचर होय है ॥ भावार्थ-अनादिकालके प्राणी स्वयमेव तथा एकांतवादका उपदेशकरि आत्मतत्त्वकूं ज्ञानका अनुभवनतैं अनेक प्रकार पक्षपातकरि आत्माका नाश करै हैं। तिनिकूं समझावनेकूं आत्माका स्वरूप ज्ञानमात्रही कहिकरि, अर तिसकूं अनेकांतस्वरूप प्रकटकरि स्याद्वादतैं दिखाया है, सो यह असत्कल्पना नाही है। ज्ञानमात्र वस्तु अनेकधर्मसहित आपै आप अनुभवगोचर प्रत्यक्ष प्रतिभासमैं आवै है। सो प्रवीण पुरुष अपना आपाकी तरफ देखि अनुभवकरि देखो। ज्ञान तत्स्वरूप अतत्स्वरूप, एकस्वरुप, अनेकस्वरूप, अपने द्रव्यक्षेत्र कालभावतैं सत्स्वरूप नित्यस्वरूप परके क्षेत्र काल भावतैं असत्स्वरूप अनित्यस्वरूप, इत्यादि प्रत्यक्ष अनुभवगोचरकरि अनेकधर्मस्वरूप प्रतीतीमैं ल्यावो। यह ही सम्यग्ज्ञान है। सर्वथा एकांत मानै मिथ्याज्ञान है, ऐसा जानना ॥६९॥अब अनेकांतकी महिमा करै हैं—

एवं तत्त्वव्यवस्थित्या स्वं व्यवस्थापयन् स्वयं ।
अलंघ्यशासनं जैनमनेकांतो व्यवस्थितः ॥ ७० ॥

सं. टी.—अनेकांतः-कथंचिद्धर्मः, व्यवस्थितः, प्रमाणनयोपन्यासैः सुप्रतिष्ठः, कया ? एवमित्यादिः एवमुक्तप्रकारेण पूर्वं स्याद्वादसमर्थनेन, तत्त्वस्य-वस्तुयाथात्म्यस्य आत्मतत्त्वस्य वा व्यवस्थितिः-व्यवस्थानं, तया। किंकुर्वन्, स्वयं-आत्मना कृत्वा, स्वं आत्मनं, व्यवस्थापयन् सुस्थिरीकुर्वन् पुनः जैनं सर्वज्ञभट्टारकप्रणीतं, शासनं—मतं, व्यवस्थापयन् अथवा यतोऽनेकांतात् इत्याध्याहार्यो जैनं शासनं अलंघ्यं—एकांतमतमतिविजृंभितमिथ्यादृष्टिकोटिभिन लंघितुं शक्यं ॥ ७० ॥ अथानंतशक्तियुक्तितां संवक्ति—

अर्थ-या प्रकार तत्त्व कहिये वस्तुका यथार्थ स्वरूपकी व्यवस्थितिकरि अपने स्वरूपकूं आपही स्थापना करता संता अनेकांत है सो व्यवस्थित भया निश्चित ठहरया। सो कैसा है यह ? लंघ्या न जाय जीत्या न जाय ऐसा जिनदेवका शासन है मत है, आज्ञा है। भावार्थ-यह अनेकांत है सोही निर्बाध जिनमत है। सो जैसैं वस्तूका स्वरूप है तैसै स्थापता आपै आप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिद्ध भया है। असत्कल्पनाकरि वचनमात्र प्रलाप काहूने न कह्या है। निपुण पुरुषनिके विचारि प्रत्यक्ष अनुमानप्रमाणकरि अनुभवकरि देखो। इहां कोई तर्क करै है, जो आत्मा अनेकांतमयी है, अनंतधर्मा है, तौऊ ताका ज्ञानमात्रपणाकरि नाम कौन अर्थी कीया ? ज्ञानमात्र कहनेमें तौ अन्यधर्मनिका निषेध जान्या जाय है, ताका समाधान–जो, इहां लक्षणकी प्रसिद्धिकरि लक्ष्यके प्रसिद्धिके अर्थी आत्माका ज्ञानमात्रपणाकरि नाम कीया है, जो आत्मा ज्ञानमात्र है सोही कहै हैं, आत्माका ज्ञान लक्षण है ॥ जातैं तिस आत्माका सो ज्ञान असाधारण गुण है। यहु ज्ञान काहू अन्यद्रव्यमैं पाइए नाही, तिस कारणकरि इस ज्ञानलक्षणकी प्रसिद्धि करि, अर ताकरि लक्ष्य कहिये लखने योग्य जो आत्मा ताकी प्रसिद्धि होय है। लक्षण होय जाकू बाहुल्यपणैंकरि सर्व जाणैं सो होय। अर लक्ष्य होय सो जाकूं प्रसिद्ध न जानिये सो होय। यातैं लक्षण कहनेतैं लक्ष्य प्रसिद्ध होय है। इहां फेरि तर्क करै है, जो, इस लक्षणकी प्रसिद्धि करि कहा साध्य है ? लक्ष्यही साधने योग्य है, आत्माहीकूं साधना था। ताका समाधान–जो अप्रसिद्ध है लक्षण जाके ऐसा अज्ञानी पुरुषकै लक्ष्यकी प्रसिद्धि नाही होय। अज्ञानीकूं पहलै लक्षण दिखाइये तब लक्ष्यकूं ग्रहण करै। जातैं जाके लक्षण प्रसिद्ध होय ताहीके तिस लक्षणस्वरूप लक्ष्यकी प्रसिद्धि होय है।

फेरि पूछै हैं, जो वह लक्ष्य न्यारा ही कहा है, जो ज्ञानकी प्रसिद्धिकरि तिसतैं न्याराही सिद्ध होय है। ताका उत्तर–जो ज्ञानतैं न्यारा ही तौ लक्ष्य आत्मा नाही है जातैं द्रव्यपणाकरि ज्ञानके अर आत्माके भेद नाही है–अभेदही है ॥ इहां फेरि पूछै है, जो ज्ञान आत्मा अभेदरूप हैं तौ लक्ष्यलक्षणका भेद काहेकरि कीया हुवा होय है ? ताका उत्तर-जो प्रसिद्धिकरि प्रसाध्यमान-पणा है ताकरि कीया भेद है। ज्ञान प्रसिद्ध है। जातैं ज्ञानमात्रके स्वसंवेदनकरि सिद्धपणा है। सर्व प्राणीनिके स्वसंवेदनरूप अनुभवमैं आवै है। तिस प्रसिद्धिकरि साध्या हुवा तिस ज्ञानतैं अविनाभावी जे अनंत धर्म तिनिका समुदायरूप अभिन्नप्रदेशरूप मूर्ति आत्मा है। तातैं ज्ञान-मात्रविषैं अचलित निश्चल लगाई उकीरी जो दृष्टि ताकरि क्रमरूप अर अक्रमरूप युगपद्रूप प्रवर्तता जो तिस ज्ञानतैं अविनाभूत अनंत धर्मका समूह जेता जो कछू लखिये है, तेता सो कछू समस्तही एक निश्चयकरि आत्मा है। इसही प्रयोजनके अर्थी इस अध्यात्मप्रकरणविषै इस आत्माका ज्ञानमात्रपणाकरि व्यपदेश कीया है, नाम कह्या है। फेरि पूछै हैं, जो, क्रमरूप अर अक्रमरूप प्रवर्तै हैं अनंत धर्म जा विषैं ऐसा आत्माके ज्ञानमात्रपणा कैसा है ? ताका समाधान–जो परस्पर व्यतिरिक्त कहिये न्यारा न्यारा स्वरूपकूं धारे जो अनंत धर्म तिनिका समुदायरूप परिणई जो एक ज्ञप्ति कहिये ज्ञानक्रिया तिसमात्र भावरूपकरि आपै आप स्वयमेव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होनेतैं आत्मा के ज्ञानमात्रपणा है। आत्माके जेते धर्म हैं तेते सर्वही परिणमनरूप हैं। यद्यपि तिनिके लक्षणभेदकरि भेद है, तथापि प्रदेशभेद नाही है। तातैं एक असाधारण ज्ञानकूं कहते सर्व यामें आय गये। याहीतैं इस आत्माका ज्ञानमात्र जो एक भाव ताकै अन्तः—पातिनीं कहिये याहीमें आय पडनेवाली अनंतशक्ति उदय होय है उघडै है।

इत्याद्यनेकनिजशक्तिसु निर्भरोऽपि यो ज्ञानमात्रमयतां न जहाति भावः।
एवं क्रमाक्रमविवर्तिविवर्तचित्रं तद् द्रव्यपर्ययमयं चिदिहास्तु वस्तु ॥७१॥

सं०टी०—यः भावः-पदार्थः, ज्ञानेत्यादिः ज्ञानमात्रकल्परूपतां न जहाति न त्यजति। ननु क्रमाक्रमवृत्त्यानन्तधर्ममयस्यात्मनः कथं ज्ञानमात्रत्वमिति चेदुच्यते—परस्परव्यतिरिक्तानंतधर्मसमुदायपरिणतैकज्ञप्तिमात्रभावरूपेण स्वयमेव भवनात् ज्ञानमात्रत्वं। कीदृशोऽपि? इत्यादीत्यादिः—गत्याद्याः—भिन्नाभिन्नत्वाद्याः,ताश्च ता अनेकनिजशक्तयस्तासु सतीषु, निर्भरोऽपि अतिशयं गतोऽपि ज्ञानमात्र एव। इह जगति,—तत्—चित् चेतना वस्तु-द्रव्यं, अस्ति-विद्यते कीदृशं? द्रव्यपर्ययमयं द्रव्यपर्यायात्मकं, एवं—पूर्वोक्तप्रकारेण क्रमेत्यादिः—क्रमः—कालकृतः,—अक्रमः——युगपत्, क्रमश्चाक्रमश्च क्रमाक्रमौ, ताभ्यां विवर्तिनः वर्तनशीलाः विवर्ताः—पर्यायाः, तैः चित्रं-चित्रतां नीतं यथा दीपः क्रमेण अक्रमेण तमोनाशपदार्थप्रकाशादिपर्यायात्मकः तैलशोषणवृत्तिमुखदाहको ज्वालोत्पादनादिपर्यायात्मकस्तथात्मादिः ॥ ७१ ॥ अथ स्याद्वादतः शुद्धिं दीव्यति——

अर्थ—इति कहिये ऐसे भिन्न अभिन्नत्वादि अनेक अपनी शक्तिनिकरि भले प्रकार भया है तौऊ जो भाव ज्ञानमात्रमयीपणाकूं नाही छोडै है सो चैतन्य आत्मा द्रव्यपर्यायमयी इस लोकमें वस्तु है। कैसा है? क्रमरूप अक्रमरूप विशेष वर्तनेवाले जे विवर्त कहिये परिणामनके विकाररूप अवस्था तिनिकरि चित्र कहिये नानाप्रकार होय प्रवर्त्तै है॥ भावार्थ—कोई जानेगा कि ज्ञानमात्र कह्या सो आत्मा एकस्वरूप ही है सो ऐसैं नाही है। वस्तुका स्वरूप द्रव्यपर्यायमयी है, अर चैतन्य भी वस्तु है; सो अनंतशक्तिकरि भरया है। सो क्रमरूप अर अक्रमरूप अनेक परिणामके विकारनिका समूहरूप अनेकाकार होय है। अर ज्ञान असाधारण भाव है। ताकूं नाही छोडै है। सर्व अवस्था परिणामपर्यायी हैं ते ज्ञानमय हैं॥७१॥ अब इस अनेकस्वरूप वस्तूकूं जे जानैं हैं श्रद्धैं है, अनुभवैं हैं तिनिके बडाईके अर्थ कलशरूप काव्य कहै हैं—

नैकांतसंगतदृशा स्वयमेव वस्तुतत्त्वव्यवस्थितिमिति प्रविलोकयंतः।
स्याद्वादशुद्धिमधिकामधिगम्य संतो ज्ञानीभवंति जिननीतिमलंघयंतः ॥७२॥

सं० टी०——संतः-सत्पुरुषाः, ज्ञानीभवंति—संसारवर्ति अज्ञानं ज्ञानं भवंतीति ज्ञानीभवंति, किंकृत्वा? इति—पूर्वोक्तप्रकारेण, स्याद्वादशुद्धिं—अनेकांतशुद्धिं, अधिकां—विचारतः प्रकर्षप्राप्तां, अधिगम्य—ज्ञात्वा, निश्चित्य वा। कीदृशास्ते? स्वयमेव—स्वात्मना कृत्वा, वस्त्वित्यादिः—वस्तुनः तत्त्वं—स्वरूपं—अनेकांतात्मकं तस्य व्यवस्थितिः—व्यवस्था, तां प्रविलोकयन्तः—ईक्षमाणाः, कया? नैकांतेत्यादिः—न एकांतो नैकांतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्याद्वादः, क्वचिदस्य नाकादिमध्यपाठान्न नकारलोपः तत्र संगता-सम्यक् प्राप्ता दृक् दृष्टिः, तया, पुनः कीदृशाः ? जिननीतिं-सर्वज्ञप्रकाशितमार्गं, अलंघयंतः—अनुल्लंघयंतः ॥ ७२ ॥ अथास्योपायोपेयभावः संभाव्यते—

अर्थ—वस्तु है सो स्वयमेव आपै आप अनेकांतात्मक है ऐसैं वस्तुतत्त्वकी व्यवस्थाकूं अनेकांत-विषै संगत कहिये प्राप्तकरी जो दृष्टि ताकरि विलोकते देखते संतै सत्पुरुष हैं सो स्याद्वादकी अधिकशुद्धिकूं अंगीकार करिकै अर ज्ञानी होय हैं। कैसे भये संते ? जिनेश्वर देवका स्याद्वाद-न्याय ताकूं नाही उल्लंघन करते हैं॥ भावार्थ—जे सत्पुरुष अनेकांतकूं लगाई दृष्टिकरि ऐसे अनेकांतरूप वस्तुतत्त्वकी मर्यादाकूं देखते हैं, ते स्याद्वादकी शुद्धिकूं पायकरि ज्ञानी होय हैं। अर जिनदेवके स्याद्वादन्यायकूं नाही उल्लंघै हैं। स्याद्वाद न्याय जैसैं वस्तु तैसैं कहै है। असत्कल्पना नाही करै है॥ ऐसैं स्याद्वादका अधिकार पूर्ण कीया॥ ७२॥ अब ज्ञानमात्र भावके उपाय अर उपेय ए दोऊ भाव विचारिये है—

ये ज्ञानमात्रनिजभावमयीमकंपां भूमिं श्रयंति कथमप्यपनीतमोहाः।
ते साधकत्वमधिगम्य भवंति सिद्धा मूढास्त्वमूमनुपलभ्य परिभ्रमंति ॥ ७३ ॥

सं० टी०—ये-साधवः-कथमपि-केनापि प्रकारेण, महता कष्टेन वा ज्ञानेत्यादिः-ज्ञानमात्रः-ज्ञानेन साकल्यः, स चासौ निजभावश्च-स्वात्मपरिणामः, तेन निर्वृत्तां भूमिं-शुद्धोपयोगभूमिं, श्रयंति भजन्ते, कीदृशां तां ? अकंपां-निश्चलां, अपनीतमोहाः अपनीतः—निराकृतः, मोहः रागद्वेषाज्ञानादियैः ते योगिनः, साधकत्वं रत्नत्रयादिलक्षणमुपायत्वं, अधिगम्य-आश्रित्य, सिद्धाः, उपेयाः-साध्याः, भवंति-जायन्ते, आत्मनो ज्ञानमात्रत्वे उपायोपेयभावो विद्यत एव तस्यैकस्यापि स्वयंसाधकसिद्धरूपोभयपरिणामित्वात्। मूढाः-अज्ञानिनस्तु अमूं अन्तर्नीतानेकांतज्ञानमात्रैकभावरूपां भूमिं, अनुपलभ्य-अप्राप्य परिभ्रमंति संसारापारभूमिमण्डलीमाक्रमन्ते ॥ ७३ ॥ अथ शुद्धोपयोगभूमिप्राप्त्युपायं लक्षयति—

अर्थ—जे भव्यपुरुष कोई प्रकारकरि कैसेही दूरी भया है मोह अज्ञान मिथ्यात्व जिनिका ऐसे हैं, ते ज्ञानमात्र निजभावमयी निश्चलभूमिकाकूं आश्रय करै हैं। ते पुरुष साधकपणाकूं अंगीकारकरि सिद्ध होय हैं। बहुरि जे मूढ़ मोही अज्ञानी मिथ्यादृष्टि हैं, ते इस भूमिकाकूं न पाय अर संसारमैं भ्रमै हैं। भावार्थ—जे पुरुष गुरुके उपदेशतैं तथा स्वयमेव काललब्धीकूं पाय मिथ्यात्वसूं रहित होय हैं ते ज्ञानमात्र अपना स्वरूपकूं पाय साधक होय, सिद्ध होय हैं अर जे ज्ञानमात्र आत्माकूं नाहीं पावै हैं, ते संसारमैं भ्रमै हैं।७३। अब कहै हैं, जो वह भूमिका ऐसे पावै हैं-

स्याद्वादकौशलसुनिश्चलसंयमाभ्यां यो भावयत्यहरहः स्वमिहोपयुक्तः।
ज्ञानक्रियानयपरस्परतीव्रमैत्रीपात्रीकृतः श्रयति भूमिमिमां स एकः ॥ ७४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं०टी०–स एव एकः अद्वितीयो मुनिः इमां–प्रत्यक्षां, भूमिं शुद्धोपयोगस्थानं, श्रयति–भजति, कीदृक्षः ? ज्ञानेत्यादिः–ज्ञानं –स्वात्मज्ञानं, क्रियां–स्वात्माचरणलक्षणं चारित्रं त्रयोदशप्रकारलक्षणं वा नयः–नयति–प्राप्नोति स्वात्मस्वरूपमिति नयः प्रमाणैकदेशो नैगमादि । दर्शनं वा ज्ञानं च क्रिया च नयश्च तेषां परस्परं अन्योन्यं, तीव्रमैत्री–अत्यंतसखित्वम् तया, अपात्रं पात्रं कृत इति पात्रीकृतः, स कः ? यः—योगी भावयति—ध्यानविषयीकरोति, कथं ? अहरहः—दिने दिने, तत्सामर्थ्यात्प्रतिक्षणं, कं ? स्वं–आत्मानं, क ? इह–आत्मनि, स्वस्वरूपे काभ्यां स्यादित्यादिः—स्याद्वादः श्रुतज्ञानं । तथा चोक्तं देवागमे—

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने । भेदः साक्षादसाक्षाच्च वस्तु ह्यन्यतमं भवेत् ॥ १ ॥

तत्र कौशल्यं, निपुणता, सुनिश्चलः–सुष्ठु अक्षोभ्यः, स चासौ संयमः–चारित्रं च द्वन्द्वः ताभ्यां । कीदृक्षः सः ? उपयुक्तः–शुद्धोपयोगे सावधानः ॥ ७४ ॥ अथात्मोदयमावक्ष्यति—

अर्थ–जो पुरुष स्याद्वादन्यायका प्रवीणपणा अर निश्चलव्रतसमितिगुप्तिरूप संयम इनि दोऊनिकरि अपने ज्ञानस्वरूप आत्माविषैं उपयोग लगावता संता आत्माकूं निरंतर भावै हैं, सोही पुरुष ज्ञाननय अर क्रियानयकरि इनि दोऊनिकेविषैं परस्पर भया जो तीव्र मैत्री भाव तिसका पात्ररूप भया इस निजभावमयी भूमिकाकूं पावै है ।। भावार्थ–जो ज्ञाननयहीकूं ग्रहणकरि क्रियानयकूं छोडे है, सो प्रमादी स्वच्छन्द भया इस भूमिकूं न पावै हैं। बहुरि जो क्रिया नयकूं ग्रहणकरि ज्ञाननयकूं नाही जानै है सो भी शुभकर्ममैं संतुष्ट भया इस निष्कर्मभूमिकाकूं नाही पावै है। बहुरि ज्ञान पाय निश्चल संयमकूं अंगीकार करै हैं तिनकै ज्ञाननयकै अर क्रियानयकै परस्पर अत्यंत मित्रता होय है ते इस भूमिकाकूं पावै हैं। इनि दोऊ नयनिका ग्रहणत्यागका रूप वा फल पंचास्तिकायग्रन्थके अन्तमैं कह्या है, तहांतै जानना ॥ अब कहै हैं, इस भूमिकाकूं पावै है सोही आत्माकूं पावै है–

चित्पिंडचंडिमविलासिविकासहासः शुद्धप्रकाशभरनिर्भरसुप्रभातः ।
आनंदसुस्थितसदास्खलितैकरूपस्तस्यैव चायमुदयत्यचलार्चिरात्मा ॥७५॥

सं० टी०—तस्यैव मुनेः शुद्धोपयोगभूमिनतस्य न पुनरन्यस्य, अयं–आत्मा–चिद्रूपः, उदयति उदयं प्राप्नोति—साक्षाद्भवतीत्यर्थः, कीदृक्षः सः ? चिदित्यादिः—चित्पिंडः–ज्ञानपिंडः तस्य चंडिमा–प्रौढत्वं, तेन विलसतीत्येवं शीलो विकासः स एव हासः—झर्झरं यस्य सः अन्योप्युदये विकासहासो भवतीत्युक्तिलेशः पुनः कीदृशः ? शुद्धेत्यादिः शुद्धः–कर्ममलकलङ्करहितः स चासौ प्रकाशश्च ज्ञानोद्योतः तस्य भरः–समूहः स एव निर्भरप्रभातः–सातिशयप्रातःकालो यस्य सः अन्यस्याप्युदये प्रातः कालो भवति । पुनःकीदृशः आनन्देत्यादिः–आनन्दे—अकर्मशर्मणि सुस्थितं सुप्रतिष्ठं सदा नित्यं, अस्खलितैकरूपः स्खलितरहितं एकं अद्वितीयं स्वरूपं यस्य सः,अन्यस्याप्युदयस्यास्खलितस्वरूपं भवतीत्युक्तिलेशः ॥ ७५ ॥ अथ स्वस्वभावविस्फुरणं काम्यति—

अर्थ–जो पुरुष पूर्वोक्त प्रकार भूमिकूं पावै है तिसही पुरुषकै यह आत्मा उदय होय है । कैसा है आत्मा ? चैतन्यका जो पिंड ताका निरर्गलविलास करनेवाला जो विकास प्रफुल्लित

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होना तिसरूप है हास कहिये फूलना जाका, बहुरि कैसा है, शुद्धप्रकाशका भर कहिये समूह ताकरि भला प्रभातसारिखा उदयरूप है। बहुरि कैसा है ? आनंदकरि भलै प्रकार तिष्ठया सदा नाही चिगता है एकरूप जाका ऐसा है बहुरि कैसा है ? अचल है अर्चि कहिये ज्ञानरूप दीप्ति जाकी ॥ भावार्थ—इहां चित्पिंड इत्यादि विशेषणतै तौ अनंतदर्शनका प्रकट होना जनाया है। बहुरि कैसा है ? अचल है शुद्धप्रकाश इत्यादि विशेषणतै अनंतज्ञानका प्रकट होना जनाया है। अरु आनंदसुस्थित इत्यादि विशेषणकरि अनंत सुखका प्रकट होना जनाया है। अर अचलार्चि इस विशेषणकरि अनंतवीर्यका प्रकट होना जनाया है। पूर्वोक्त भूमिके आश्रयतै ऐसा उदय हो है ॥७५॥ अब कहै हैं, ऐसाही आत्मस्वभाव हमारै प्रकट होऊ—

स्याद्वाददीपितलसन्महसि प्रकाशे शुद्धस्वभावमहिमन्युदिते मयीति।
किं बंधमोक्षपथपातिभिरन्यभावैर्नित्योदयः परमयं स्फुरतु प्रभावः ७६

सं० टी०—इति-हेतोः, अयं-प्रसिद्धः, स्वभावः-आत्मस्वरूपं स्फुरतु-प्रकाशं यातु, परं-केवलं, कीदृशः सः ? नित्योदयः नित्यं सदा उदयो यस्य सः। इति किं ? मयि शुद्धभावे आत्मनि उदिते उदयं प्राप्ते सति, अन्यभावैः-शुभाशुभोपयोगैः किं ? न किमपि स्यात्। कीदृशैस्तैः ? बंधेत्यादिः-कर्मणां बन्धश्च मोक्षश्च बंधमोक्षौ तयोः पंथाः—मार्गः, तत्र पातिभिः पतनशीलैः अयं बंधहेतुः, अयं मोक्षहेतुः, इत्यादीनां भावानां प्रयोजनाभावात्। कीदृक्षे तस्मिन् ? स्यादित्यादिः-स्याद्वादः—श्रुतं-भावश्रुतं, तेन दीपितं, लसन्महः-उल्लसत्तेजः यस्य तस्मिन्, प्रकाशे स्वपरप्रकाशात्मके, पुनः शुद्धेत्यादिः-शुद्धस्वभावे महिमा-माहात्म्यं यस्य तस्मिन् ॥ ७६ ॥ अथ चिन्महो रोचते—

अर्थ—मोविषै स्याद्वादकरि दीपित कहिये प्रकाशरूप भया है लहलाट करता तेजःपुञ्ज जामैं, बहुरि शुद्ध स्वभावकी है महिमा जामें ऐसा ज्ञानप्रकाश उदय होतै बंधमोक्षके मार्गमें पटकनेवाले जे अन्यभाव तिनिकरि कहा साध्य है ? मेरे तौ केवल अनन्तचतुष्टयरूप यह अपना स्वभाव सो निरंतर उदयरूप भया स्फुरायमान होउ ॥ भावार्थ—स्याद्वादकरि यथार्थ आत्मज्ञान भये पीछे याका फल पूर्ण आत्माका प्रगट होना है सो मोक्षका इच्छुक पुरुष यह ही प्रार्थना करै है, जो मेरा पूर्णस्वभाव आत्मा उदय होऊ। अन्यभाव बंधमोक्षमार्ग की कथारूप है, तिनिकरि कहा प्रयोजन है ? अब कहै हैं, जो, नयकरि आत्मा साधिये हैं, परन्तु नयहीपरि दृष्टि रहै तौ नयनिकै परस्पर विरोध भी है। तातै मैं नयनिकूं अविरोध करि आत्माकूं अनुभवूं हों।

चित्रात्मशक्तिसमुदायमयोयमात्मा सद्यः प्रणश्यति नयेक्षणखंड्यमानः।
तस्मादखंडमनिराकृतखंडमेकमेकांतशांतमचलं चिदहं महोऽस्मि ॥ ७७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—अयमात्मा-चिद्रूप:, नय इत्यादि:-नयानां-द्रव्यपर्यायाणां ईक्षणं-अवलोकनं, तेन खंड्यमान:-भिद्यमान:, प्रणश्यति द्रव्यक्षेत्रकालभावेन खण्ड्यते इत्यर्थ: । कीदृक्ष: ? चित्रेत्यादि:—चित्रा:-नानाप्रकारा:, ताश्च ता आत्मशक्तयश्च-जीवशक्तिचितिशक्तिदृशिशक्तिज्ञानशक्तिसुखशक्तिवीर्यशक्ति प्रभुत्वशक्तिविभुत्वशक्तिसर्वदर्शित्वशक्तिसर्वज्ञत्वशक्तिसत्त्वशक्तिप्रकाशशक्तिसंकुचितविकाशत्वशक्तिकार्यकारणशक्तिपरिणाम्यपरिणामिकत्वशक्तित्यागोपादानशून्यत्वागुरुलघुत्वोत्पादव्यय ध्रुवत्वपरिणाममूर्तत्वाकर्तृत्वाभोक्तृत्वनिष्क्रियत्वनियतप्रदेशत्वस्वधर्मव्यापकत्वसाधारणासाधारणाधर्मत्वानंतधर्मत्वविरुद्धधर्मत्वतत्त्वातत्त्वैकत्वानेकत्वभावाभावाभावाभावाभावभावभावाभावाभावाभावक्रिया कर्मकर्तृकरणसंप्रदानापादानाधिकरणत्वसंबन्धादय:-शक्तय:, तासां समुदायेन निर्वृत्त:, अस्मात्कारणात्, अहं—चित् चेतना मह:-धाम, अस्मि—भवामि कीदृक्षं मह: ? अखडं-न खंड्यते केनापीत्यखंडं,अनिरित्यादि.-अनिराकृता—न दूरीकृता व्यवहारनयापेक्षया खण्डा: पर्याया यस्य तत् एकं-अद्वितीय कर्म व्यतिरिक्तत्वात् एकांतशांतं—एकांतेन अद्वितीयेन स्वभावेन शांतं—समारूढं पुन: अचलं स्वस्वभावत्वादविनश्वरत्वान्निश्चलं ॥ ७७ ॥ अथ ज्ञानमात्रत्वं मंत्र्यते आत्मन:—

अर्थ—यह आत्मा है सो चित्र कहिये अनेक प्रकार जे अपनी शक्ति तिनिके समुदायमय है। सो नयनिकी दृष्टिकरि भेदरूप कीया हुवा तत्काल खंडखंडरूप होय नाशकूं प्राप्त होय है। तातैं मैं मेरा आत्माकूं ऐसैं अनुभवूं हों जो,मैं चैतन्यमात्र मह वस्तु हों सो कैसा हौं ? नाही निराकरण कीये हैं खंड जामैं तौऊ खंड-भेद रहित अखंड हों, एक हों वहुरि एकांतशांत रूप हौं। जामैं कर्मका उदयका लेश नाही ऐसा शांतभावमय हौं॥ अर अचल हौं, कर्मका उदयका चलाया चलूं नाही हौं॥ भावार्थ—आत्मामें अनेकशक्ति है, अर एक एक शक्तीका ग्राहक एक एक नय है, सो नयनिकी एकांत दृष्टिकरिही देखिये तौ आत्माका खंड खंड होय नाश होय जाय। तातैं स्याद्वादी नयनिका विरोध मेटि चैतन्यमात्र वस्तु अनेकशक्तिसमूहरूप सामान्यविशेषस्वरूप सर्वशक्तिमय एकज्ञानमात्र अनुभव करै है। ऐसा वस्तुका स्वरूप है तामैं विरोध नाही॥ अव अखंड आत्मा का ऐसा अनुभव करै सो कहै हैं जो ज्ञान तौ मै हौं, ज्ञेय ज्ञेय है—

> योयं भावो ज्ञानमात्रोहमस्मि ज्ञेयो ज्ञेयज्ञानमात्रः स नैव।
> ज्ञेयो ज्ञेयज्ञानकल्लोलवल्गन् ज्ञानज्ञेयज्ञातृमद्वस्तुमात्रः ॥ ७८ ॥

सं० टी—योयं-प्रसिद्ध:, ज्ञानमात्र:—ज्ञानस्य मात्रं-कार्त्स्न्यं यत्र स भाव:—पदार्थ: स एवाहं अस्मि भवामि, य: ज्ञेयज्ञानमात्र: ज्ञेयानां-पदार्थानां, ज्ञानमात्र:-तदुत्पत्त्यादिना पदार्थाकारमात्र: सोहं नैव ज्ञेय: ज्ञातव्य:, तर्हि कीदृक्षोहं ? ज्ञेयेत्यादि:—ज्ञेयश्च ज्ञानं च तत्परिच्छेदकं ज्ञेयज्ञाने तयो: कल्लोला: वीचय:, अर्थाद्विवर्तास्तत्र वल्गत्-वल्गनं कुर्वत् तद्ग्रहणं कुर्वदित्यर्थ: तच्च तज्ज्ञानं च तदेव ज्ञेयं-परिच्छेद्यं, तस्य यो ज्ञातृमत्-ज्ञायकं-स्वपरपरिच्छेदकं तच्च तद्वस्तु च तदेव मात्रं-प्रमाणं यस्य स: ज्ञेय:-ज्ञातव्य: ॥ ७८ ॥ अथात्मन: प्रतिभासभेदं संपूरयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ—जो यह ज्ञानमात्र भाव मैं हौं सो ज्ञेयका ज्ञानमात्र ही नाही जानना । तौ यह ज्ञानमात्रभाव कैसा जानना ? ज्ञेयनिके आकार जे ज्ञानके कल्लोल तिनिकूं विलगता ऐसा ज्ञान, सोही ज्ञान सो ही ज्ञेय सोही ज्ञाता ऐसैं ज्ञान, ज्ञेय, ज्ञाता इनि तीन भावनिसहित वस्तुमात्र जानना भावार्थ—अनुभव करते ज्ञानमात्र अनुभवै । तत्र बाह्य ज्ञेय तौ न्यारेही ज्ञानमैं पैठे नाही बहुरि ज्ञेयनिके आकारही झलके ज्ञानमैं है । सो ज्ञान भी ज्ञेयाकाररूप दीखे है, ए ज्ञानके कल्लोल हैं । सो ऐसा ज्ञानरूप भी ज्ञानका स्वरूप है । अर आपकरि आप जाननेयोग्य है तातै ज्ञेयरूपभी है ।। अर आपही आपकूं जाननेवाला है यातैं ज्ञाताभी है । ऐसे तीनूं भावस्वरूप ज्ञान एक है । याहीतैं सामान्यविशेषस्वरूप वस्तु कहिये तिसमात्रही ज्ञानमात्र कहिये ।। सो अनुभव करनेवाला ऐसैंही अनुभव करै, जो, ऐसा ज्ञानभाव यह मै हौं ।। अब कहै हैं, अनुभवकी दशामैं अनेकरूप दीखे हैं तौऊ यथार्थज्ञाता निर्मल ज्ञानकूं भूलै नाही है—

क्वचिल्लसति मेचकं क्वचिन्मेचकामेचकं क्वचित्पुनरमेचकं सहजमेव तत्त्वं मम ।
तथापि न विमोहयत्यमलमेधसां तन्मनः परस्परसुसंहतप्रकटशक्तिचक्रं स्फुरत्

सं० टी०—ममात्मनः तत्त्वं—ज्ञानस्वरूपं, क्वचित्—कस्मिन् क्षणे, वहिः—पदार्थग्रहणसमये, मेचकं चित्रस्वरूपं पक्षांतरे रागद्वेषकलुषीकृतं वा लसति—विलासं करोति ' पंचवर्णं भवेद्रत्नं मेचकाख्यमिति—वचनात् तद्वत् ज्ञानमपि चित्राकारं मेचकं भण्यते । पुनः—भूयः, क्वचित् सहजशुद्धटंकोत्कीर्णस्वरसस्वभावालंबनसमये अमेचकं—वहिश्चित्राकाररहितं रागद्वेषमोहमलमुक्तं वा विलसति । कीदृशं ? सहजं—यदमेचकस्वरूपं तत्स्वरसजं, एव—निश्चयेन, परेषामन्योपाधिसापेक्षत्वात् पुनः क्वचित्—स्वपरग्रहणोन्मुखसमये, मेचकामेचकं परस्वरूपग्रहणेन मेचकं, स्वरूपग्रहणेन अमेचकं प्रतिभासते तथापि मेचकामेचकस्वरूपप्रतिभासेऽपि, तत् आत्मतत्त्वं कर्तृ, अमलमेधसां—निर्मलज्ञानिनां, मनः चित्तं, कर्मतापन्नं न विमोहयति मोहं न प्रापयति, सहेतुविशेषणमाह परस्परेत्यादिः—परस्परं—अन्योन्यं, सुसंहता—सम्यग्मिलिता सा चासौ प्रकटशक्तिश्च स्फुरत्सामर्थ्यं, तेषां चक्रं समूहो यत्र तत्, पुनः स्फुरत्—देदीप्यमानं ।। ७६ ।। अथैकत्वानेकत्वादिप्रतिभासनं बाभाषते—

अर्थ—अनुभवन करनेवाला कहै है—जो, मेरा आत्मतत्त्व है सो कहूं तौ मेचक लखै है अनेकाकार दीखै है । बहुरि कहूँ अमेचक कहिये अनेकाकाररहित शुद्ध एकाकार दीखै है बहुरि कहूं मेचकामेचक कहिये दोऊ रूप दीखै है । तौऊ जे निर्मलबुद्धि हैं तिनिका मनकूं भ्रमरूप नाही करै है । जातैं कैसा है ? परस्पर भलै प्रकार मिली जे प्रकट अनेक शक्ति तिनिका समूह स्वरूप स्फुरायमान होता है । भावार्थ—आत्मतत्त्व है सो तो अनेक शक्तीकूं लीये है । तातैं कोई अवस्थामें तौ अनेक आकार कर्म उदयके निमित्तकरि अनुभवमें आवै हैं । बहुरि कोई अवस्था में शुद्ध एकाकार अनुभवमें आवै है बहुरि कोई अवस्थामें शुद्धाशुद्धरूप अनुभवमें आवै है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तौऊ यथार्थज्ञानी स्याद्वादके बलकरि भ्रमरूप न होय है। जैसा है तैसा मानै है ज्ञानमात्रसूं च्युत न होय है॥ अब कहै हैं, जो, अनेकरूपकूं धरता यह आत्माका अद्भुत आश्चर्यकारी विभव है—

इतो गतमनेकतां दधदितः सदाप्येकतामितः क्षणविभंगुरं ध्रुवमितः सदैवोदयात्
इतः परमविस्तृतं धृतमितः प्रदेशैर्निजैरहो सहजमात्मनस्तदिदमद्भुतं वैभवं॥८०॥

सं० टी०—अहो–महाश्चर्ये, तदिदं, आत्मनः–चिद्रूपस्य सहजं–स्वाभाविकं, वैभवं–माहात्म्यं, अद्भुतं आश्चर्यकारि, तत् किं ? यदिदं इतः–अस्मात् शुद्धपर्यायार्पणात्, अनेकतां–ज्ञानदर्शनस्ववीर्याद्यनेकस्वरूपं गतं—प्राप्तं, अपि–पुनः, यत् इतः–अस्मात् संग्रहनयात्, सदापि–सर्वदापि, एकतां–आत्मद्रव्येणैकत्वं गतं–प्राप्तं। ननु यदनेकं तदेकं कथं स्यात् अन्यथा घटपटादीनामनेकत्वेऽप्येकत्वं स्यादिति चेन्न, नयार्पणादेकत्वानेकत्वघटनात् सदात्मना घटादीनामनेकत्वेऽपि एकत्वघटनाच्च अन्यथाऽभावप्रसंगात् यत् इतः–ऋजुसूत्रनयात् क्षणविभंगुरं–प्रतिक्षणं विनश्वरं पुनः–यत्, इतः–द्रव्यार्थिकनयात्, सदैव–नित्यमेव, ध्रुवं–नित्यं, सदैवोदयात्–उत्पादाद्यभावे सदा प्रकाशमानत्वात्। ननु यत्क्षणिकं तत्कथं ध्रुवं शीतोष्णवत्तयोरन्योन्यं विरोधात् इति चेन्न नयविवक्षासद्भावात् मृद्द्रव्यवत् यथा मृद्द्रव्यं मृत्पिंडाकारेण विनष्टं तद् घटाकारेणोत्पद्यते मृद्द्रव्यस्य ध्रुवत्वं च तथात्मद्रव्यस्यापि यत् पुनः इतः–द्रव्यार्पणात् परं केवलं, अविस्तृतं–विस्ताराभावविशिष्टं, इतः—पर्यायविवक्षातः, निजैः—आत्मीयैः प्रदेशैः असंख्यसंख्यावच्छिन्नैर्धृतं–भृतं, विस्तारिद्रव्यमित्यर्थः॥ ८०॥ अथात्मनः स्वभावो विजयते—

अर्थ—अहो वडा आश्चर्यकारी ! सो यह आत्माका स्वाभाविक अद्भुत विभव है जो इतः कहिये एक तरफ देखिये तौ अनेकताकूं धारता है, यह पर्यायदृष्टि है। बहुरि एकतरफ देखिये तौ सदाही एकताकूं धारता है, यह द्रव्यदृष्टि है। बहुरि एकतरफ देखिये तौ क्षणभंगुर है, यहभी क्रमभावी पर्यायदृष्टि है। बहुरि एक तरफ देखिये तौ ध्रुव दीखै है, यह सहभावी गुणदृष्टि है। जातैं सदा उदयरूप दीखै है। बहुरि एकतरफ देखिये तौ परमविस्तारस्वरूप दीखै है यह ज्ञान अपेक्षा सर्वगतदृष्टि है। बहुरि एकतरफ देखिये तौ अपने प्रदेशनिकरि धारिये है, यह प्रदेशनिकी अपेक्षा दृष्टि है। ऐसा आश्चर्यरूप विभवकूं आत्मा धारै है॥ भावार्थ—यह द्रव्यपर्यायात्मक अनंतधर्मा वस्तूका स्वभाव है। सो जो पूर्वे अज्ञानी हैं, तिनिके ज्ञानमें आश्चर्य उपजावै है। सो असंभवती वार्ता है। बहुरि ज्ञानिनिके वस्तुस्वभावमें आश्चर्य नाही है। तौऊ अद्भुत परम आनंद ऐसा होय है, ऐसा कबहु पूर्वे न भया यह आश्चर्य भी उपजै है॥ फेरि इसही अर्थरूप काव्य है—

कषायकलिरेकतः स्खलति शांतिरस्त्येकतो
भवोपहतिरेकतः स्पृशति मुक्तिरप्येकतः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जगत्त्रितयमेकतः स्फुरति चिच्चकास्त्येकतः
स्वभावमहिमात्मनो विजयतेऽद्भुतादद्भुतः ॥ ८१॥

सं० टी—विजयते—सर्वोत्कर्षेण वर्तते, कः ? स्वभावमहिमा—ज्ञानस्वरूपमाहात्म्यं, कस्य ? आत्मनः चिद्रूपस्य, अद्भुतः-आश्चर्योद्रेककारी, कुतः ? अद्भुतात् आश्चर्यकारिजगत्पदार्थात् , तत्कथमित्याह एकतः-एकस्मिन्नंशे, कषायकलिः-रागद्वेषमोहकलहः स्खलति । एकतः-शुद्धनिश्चयनयावलंबनांशे, शांतिः परमसाम्यं, अस्ति-विद्यते । एकतः-व्यवहारनयावलंबनांशे भवोपहतिः-भवस्य—द्रव्यादिपंचधासंसारस्य उपहतिः-प्राप्तिरस्ति, एकतः-शुद्धनयांशे, मुक्तिरपि—कर्ममलमोचनमपि स्पृशति-आश्रयति । आत्मानं, एकतः-एकस्मिन्नंशे जगत्त्रयं गच्छंतीति जगंति गम्लृ गतौ, इत्यस्य धातोः द्युति गमोर्वेचेति क्विप्प्रत्यये-नेति सिद्धं, जगतां त्रयं अधोमध्योर्ध्वभेदेन त्रिकं स्फुरति-चकास्ति, एकतः-एकांशे, चित्-ज्ञानं, चकास्ति द्योतते ॥ ८१ ॥ अथैकत्वं तस्य जेगीयते—

अर्थ-आत्माका स्वभावका महिमा है सो अद्भुततें अद्भुत विजयरूप प्रवर्तै है काहुकरि वाध्या न जाय है। कैसा है? एकतरफ देखिये तौ कषायनिका कलेश दीखे है। बहुरि एकतरफ देखिये तौ कषायनिका उपशमरूप शांत भाव है। बहुरि एकतरफ देखिये तौ संसारसंबंधी पीडा दीखै है। बहुरि एकतरफ देखिये तौ संसारका अभावरूप मुक्ति भी स्पर्शै है। बहुरि एक तरफ देखिये तौ केवल एक चैतन्यमात्रही सोभै है। ऐसैं अद्भुततैं अद्भुत महिमा है॥ भावार्थ-इहांभी पहले काव्यके भावार्थरूपही जानना। यह अन्यवादी सुणि बडा आश्चर्य करै हैं। तिनिके चित्तमें विरुद्ध भासे, सो समाही सके नाही। अर तिनिकै कदाचित् श्रद्धा आये तौ प्रथम अवस्थामैं बडा अद्भुत दीखै, जो, हमने अनादिकाल यौंही खोया। यह जिनवचन बड़े उपकारी हैं, वस्तुका स्वरूप यथाथ जनावै हैं। ऐसें आश्चयकरि श्रद्धान करै हैं।८१। आगै टीकाकार इस सर्व विशुद्ध ज्ञानका अधिकार पूर्ण करै हैं ताके अंतमंगलके अर्थी इस चिच्चमत्का-रहीकूं सर्वोत्कृष्ट कहै हैं-

विशेष-संस्कृतटीकाकारने उपहतिका अर्थ प्राप्ति किया है। और भाषाटीकाकारने पीडा। यहां पीडा अर्थ उपयोगी जान पडता है।

जयति सहजतेजःपुञ्जमज्जत्त्रिलोकीस्खलदखिलविकल्पोऽप्येक एव स्वरूपः।
स्वरसविसरपूर्णाच्छिन्नतत्त्वोपलंभः प्रसभनियमितार्चिश्चिच्चमत्कार एषः ॥८२॥

सं० टी०—एषः-प्रत्यक्षः चिच्चमत्कारः—चैतन्याश्चर्योद्रेकः, जयति—सर्वोत्कर्षेण वर्तते कीदृक्षः ? सहजेत्यादिः—सहजं-स्वाभाविकं तच्च तत्तेजश्च ज्ञानज्योतिः, तस्य पुंजः-द्विकवारानंतशक्तिसमूहः तत्र मज्जंति मज्जनं कुर्वंती, प्रतिभासमानेत्यर्थः सा चासौ त्रिलोकी च-त्रयाणां लोकानां समाहारस्त्रिलोकी तया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्खलंतः-चलंतः, अखिलविकल्पाः-तद्विषयरूपेण समस्तविकल्पाः यत्र सः ईदृशोऽपि एक एव-अद्वितीय एव स्वरूपः-स्वस्य—आत्मनः रूपं—स्वरूपं यत्र सः, पुनः स्वेत्यादिः—स्वरसः-स्वभावः तस्य विसरः समूहः, तेन पूर्णं-संपूर्णं, तच्च तदच्छिन्नतत्त्वं चाखंडात्मतत्त्वं तस्योपलंभः-प्राप्तिर्यत्र सः, पुनः प्रसभेत्यादिः-प्रसभेन—बलात्कारेण, नियमितं-लोकालोकप्रकाशकत्वेन निश्चयीकृतं, अपरप्रकाश्यस्याभावादर्चिः तेजः, यस्य सः ॥ ८२ ॥ अथ कर्तृतागर्भितमात्मज्योतिर्जाज्वल्यते-

अर्थ-यह प्रत्यक्ष अनुभवगोचर चैतन्यचमत्कार है सो जयवंत प्रवर्तै है। काहूकरि वारया न जाय ऐसैं सर्वोत्कृष्ट होय प्रवर्तै है कैसा है ? अपना स्वभावस्वरूप जो तेजः प्रकाशका पुञ्ज ताविषैं मग्न होते जे तीन लोकके पदार्थ तिनिकरि होते दीखते हैं अनेक विकल्प भेद जामैं ऐसा है तौऊ एकस्वरूप ही है। भावार्थ-केवलज्ञानमैं सर्व पदार्थ झलकै हैं ते अनेक ज्ञेयाकाररूप दीखै हैं तौऊ चैतन्य रूप ज्ञानाकारकी दृष्टीमैं एकही स्वरूप हैं। बहुरि कैसा है ? अपना निजरसकरि पूर्ण छेदा नाहीं छिद्या है तत्त्वस्वरूपका पावना जाकै ॥ भावार्थ-प्रतिपक्षी कर्मका अभाव भया तातैं नाहीं पाया स्वभावका अभाव जाकै ऐसा है॥ बहुरि कैसा है ? प्रसभ कहिये प्रकट बलात्कारैं नियमरूप है दीप्ति जाकी। अपना अनंतवीर्य तौ निष्कंप तिष्ठै है ऐसा चिच्चमत्कार जयवंत है। यहां जयवंत कहनेमैं सर्वोत्कर्षकरि वर्तना कह्या, जो यहही मंगल है ॥८२॥ आगैं टीकाकार अपना नामकूं प्रकट करते पूर्वोक्त आत्माहीकूं आशीर्वाद करै हैं-

अविचलितचिदात्मन्यात्मनात्मानमात्मन्यनवरतनिमग्नं धारयद् ध्वस्तमोहं।
उदितममृतचंद्रज्योतिरेतत्समंताज्ज्वलतु विमलपूर्णं निस्सपत्नस्वभावं ॥८३॥

सं० टी०—समंतात्-सामस्त्येन ज्वलतु द्योततां, किं ? एतत्-प्रसिद्धं, अमृतेत्यादिः-न म्रियते यत्र इत्यमृतं-मोक्षः,तदेव चन्द्रः चन्द्रयति-आह्लादयति इति चन्द्रः,तस्य ज्योतिः-ज्ञानतेजः इत्यर्थः। अथवा अमृतचन्द्रसूरेर्वाग्ज्योतिः, कीदृक्षं मोक्षज्ञानं ? आत्मना ज्ञानेन कृत्वा आत्मनि—स्वस्वरूपे, आत्मानं—स्वस्वरूपं धारयत्,दधत् कीदृक्षे ? अविचलितेत्यादिः-अविचलितः-शाश्वतः, स चासौ चित्-चेतना च स एवात्मा-स्वरूपं यस्य तस्मिन् तद्वाग्ज्योतिरपि स्वस्वरूपे स्वरूपं धारयितुं क्षमं। कीदृक्षं पुनः ? आत्मनि अनवरतनिमग्नं-निरंतरं तदंतःपातितं पुनः ध्वस्तमोहं ध्वस्तः-विनष्टः मोहो यत्र यस्मात्प्राणिनां वा तत् उदितं-उदयं प्राप्तं वाग्ज्योतिरपि भव्यप्रतिबोधनायोदयं गतं। पुनः विमलपूर्णं विगतो मलोऽज्ञानादिरसत्यादिर्वा यस्माच्चत् पूर्णं ज्ञानादिगुणसंपूर्णं विविधार्थसंपूर्णं च विमलं च तत् पूर्णं च तत्। निरित्यादिः—निर्गताः सपत्नाः-कर्मवैरिणः-एकांतमतवादवैरिणश्च यस्मात्तत् तदेव स्वभावो यस्य तत् ॥ ८३ ॥ अथात्मकर्मणोर्द्वैतेऽपि ज्ञानोद्योतं नरीनृत्यते।

अर्थ-यह अमृतचंद्रज्योति कहिये जामैं मरण नाही तथा जाकरि अन्यकै मरण नाही सो अमृत, तथा अत्यंत स्वादरूप मिष्ट होय ताकूं लोक रूढिकरि अमृत कहै हैं। ऐसा अमृतमयी जो चंद्रमासारिखा ज्योति प्रकाशस्वरूप ज्ञान, प्रकाशरूप आत्मा, सो उदयकूं प्राप्त भया।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सो यह समंतात् कहिये सर्व तरफ सर्वक्षेत्रकालमें, ज्वलतु कहिये देदीप्यमान प्रकाशरूप रहौ। कैसा है? अविचलित कहिये निश्चल जो चित् कहिये चेतना सो है स्वरूप जाका ऐसा जो अपना आत्मा, ताविषैं आपहीकरि आत्माकूं निरंतर मग्न हुवा धारता संता है, पाया स्वभाव कूं कबहूं नाही छोडता है। बहुरि कैसा है? ध्वस्त कहिये नाशकूं प्राप्त भया है मोह जाका अज्ञान अन्धकारकूं दूरि कीया है। बहुरि निस्सपत्न कहिये प्रतिपक्षी कर्मकरि रहित ऐसा है स्वभाव जाका। बहुरि कैसा? निर्मल है अर पूर्ण है॥ भावार्थ—इहां आत्माकूं अमृतचंद्र-ज्योति कह्या सो यहै लुप्तोपमा अलंकारकरि कह्या जानना। जातैं, अमृतचन्द्रवत् ज्योति ऐसा समासविषैं वत् शब्दका लोप होय है तब अमृतचन्द्रज्योति कहिये। तथा वत् शब्द न करिये तब अमृतचन्द्ररूपज्योति ऐसा कहिये। तब भेदरूपक अलंकार है। तथा अमृतचन्द्रज्योति ऐसा ही आत्माका नाम कहिये तब अभेदरूप अलंकार हो है। अर याके विशेषण हैं तिनिकरि चन्द्रमातैं व्यतिरेक भी है। जातैं ध्वस्तमोह विशेषण तौ अज्ञान अन्धकार दूरि होना जणावे है। अर निर्मल पूर्ण विशेषण लांछनरहितपणा पूर्णपणा जणावै है। अर निःसपत्नस्वभाव विशेषण राहूबिंबतैं तथा वादला आदिकरि आच्छादित न होना जणावै है। समंतात् ज्वलन है जो सर्वक्षेत्र सर्वकालमें प्रकाश करना जणावै है। चन्द्रमा ऐसा नाही। बहुरि अमृतचन्द्र ऐसा टीकाकार अपना नामभी जणाया है बहुरि याका समास पलटिकरि अर्थ कीजिये तब अनेक अथ होय हैं सो यथासंभव जानने॥

यस्माद् द्वैतमभूत्पुरा स्वपरयोर्भूतं यतोऽत्रांतरं
रागद्वेषपरिग्रहे सति यतो जातं क्रियाकारकैः।
भुञ्जाना च यतोनुभूतिरखिलं खिन्ना क्रियायाः फलं
तद्विज्ञानघनौघमग्नमधुना किंचिन्न किंचित्किल॥ ८४॥

सं० टी०—तत्-कर्म, विज्ञानघनौघमग्नं-ज्ञाननिरंतरसमूहांतः पतितं सत् अधुना-इदानीं, ग्रन्थोक्तस्वार्थानुभावे जाते सति किंचित्-किमपि कर्म किलेति-निश्चितं, न किंचित्-न किमप्यर्थक्रियाकारि अकिंचित्करत्वात् तत्किं? यस्मात्-कर्मणः पुरा-पूर्वं, द्वैतं-आत्माकर्मेति द्वैविध्यं जातं, पुनः अत्र-जगति यतः-यस्मात्कर्मणः स्वपरयोः-आत्मकर्मणोः-सिद्धस्वात्मनोर्वा, अंतरं—भेदः-भूतः-समुत्पन्नः, क सति? रागेत्यादिः-रागद्वेषयोः परिग्रहे अंगीकारे जाते सति। पुनः यतः कर्मणः सकाशात् क्रियाकारकैः आत्मनः क्रियाः कर्मफलानुभवनरूपगमनागमनरूपाश्च कारकाणि—आत्मनः कर्तृत्वकर्मत्वकरणत्वादीनि तैः जातं उत्पन्नं कर्मांतरेणात्मनः कर्तृकर्मक्रियारूपेणाभवनात्, च-पुनः, यतः यस्मात्कर्मणः, अनुभूतिः-कर्मफलानुभवनं खिन्ना-खेदं गता, कीदृशा सा क्रियायाः-गमनागमनरूपाया जुहोतिपचतीत्यादिरूपायाश्च, अखिलं समस्तं फलं भुंजाना मया गतं मयाऽऽगतं मया हुतं मया पक्वं ममेदं कूरमित्यादिरूपफलं भुंजाना॥ ८४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथात्मगुप्तस्य स्वतत्त्वसंसूचकस्य समयसारकृविकृतत्वमस्य कृतविशुद्धबुद्धचित्स्वरूपभूरेरमृतचन्द्रसूरेः कृतकृत्यत्वं कीर्त्यते—

अर्थ—यस्मात् कहिये जिस परसंयोगरूप बंधपर्याय जनित अज्ञानतैं प्रथम तौ अपना अर परका द्वैतरूप एकभाव भया, बहुरि जिस द्वैतपणातैं अपने स्वरूपविषैं अंतर भया, बंधपर्यायहीकूं आपा जान्या, वहुरि तिस अंतर पडनेतै रागद्वेषका परिग्रह भया, तिसके होतै क्रिया अर कर्ता कर्म आदि कारकनिकरि भेद पड्या, बहुरि तिस क्रिया कारकमें भेदकरि आत्माकी अनुभूति है, सो क्रियाका समस्तफलकूं भोगती संती खेदखिन्न भई सो ऐसा अज्ञान है, सो अब ज्ञान भया। तब तिस विज्ञानघनके समूहविषैं मग्न होय गया सो अब याकूं देखिये तौ किछू भी नाहीं है। यह प्रगट अनुभवमें आवै है। भावार्थ—अज्ञान है सो परसंयोगतैं ज्ञानही अज्ञानरूप परिणया था। कछू दूजा तौ वस्तु था नाहीं। सो अब ज्ञानरूप परिणम्या तब किछूभी न रह्या। तब इस अज्ञान-के निमित्ततैं राग, द्वेष, कर्ता, कर्म, सुख, दुःख आदि भाव होंय थे, ते भी विलाय गये। एक ज्ञान ही ज्ञान रहि गया। तीन कालवर्ती अपना परका सर्व भावनिकूं आत्मा ज्ञाता द्रष्टा हुआ देखवो करौ ॥८४॥ आगै अमृतचंद्र आचार्य इस ग्रंथ करनेका अभिमानरूप कषायकूं दूर करता संता यथार्थ कहै हैं—

स्वशक्तिसंसूचितवस्तुतत्त्वैर्व्याख्या कृतेयं समयस्य शब्दैः।
स्वरूपगुप्तस्य न किंचिदस्ति कर्तव्यमेवामृतचंद्रसूरेः ॥८५॥

सं० टी०—येन-अमृतचन्द्रसूरिणा इत्याध्याहार्यो इयं व्याख्या-व्याख्यानं, कृता-निर्मापिता, कस्य ? समयस्य सं—सम्यग् अयति-गच्छति प्राप्नोति स्वगुणपर्यायानिति समयः-पदार्थः तस्य, कैः ? शब्दैः-अर्थप्रकाशकशब्दैः, कीदृशैस्तैः ? स्वेत्यादिः-स्वस्य शक्तिः-अर्थप्रकाशनसामर्थ्यं तया सं-सम्यक्, सूचितं प्रकाशितं, वस्तूनां-पदार्थानां तत्त्वं-स्वरूपं यैस्तैः, तस्य अमृतचन्द्रसूरेः-अमृतचन्द्राख्याचार्यस्य, किंचित् किमपि, कर्तव्यं—करणीयं, एव-निश्चयेन, नास्ति समस्तवस्तुकृत्येन पूर्णस्य कीदृक्षस्य तस्य ? स्वरूपे-त्यादिः-स्वस्य शुद्धचिद्रूपस्य रूपं-स्वरूपं तत्र गुप्तस्य एकतां प्राप्तस्य ॥ ८५ ॥

इति श्रीमन्नाटकसमयसाररुथपद्यस्य।ध्यात्मतरंगिण्यपरनामधेयस्य व्याख्यायां नवमोऽङ्कः ॥९॥

अर्थ—यह समय कहिये आत्मवस्तु तथा समय कहिये समयप्राभृत नामा शास्त्र,ताकी व्याख्या तथा यह आत्मख्याति नाम टीका, सो शब्दनिकरि करी है। कैसे हैं शब्द ? अपनी शक्तिहीकर संसूचित कहिये भलेप्रकार कह्या है वस्तूका तत्त्व कहिये यथार्थ स्वरूप जाकरि, अर मैं तो निज आत्मरूप अमूर्तिक ज्ञानमात्र, तिसविषैं गुप्त होय प्रवेशकरि रह्या हौं। भावार्थ—शब्द है सो तौ पुद्गल है सो पुरुषके निमित्ततैं वर्णपदवाक्यरूप परिणमै है सो इनिमैं वस्तूका स्वरूपके कहनेकी शक्ति स्वयमेव है जातैं शब्दका अर अर्थ का वाच्यवाचक संबंध है; सो द्रव्यश्रुत की रचना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दहीकै करना संभवै है। अर आत्मा है सो अमूर्तिक है, अर ज्ञानस्वरूप है, तातैं मूर्तिक पुद्गलकी रचना कैसें करै ? तातैं आचार्यने ऐसा कह्या है,सो यह समयप्राभृतकी टीका शब्दनिकरि करी है। मैं मेरा स्वरूपमैं लीन हों। मेरा कर्तव्य यामैं नाही है। ऐसैं कहनेतैं उद्धतपणाका परिहार भी आवै है। अर निमित्तनैमित्तिकव्यवहारकरि ऐसा कहियेही,जो विवक्षितकार्य फलाने पुरुषनैं किया इस न्यायकरि अमृतचंद्र आचार्यकृत यह टीका है ही। इसही न्यायकरि पढने सुननेवालेनिकूं तिनका उपकार भी मानना युक्त है। जातैं याकै पढ़ने सुननेकरि परमार्थ आत्माका स्वरूप जान्या जाय है। तिसका श्रद्धान आचरण भये मिथ्याज्ञान श्रद्धान आचरण दूरि होय है। परंपरा मोक्षकी प्राप्ति होय है। याका निरंतर अभ्यास करना योग्य है।

इस प्रकार परमाध्यात्मतरंगिणीकी वचनिकाविषैं नवमा अधिकार पूर्ण भया ॥९॥

भाषाटीकाकारका वक्तव्य।

कुन्दकुन्दमुनि कीयो गाथाबंध प्राकृत है प्राभृतसमय शुद्ध आतम दिखावनूं।
सुधाचंद्रसूरि करी संस्कृतटीका वर आत्मख्याति नाम यथातथ्य मन भावनूं ॥
देशकी वचनिकामैं लिखी जयचन्द पढ़ै संक्षेप अर्थ अल्पबुद्धिकूं पावनूं।
पढो सुनो मन लाय शुद्ध आतमा लखाय ज्ञानरूप गहौ चिदानंद दरसावनूं ॥

दोहा—समयसार अविकारका वर्णन कर्ण सुनंत ॥
द्रव्यभावनोकर्म तजि आतमतत्त्व लखंत ॥

ऐसैं समयसारप्राभृतनामा ग्रन्थकी आत्मख्याति नामा संस्कृतटीकाके पद्यनिकी देश भाषामय वचनिका लिखी है। सो यह ताका संक्षेप भावार्थरूपसा अर्थ लिख्या है। संस्कृतटीकामें न्यायतैं सिद्ध भये प्रयोग हैं। तिनिका विस्तार करिये तब अनुमानप्रमाणके प्रयोग प्रतिज्ञा, हेतु, उदाहरण, उपनय, निगमरूप हैं, तिनिका स्पष्टकरि व्याख्यान लिखिये तौ ग्रन्थ वहुत बधै। तथा आयु बुद्धि बल स्थिरता अल्प, तातैं जेता वण्या तेता संक्षेपकरि प्रयोजन मात्र लिख्या है। ताकूं वांचिकरि भव्यजीव पदार्थ समझियो। अर किछू अर्थमें हीनाधिक होय सो बुद्धिमान् मूलग्रन्थतै जैसैं होय,तैसैं समझियो, कालदोषतैं इन ग्रन्थनिकी गुरुसम्प्रदायका व्युच्छेद होय गया है। तातैं जेता वणैं तेता अभ्यास होय है। जैनमत स्याद्वादरूप है, सो जे जिनमतकी आज्ञा माने हैं तिनिके बिपरीत श्रद्धान न होय है। कहूँ अर्थका अन्यथा समझना भी होय तौ बिशेष बुद्धिमानका निमित्त मिलै यथार्थ होय है। जिनमतके श्रद्धानी हठग्राही नाही होय हैं ऐसैं जानना। ॥ अंतमंगलके अर्थ परमेष्ठीकूं नमस्कारकरि ग्रन्थ समाप्त करिये हैं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छप्पय—मंगल श्रीअरहंत घातियाकर्म निवारे। मंगल सिद्ध महंत कर्म आठूं परजारे।
आचारिज उवज्झाय मुनी मंगलमय सारे। दीक्षा शिक्षा देय भव्यजीवनिकूं तारे।
अठवीस मूलगुण धार जे सर्वसाधु अणगार हैं। मैं नमूं पंचगुरुचरणकूं मंगल हेतु करार हैं
जैपुरनगरमांहिं तेरापंथशैली बडी वडे वडे गुनी जहां पढै ग्रन्थ सार हैं।
जयचन्द्र नाम मैं हूं तिनिमै अभ्यास किछू किया बुद्धिसारूं धर्मरागतैं विचार हैं॥
समयसारग्रंथ ताकी देशके वचनरूप भाषा करि पढो सुनो करो निरधार है।
आपापर भेद जानि, हेय त्यागि, उपादेय गहि शुद्ध आतमकूं यही वात सार है॥ २॥
दोहा-संवत्सर विक्रम तणूं अष्टादश शत और। चौसठि कातिक वदि दशैं पूरण ग्रंथ सुठौर_

संस्कृतटीकाकारकी प्रशस्ति।

जयतु जितविपक्षः पालिताशेषशिष्यो विदितनिजस्वतत्त्वश्चोद्भूतानेकसत्त्वः।
अमृतविधुयतीशः कुन्दकुन्दो गणेशः श्रुतसुजिनविवादः स्याद्विवादाधिवादः॥ १॥
सम्यक्संसारवल्लीवलयविदलने मत्तमातंगमानी पापातापेभकुंभोद्गमनकराकुंठकंठीरवारिः (?)
शिद्धद्विद्याविनोदाकलितमतिरहो मोहतामस्य सार्था (?)
चिद्रूपोद्भासिचेता विदितशुभयतिर्ज्ञानभूपस्तु भूयात्॥
विजयकीर्तियतिर्जगतां गुरुर्विधृतधर्मधुरोद्धृतिधारकः।
जयतु शासनभासनभारतीमयमतिर्दलितापरवादिकः॥
शिष्यस्तस्य विशिष्टशास्त्रविशदः संसारभीताशयो भावाभावविवेकवारिधितरस्स्याद्वादविद्यानिधिः
टीकां नाटकपद्यजां वरगुणाध्यात्मादिस्रोतस्विनीं श्रीमच्छ्रीशुभचंद्र एष विधिवत्संचर्करीति स्म वै
त्रिभुवनवरकीर्तेर्जातरूपात्तमूर्त्तेः शमदमयममूर्तेराग्रहान्नाटकस्य।
विशदविभववृत्तो वृत्तिमाविश्चकार गतनयशुभचन्द्रो ध्यानसिद्धयर्थमेव॥ ५॥
विक्रमवरभूपालात्पंचत्रिशते त्रिसप्तति व्यधिके। वर्षेण्याश्विनमासे शुक्ले पक्षेऽथ पंचमीदिवसे।
रचितेयं वरटीका नाटकपद्यस्य पद्ययुक्तस्य। शुभचंद्रेण सुजयताद्विद्यासवलं न पद्मांकात्॥७॥
······पातनिकाभिश्च भिन्नभिन्नाभिः। जीयादाचंद्रार्कस्वाध्यायात्मतरंगिणी टीका॥८॥
इति कुमतद्रुममूलोन्मूलनमहानिर्झरणी श्रीमदध्यात्मतरंगिणी टीका समाप्ता।

॥ समाप्तश्चायं ग्रंथः॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

११४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi